No. २८१५ (महाभारते)

Title भगवद्गीता १८ टीका सहिता
५ माऽध्यायः

Author श्री मधुसूदन सरस्वती

Extent १८६ Age ८

Subject वेदान्त शास्त्रं

2715

F. = 147

पंचमाध्याय

शंकरभाष्य
आनंदगिरिटी॰
श्रीधरी स्वामिकृत
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयंती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
तात्विकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुन उवाच संन्यासं कर्म्मणां कृष्ण पुनर्योगं च शंस
सि यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं १

शांकरभाष्यं

कर्म्मण्यकर्म्म यः पश्येदित्यारभ्य स युक्तः कृत्स्नकर्म्मकृत ज्ञानाग्निदग्ध
कर्म्माणं शारीरं केवलं कर्म कुर्वन् यदृच्छालाभसंतुष्टः ब्रह्मार्पणं ब्रह्मह
विः कर्मजान् विद्धि तान् सर्वान् सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्मा
णि योगसंन्यस्तकर्माणमित्येतैर्वचनैः सर्वकर्मसंन्यासमवोचद्भगवा
न् छित्वैनं संशयं योगमातिष्ठेत्यनेन वचनेन पुनर्योगं च कर्मानुष्ठान
लक्षणमनुतिष्ठेत्युक्तवान् तयोरुभयोश्च कर्मानुष्ठानकर्मसंन्यासयोः स्थि
तिगतिवत् परस्परविरोधादेकेन सह कर्त्तुमशक्यत्वात् कालभेदेन चानु
ष्ठानविधानाभावादर्थादेतयोरन्यतरकर्त्तव्यतायां प्राप्तौ सत्यां यत् प्रशस्य
तरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोः तत्कर्तव्यं नेतरदित्येवं मन्यमा
नः प्रशस्यतरबुभुत्सयार्जुन उवाच संन्यासं कर्मणां कृष्णेत्यादिना ननु
चात्मविदो ज्ञानयोगेन निष्ठां प्रतिपादयिष्यन् पूर्वोदाहृतैर्वचनैर्भगवान् स
र्वकर्मसंन्यासमवोचन्न त्वनात्मज्ञस्यातश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपु
रुषविषयत्वादन्यतरस्य प्रशस्यतरत्वबुभुत्सया प्रश्नोऽनुपपन्नः सत्यमेवं त
दभिप्रायेण प्रश्नो नोपपद्यते प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति
वदामः कथं पूर्वोदाहृतैर्वचनैर्भगवता कर्मसंन्यासस्य कर्तव्यतया विव
क्षितत्वात् प्राधान्यमन्तरेण च कर्तारं तस्य कर्तव्यत्वासंभवादनात्मविदपि
कर्ता पक्षे प्राप्तोऽनूद्यत इति न पुनरात्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षित
मित्येवं मत्वार्जुनस्य कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्पुरुषकर्तृ
कत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्परविरोधादन्यतरस्य कर्तव्य
त्वे प्राप्ते प्रशस्यतरं च कर्तव्यं नेतरदिति प्रशस्यतरविविदिषया प्रश्नो नानुप
पन्नः प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते
कथं संन्यासकर्मयोगौ निःश्रेयसकरौ तयोस्तु कर्मसंन्यासात् कर्मयोगो
विशिष्यते इति प्रतिवचनमेतन्निरूप्यं किमनेनात्मवित्कर्तृकयोः संन्यासकर्म

गी० टी० ५

योगयोर्निःश्रेयसकरत्वं प्रयोजनमुक्त्वा तयोस्तु कुतश्चिद्विशेषात् कर्मसंन्या
सात् कर्मयोगस्य विशिष्टत्वमुच्यते आहोस्विदनात्मवित्कर्तृकयोः संन्यासकर्म
योगयोः तदुभयमुच्यत इति किं चातो यद्यात्मवित्कर्तृकयोः कर्मसंन्यासकर्म
योगयोर्निःश्रेयसकरत्वं तयोस्तु कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वमुच्य
ते यदि वानात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति अत्रो
च्यते आत्मवित्कर्तृकयोः संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्वव
चनं तदीयाच्च संन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमित्येतदुभयमनुप
पन्नं यद्यनात्मविदः कर्मसंन्यासः तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयो
गः संभवेतां तदा तयोर्निःश्रेयसकरत्वोक्तिः कर्मयोगस्य च कर्मसंन्यासाद्विशि
ष्टत्वाभिधानमित्येतदुभयमुपपद्येत आत्मविदस्तु संन्यासकर्मयोगयोर
संभवात्तयोर्निःश्रेयसकरत्वाभिधानं कर्मसंन्यासाच्च कर्मयोगो विशिष्यत
इति चानुपपन्नमत्राह किमात्मविदः संन्यासकर्मयोगयोरप्यसंभव आ
होस्विदन्यतरस्यासंभवः यदा चान्यतरस्यासंभवस्तदा किं कर्मसंन्यासस्योत
कर्मयोगस्येत्यसंभवे कारणं च वक्तव्यमिति अत्रोच्यते आत्मविदो निवृत्त
मिथ्याज्ञानत्वाद्विपर्ययज्ञानमूलस्य कर्मयोगस्यासंभवः स्यात् जन्मादिसर्व
विक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः सम्य
ग्दर्शनेनापास्तमिथ्याज्ञानस्य निःक्रियात्मस्वरूपावस्थानलक्षणं सर्वक
र्मसंन्यासमुक्त्वा तद्विपरीतस्य मिथ्याज्ञानमूलकर्तृत्वाभिमानपुरःसरस्य
सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्येह शास्त्रे तत्र तत्रात्मस्वरूपा
निरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधादभावः प्रतिपा
द्यते यस्मात्तस्मादात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः ।
कर्मयोगो न संभवतीति युक्तमुक्तं स्यात् केषु केषु तत्रात्मस्वरूपनिरूपण
प्रदेशेष्वात्मविदः कर्माभावः प्रतिपाद्यत इत्यत्रोच्यते अविनाशि तु तदिति
प्रकृत्य य एनं वेत्ति हन्तारं वेदाविनाशिनं नित्यमित्यादौ तत्र तत्रात्मवि
दः कर्माभाव उच्यते ननु च कर्मयोगोऽप्यात्मस्वरूपनिरूपणप्रदेशे तत्र
तत्र प्रतिपाद्यत एव तद्यथा तस्माद्युध्यस्व भारत स्वधर्ममपि चावेक्ष्य क
र्मण्येवाधिकारस्ते इत्यादावतश्च कथमात्मविदः कर्मयोगस्यासंभवः स्या

दिति अत्रोच्यते सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् ज्ञानयोगेन सांख्यानामि
त्यनेन सांख्यानामात्मतत्त्वविदां अनात्मवित्कर्तृककर्मयोगनिष्ठातो निःक्रिया
त्मस्वरूपावस्थानलक्षणाया ज्ञानयोगनिष्ठायाः पृथक्करणात् कृतकृत्यत्वे
नात्मविदः प्रयोजनान्तराभावात् तस्य कार्यं न विद्यत इति कर्तव्यान्तराभावव
चनाच्च न कर्मणामनारंभात् संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः इत्या
दिवचनाच्चात्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात् योगारूढस्य तस्यैव शमः का
रणमुच्यत इत्यनेन चोत्पन्नसम्यग्दर्शनस्य कर्मयोगाभाववचनात् शारीरं केव
लं कर्म कुर्वन्नाप्नोति किल्बिषमिति च शरीरस्थितिकारणातिरिक्तस्य कर्मणो
वारणात् नैव किंचित् करोमीति युक्तो मन्येत तत्त्वविदित्यनेन च शरीरस्थितिमा
त्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मस्वात्मयाथात्म्यविदः करोमीति प्रत्ययस्य
समाहितचेतस्तया सदा कर्तव्यत्वोपदेशादात्मतत्त्वविदः सम्यग्दर्शनेन विरुद्धो
मिथ्याज्ञानहेतुकः कर्मयोगः स्वप्नेऽपि न संभावयितुं शक्यते यस्मात्तस्मादना
त्मवित्कर्तृकयोरेव संन्यासकर्मयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासा
त् पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात् सत्यकर्तृत्वविज्ञाने कर्मै
कदेशविषयत्वात् यमनियमादिसहितत्वेन च दुरनुष्ठेयत्वात् सुकरत्वेन च क
र्मयोगस्य विशिष्टत्वाभिधानमित्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः
प्रष्टुरभिप्रायो निश्चीयते इति स्थितं ज्यायसी चेत्कर्मणस्ते इत्यत्र ज्ञानकर्मणोः
सहासंभवे यच्छ्रेय एतयोस्तन्मे ब्रूहि इत्येवं पृष्टोऽर्जुनेन भगवान् ज्ञानयोगेन सां
ख्यानां निष्ठा पुनः कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार न च संन्यस
नादेव केवलात् सिद्धिं समधिगच्छतीति वचनात् ज्ञानसहितस्य तस्य सिद्धिसा
धनत्वमिष्टं कर्मयोगस्य च विधानात् ज्ञानरहितस्य संन्यासः श्रेयान् किं वा कर्मयो
गः श्रेयानित्येतयोर्विशेषबुभुत्सयार्जुन उवाच संन्यासं परित्यागं कर्मणां शा
स्त्रीयाणां अनुष्ठानविशेषाणां शंससि प्रशंससि कथयसीत्येतत् पुनर्योगं च
तेषामेवानुष्ठानमवश्यं कर्तव्यं शंससि तेन मे कतरत् श्रेय इति संशयः किं कर्मा
नुष्ठानं श्रेयः किं वा तत्त्यागमिति प्रशस्यतरं चानुष्ठेयं अतस्त्वं यच्छ्रेयः प्रशस्यतर
मेतयोः कर्मसंन्यासकर्मानुष्ठानयोर्यदनुष्ठानात् श्रेयोवाप्तिर्मम स्यादिति मन्य
से तदेकमन्यतरत् सहैकपुरुषानुष्ठेयत्वासंभावान्मे ब्रूहि सुनिश्चितमभिप्रेतं
तवेति १

आनंदगिरिकृतटीका

पूर्वोत्तराध्याययोः संबंधमभिदधानो वृत्तानुवादपूर्वकमर्जुनप्रश्नस्याभिप्रायं प्र
दर्शयितुं प्रक्रमते कर्मणीत्यादिना । इत्यारभ्य कर्मण्यकर्मदर्शनमुक्त्वा तत्प्रशंसा
प्रसारितेत्याह स युक्त इति ज्ञानवंतं सर्वाणि कर्माणि लोकसंग्रहार्थं कुर्वंतं ज्ञानल
क्षणेनाग्निना दग्धसर्वकर्माणं कर्मप्रयुक्तफलसंबन्धविधुरं विवेकवंतो वदन्ती
ति ज्ञानवतो ज्ञानफलभूतं संन्यासं विवक्षन् विविदिषोः साधनरूपमपि संन्यासं
भगवान्विवक्षितवानित्याह ज्ञानाग्नीति निराशीरित्यारभ्य शारीरं स्थितिमात्रका
रणं कर्म शरीरस्थितावपि संगरहितः सन् समाचरन्धर्माधर्मफलभागी न भवती
त्यपि पूर्वोत्तराभ्यामध्यायाभ्यां द्विविधसंन्यासं सूचितवानित्याह शारीरमिति यद
च्छेत्यादावपि संन्यासः सूचितः तद्धर्मफलायोपदेशादित्याह यदृच्छेति ज्ञानस्य
न यज्ञत्वसम्पादनपूर्वकं प्रशंसावचनादपि कर्मसंन्यासो दर्शितो ज्ञाननिष्ठस्येत्याह
ब्रह्मार्पणमिति ज्ञानयज्ञस्तुत्यर्थं विहितान्नानाविधान्यज्ञाननूद्य तेषां देहादि
व्यापारजन्यत्ववचनेनात्मनो निर्व्यापारत्वविज्ञानफलाभिलापादपि यथोक्तमा
त्मानं विविदिषोः सर्वकर्मसंन्यासेऽधिकारो सूचित इत्याह कर्मजानिति समस्त
स्यैवावशेषवर्जितस्य कर्मणो ज्ञाने परिसमाप्त्यभिधानाच्च जिज्ञासोः सर्वक
र्मसंन्यासः सूचित इत्याह सर्वमिति तद्विद्धीत्यादिना ज्ञानप्राप्त्युपायं प्रणिपा
तादि प्रदर्शयता तेन ज्ञानेनातिशयमाहात्म्यवता सर्वकर्मणां निवृत्तिरेवेति व
दता च ज्ञानार्थिनः संन्यासेऽधिकारो दर्शितो भगवतेत्याह ज्ञानाग्निरिति ज्ञानेन
समुच्छिन्नसंशयं तस्मादेव ज्ञानात्कर्माणि संन्यस्यावस्थितमप्रमत्तं वशीकृ
तकार्यकरणसंघातवंतं प्रातिभासिकानि कर्माणि न निबध्नन्तीत्यपि द्वि
विधः संन्यासो भगवतोक्त इत्याह योगेति कर्माणीत्यारभ्य योगसंन्यस्तकर्मा
णमित्यंतैरुदाहृतैर्वचनैरुक्तं संन्यासमुपसंहरति इत्यंतैरिति तर्हि कर्मसंन्यास
स्यैव जिज्ञासुना ज्ञानवता चाऽऽचरणीयत्वात् कर्मानुष्ठानमनादेयमापन्नमित्याशं
क्योक्तमर्थं तत्र मन्नुवदति छित्त्वैनमिति कर्मतत्त्यागयोरुक्तयोरेकेनैव पुरुषे
णानुष्ठानसंभवान्न विरोधोऽस्तीत्याशंक्य युगपदक्रमेण वानुष्ठानमिति वि
कल्प्याद्यं दूषयति उभयोरिति द्वितीयं प्रत्याह कालभेदेनेति उक्तयोर्द्वयोरेकेन
पुरुषेणानुष्ठानासंभवे कथं कर्तव्यमिति विविदिषायामाह अर्थादिति द्वयोरु
क्तयोरेकेन युगपत्क्रमाभ्यामनुष्ठानानुपपत्तेरित्यर्थः अन्यतरस्य कर्तव्यत्वे कतर

सेति कृतो निर्णयो द्वयोः संनिपाताविशेषादित्याशंक्याह यत् प्रशस्यतरमिति
भगवता कर्मणां संन्यासो योगश्चोक्तो न च तयोः समुच्चित्यानुष्ठानं तेनान्यतरस्य
श्रेष्ठस्यानुष्ठेयत्वेन तद्बुभुत्सया प्रश्नोपपत्तिरित्युपसंहरति इत्येवमिति नायं प्रष्टुर
भिप्रायः कर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयत्वस्यैकत्वादेकस्मिन् पुरुषे
प्राप्त्यभावादिति शंकते नन्विति चोद्यमंगीकृत्य परिहरति सत्यमेवमिति की
दृशस्तर्हि प्रष्टुरभिप्रायो येन प्रश्नमुपपन्नमिति पृच्छति कथमिति एकस्मिन्पुरु
षे कर्मतत्त्यागयोरस्ति प्राप्तिरिति प्रष्टुरभिप्रायं प्रतिनिर्देष्टुं प्रारभते पूर्वोदाहृ
तैरिति यथा स्वर्गकामो यजेतेति स्वर्गकामोद्देशेन यागो विधीयते न तु तस्ये
वाधिकारो नान्यस्यापि प्रतिपाद्यते वाक्यभेदप्रसंगात् तथा नात्मवित्कर्ता सं-
न्यासपदेन प्राप्तोऽनूद्यते न चात्मवित्कर्तृकत्वमेव संन्यासस्य नियम्यते वैराग्यमा
त्रेणाज्ञस्यापि संन्यासविधिदर्शनात् तस्मात्कर्मतत्त्यागयोरविद्वत्कर्तृकत्वमस्
तीति मत्वाऽर्जुनस्य प्रश्नः संभवतीति भावः भवतु संन्यासस्य कर्तव्यं विव- त्व
त्तात्तथापि कथं प्रशस्यतरबुभुत्सया प्रश्नप्रवृत्तिरित्याशंक्याह प्रायान्यमिति त
थापि कथमेकस्मिन्पुरुषे तयोरसंभवादुक्ताभिप्रायेण प्रश्नवचनं प्रकल्प्यते
तत्राह अनात्मविदिति आत्मविदो विद्यासामर्थ्यात् कर्मत्यागयोः संभवेऽनस्या
पि सति वैराग्ये तत्त्यागस्यावश्यकत्वात् तत्र कर्तासौ प्राप्तो वाऽनूद्यते तथा च कर्म
तत्त्यागयोरेकस्मिन् विद्वत्पुरुषे प्राप्तेर्युक्तत्वादुक्ताभिप्रायेण प्रश्नमुपपन्नमिति विवक्षितम
र्थः संन्यासस्यात्मवित्कर्तृकत्वमेवात्र विवक्षितं किं न स्यादित्याशंक्य कर्तृत्वेनर
पर्युदासः संन्यासविधिप्रश्नयोर्भेदे वाक्यभेदप्रसंगान्मैवमित्याह न त्विति इ
ति शब्दो वाक्यभेदप्रसंगाद्धेतुद्योतनार्थः ततः किमित्याशंक्य फलितमाह
एवमिति कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्कर्तृकत्वमप्यस्तीत्येवं मत्वा
ऽर्जुनस्य प्रशस्यतरविविदिषया प्रश्नो नानुपपन्न इति संबन्धः तयोः समुच्चि
त्यानुष्ठानसंभवे कथं प्रशस्यतरविविदिषेत्याशंक्याह पूर्वोक्तेनेति उभयोश्च
स्यादावुक्तप्रकारेण कर्मतत्त्यागयोर्मिथो विरोधान्न समुच्चित्यानुष्ठानं सावका
शमित्यर्थः भवतु तर्हि यस्य कस्यचिदन्यतरस्यानुष्ठेयत्वमिति कुतो यथोक्ताभि
प्रायेण प्रश्नमुपपन्नमित्याशंक्याह अन्यतरस्येति उभयप्राप्तौ सत्यामेवोपपन्नत्वाद
न्यतरपदप्रयोगस्य विशेषस्यान्वेष्यत्वादुक्ताभिप्रायेण प्रश्नोपपत्तिरित्यर्थः ॥ इतश्चा-

विद्वत्कर्तृकयोः संन्यासकर्मयोगयोः कर्तव्यतेः श्रेयानिति प्रश्नस्याभिप्रायो भातीत्या
ह प्रतिवचनेनेति किं तत्प्रतिवचनं कथं वा तन्निरूपणमिति पृच्छति कथमि
ति तत्प्रतिवचनं दर्शयति संन्यासेति तन्निरूपणां कथयति एतदिति तदुभ
यं निःश्रेयसकरं तं कर्मयोगस्य श्रेष्ठत्वं चेत्यर्थः गुणदोषविभागविवेकार्थं
पृच्छति किं चेति अतोऽस्मिन्नाद्यपक्षे किं दूषणं अस्मिन्नु द्वितीये पक्षे किं फ
लमिति प्रश्नार्थः तत्र सिद्धान्ती प्रथमपक्षे दोषमादर्शयति अत्रेत्यादिना म
देवानुपपन्नत्वं व्यतिरेकद्वारा विवृणोति यदीत्यादिना निःश्रेयसकरत्वोक्तिरि
त्यत्रपारस्पर्येणेति इष्टत्वं विशिष्टत्वाभिधानमिति प्रतियोगिनोऽसहायत्वा
दस्य चशुद्धिद्वारा ज्ञानार्थत्वादित्यर्थः आत्मज्ञस्य कर्मसंन्यासकर्मयोगयो
रसंभवे दर्शिते चोदयति अज्ञादेति चोदयितानिर्द्धारणार्थं विमृशति किमि
त्यादिना अन्यतरासंभवेऽपि संदेहात् प्रश्नोऽवतरतीत्याह यदा चेति यस्य कस्य
चिदन्यतरस्यासंभवो भविष्यतीत्याग्राह्यकारणमन्तरेणासंभवो भवन्निति प्रसं
गः स्यादिति मन्वानः संनाह असंभवेति आत्मविदः सकारणं कर्मयोगासंभ
वं सिद्धान्ती दर्शयति अत्रेति संग्रहवाक्यं विवृणोति नात्मवित्त्वं विवृणोति तत्त्वदी
ति तस्य पदोक्तं निहतमिथ्याज्ञानत्वं सविदानीं व्यनक्ति सम्यगिति विपर्ययज्ञा
नमूलस्येत्यादिनोक्तं प्रपंचयति निःक्रियेति यथोक्तसंन्यासमुक्त्वा ततो विपरी
तस्य कर्मयोगस्याभावः प्रतिपाद्यत इति संबंधः वैपरीत्यं स्फोरयन् कर्मयोग
मेव विशिनष्टि मिथ्याज्ञानेनेति मिथ्या च तत् ज्ञानं चेत्यनाद्यनिर्वाच्यमज्ञानं
तन्मूलाहंकर्तृ यात्मनि कर्तृत्वाभिमानलक्षणस्येति यावत् यथोक्तसं
न्यासमुक्त्वा यथोक्तकर्मयोगस्यासंभवप्रतिपादने हेतुमाह सम्यग्ज्ञा
नेति उक्तं तदभावप्रतिपादनं तदाह इहेति उक्तहेतुं कृत्वात्मज्ञस्य कर्मयो
गासंभवे फलितमाह यस्मादिति इहशास्त्रे तत्र तत्रेत्यादावुक्तमेव व्यक्ती
कर्तुं पृच्छति केषु केष्विति तानेव प्रदेशान् दर्शयति अत्रेति आत्मस्वरूपनि
रूपणप्रदेशेषु संन्यासप्रतिपादनादात्मविदः संन्यासो विवक्षितश्चेत्तर्हि क
र्मयोगोऽपि तस्य कस्मान्न भवति प्रकरणाविशेषादिति शंकते ननु चेति । आ
त्मविद्याप्रकरणे कर्मयोगप्रतिपादनमुदाहरति तद्यथेति प्रकरणादात्मवि
दोऽपि कर्मयोगस्य संभवे फलितमाह अतश्चेति आत्मज्ञानोपायत्वेनापि प्रकरण

गपाठसिद्धौ ज्ञानारूढं न्यायविरुद्धं कर्मकल्पितमशक्यमिति परिहरति
य्रेयोप्तत इति सम्यग्ज्ञानमिथ्याज्ञानयोस्तत्कार्ययोश्च भ्रमनिवृत्तिभ्रमसद्भा
वयोर्मिथो विरोधात् कर्तृत्वादिभ्रममूलं कर्म सम्यग्ज्ञानारूढस्य न संभवती
त्यर्थः आत्मज्ञस्य कर्मयोगासंभवे हेतुं तस्मादज्ञानयोगेनेति इतश्चात्म
विदो ज्ञानारूढस्य कर्मयोगेन युक्तिमानित्याह ज्ञानहेत्वभावेनेति ज्ञानवतो ना
स्ति कर्मत्वकारणाभावात् तस्मात् तस्येति तर्हि ज्ञानवतां कर्मयोगस्य हेयत्वं
ज्ञाततेजसु नापि तस्य त्याज्यत्वं ज्ञानप्राप्त्यानन्तर्यापि पुरुषार्थसिद्धेरित्याशंक्य
जिज्ञासोरस्ति कर्मयोगापेक्षा इत्याह न कर्मणामिति स्वरूपोपकार्यंगमं
तेषामङ्गि स्वरूपानिष्पत्तौ ताथिना कर्मयोगस्य शुद्ध्यादिद्वारा ज्ञानहेतो
रादेयत्वमित्यर्थः तर्हि ज्ञानवतामपि ज्ञानफलोपकारित्वेन कर्मयोगो ।
मृग्यतामित्याशंक्याह योगारूढस्येति उत्पन्नसम्यग्ज्ञानस्य कर्माभावे श
रीरस्थितिहेतोरपि कर्मणोऽसंभवात्तत्स्य शरीरस्थितिस्तद्दृष्ट्यिनो वक्त
नो जीवन्मुक्तिस्तदभावे च कस्योपदेष्टृत्वं उपदेष्टभावेन च कुतो नादयः ता
स्यादित्याशंक्याह शरीरमिति विदुषोपि शरीरस्थितिर्नास्थितौ वा तत्माव प्र
युक्तेः शुद्धदर्शनश्रवणादि कर्तृत्वाभिमानोपि तस्य स्यादित्याशंक्याह नैवेति
तत्त्ववित्त्वेन च समाहितचेतस्तया करोमीति प्रत्ययस्य सदैवाकर्तृत्वो
पदेशादिति संबन्धः यत्तु विदुषः शरीरस्थितिनिमित्तं कर्माभ्युपगतं तेनास्मिन्
कर्तृत्वाभिमानोपि स्यादिति तत्राह शरीरेति आत्मयाथात्म्यविदः तस्यापि ना
हं करोमीति प्रत्ययस्यैव किंचित्करोमीत्यादाव कर्तृत्वोपदेशात् कर्तृ
त्वाभिमानसंभावनेत्यर्थः यथोक्तोपदेशानुसंधानाभावे विदुषोपि करो
मीति स्वाभाविकप्रत्ययद्वारा कर्मयोगः स्यादित्याशंक्याह आत्मतत्त्वेति य
द्यपि विद्वान् यथोक्तस्योपदेशं कदाचिन्नानुसंपश्यति तथापि तत्त्वविद्याविरोधा
न्मिथ्याज्ञानं तन्निमित्तं कर्म वा तस्य संभावयितुमशक्यमित्यर्थः आत्मवि
त्कर्तृकयोः संन्यासकर्मयोगयोर्योगात् प्रयोर्निःश्रेयसकरत्वमत्यन्तवत्स
विशिष्टत्वमित्येतदयुक्तमिति सिद्धवत्कृतिनोपपत्तमङ्गीकरोति यस्मा
दित्यादिना तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमि
ति संबंधः ननु कर्मयोगेन शुद्धबुद्धेः संन्यासो जायमानस्तस्मादुत्कृष्यते
कथं तस्मात् कर्मयोगस्योत्कृष्टत्ववाचोयुक्तिरुक्तेति तत्राह एवमिति वे

त्वगाणमेव संभवति समर्थं चेति त्यागमविहितस्य वर्णादेरकर्तृत्वविज्ञाने स
त्येव पूर्वाश्रमोपात्तकर्मैकदेशविषयसंन्यासात् कर्मयोगस्य श्रेयस्त्ववचनं ।
नैतादृशस्य त्यागस्यास्ति विनमित्यादि स्मृतिविरुद्धमित्याशंक्याह यमनिय
मादिति आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवं प्रीतिः प्रसादो माधुर्यम
क्रोधश्च यमा दश । दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ व्रतोपवासौ
मौनं च स्नानं च नियमा दश स्मृता इत्युक्तैर्यमनियमैरन्यैश्चाश्रमधर्मैर्विशिष्टेना
नुष्ठानमशक्यत्वादुक्तसंन्यासात् कर्मयोगस्य विशिष्टत्वोक्तिर्युक्तेत्यर्थः न
हि कश्चिदिति न्यायेन कर्मयोगस्येतरापेक्षया सुकरत्वाच्च तस्य विशिष्टत्व
वचनं श्लिष्टमित्याह सुकरत्वेन चेति प्रतिवचनवाक्यार्थालोचनात् सिद्धा
मर्थमुपसंहरति तस्मादिति संन्यासकर्मयोगयोर्मिथो विरुद्धयोः समु
च्चित्यानुष्ठानमशक्यत्वादन्यतरस्य कर्तव्यत्वे प्रशस्यतरस्य तज्ज्ञानात् तज्ज्ञाव ।
स्य वा निर्द्धारितत्वान्निर्द्धारणविषयः प्रश्नः स्यादिति प्रश्नवाक्यार्थपर्यालोच
नया प्रष्टुरभिप्रायो यथापूर्वं व्यपदिष्टस्तथा प्रतिवचनार्थनिरूपणेनापि
तस्य निश्चितत्वात् प्रश्नोपपत्तिः सिद्धेत्यर्थः ननु तृतीये यथोक्तप्रश्नस्य भग
वता निर्णीतत्वान्नात्र प्रश्नप्रतिवचनयोः सावकाशत्वमित्याशंक्य विस्तरे
णोक्तमेव संबंध्य पुनः संक्षेपतो दर्शयितुमयमीचेदिति सांख्ययोगयो
र्भिन्नपुरुषानुष्ठेयत्वेन निर्णीतत्वान्न पुनः प्रश्नयोगपत्रमित्यर्थः उक्तोपित
तयोः प्रश्नविषयत्वमित्याह न चेति एवकारविशेषणात् ज्ञानसहितसं
न्यासस्य सिद्धिसाधनत्वं भगवताभिमतं लिंगैन संन्यासं योगमातिष्ठेति च
कर्मयोगस्य विधानात् तस्यापि सिद्धिसाधनत्वमिष्टं ततश्च निर्णीतत्वान्न ।
प्रश्नस्तद्विषयः सिद्ध्यतीत्यर्थः केनाभिप्रायेणातर्हि प्रश्नः स्यादित्याशंक्या
ज्ञानरहितसंन्यासात् कर्मयोगस्य प्रशस्यतरत्वं बुभुत्सयेत्याह ज्ञानरहि
त इति प्रष्टुरभिप्रायमेवं प्रदर्श्य प्रश्नोपपत्तिमुक्त्वा प्रश्नमनुत्थापयति संन्या
समिति तर्हि द्वयं त्वयानुष्ठेयमित्याशंक्य तदशक्यकत्वात् प्रशस्यतरस्या
नुष्ठानार्थं तदिदमिति निश्चित्य वक्तव्यमित्याह यच्छ्रेय इति काम्यानां प्रति
षिद्धानां च कर्मणां परित्यागो मयोच्यते न सर्वेषामित्याशंक्य कर्मण्येक
र्मेत्यादौ विशेषदर्शनान्नैवमित्याह प्रागुक्ताभ्यामिति श्रवणं तर्हि शास्त्री
याशास्त्रीययोरश्रेयस्त्वयोरपि कर्मसंन्यासयोगयोरित्याह उभाविति तर्हि कर्मत्या

गस्तयोगस्येतत्त्वमयमावर्षितव्यमित्याशंक्य विरोधान्नैवमित्यभिप्रेत्याह
अर्जुन इति द्वयोरेकेनानुष्ठानायोगस्योक्तत्वात् कर्तव्यत्वोक्तेश्च संशयोत्पा
दितत्तेमव संशयं विशदयति किं कर्मेति प्रशस्यतरबुभुत्सा किमर्थमित्याशंक्या
ह प्रशस्यतरं चेति तस्यैवानुष्ठेयत्वेन प्रश्नसावकाशत्वमाह अत एवेति तदेव
प्रशस्यतरं विनिश्चितमिष्टियरनुष्ठानादिति तदेकमन्यतरमस्मै ब्रूहीति संबन्धः
उभयोरुक्तत्वे सति किमित्येकं वक्तव्यमिति निश्चयते तत्राह सहेति कर्मतत्त्या
गयोर्मिथो विरोधादित्यर्थः १ ॥

स्वामिकृतटीका निवार्य संशयं जिष्णोः कर्मसंन्यासयोगयोः जितेन्द्रियस्य यतेः पंचमी युक्तिमन्न...

अज्ञानसंभूतं संशयं ज्ञानासिना छित्वा कर्मयोगमातिष्ठोत्तिष्ठेति पूर्वमुक्तं तत्र पूर्वा
परविरोधं मन्वानोऽर्जुन उवाच संन्यासमिति यस्त्वात्मरतिरेव स्यादि
त्यादिना सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इत्यादिना च ज्ञानिनः कर्मसंन्यासं
कथयसि ज्ञानासिना संशयं छित्वा योगमातिष्ठेति पुनर्योगं च कथयसि
न च कर्मसंन्यासः कर्मयोगश्चैकस्यैकदैव संभवतः विरुद्धस्वरूपत्वात्
तस्मादेतयोर्मध्ये एकस्मिन्ननुष्ठातव्ये सति मम यच्छ्रेयः सुविनिश्चितं तदे
कं ब्रूहि १ [illegible]

पैशाचभाष्यं

सकलकर्मसंन्यासेन शमदमादिसाधनानुष्ठानेन वा ब्रह्मजिज्ञास
मानस्य ब्रह्मावबोधः स्यादेवं तथा च सकलकाम्यप्रतिषिद्धक
र्मसंन्यासेन वा स्वदेवार्हं नवथा कर्मोपनिष्ठितेन सनत्कुमारनन्दादिभिरेक
लेन संबोधः स्यादेवेत्यभिप्रायः १ ॥

रामानुजभाष्यं

मि॰ चतुर्थेऽध्याये कर्मयोगस्य ज्ञानाकारतापूर्वकस्वरूपभेदो ज्ञानांशस्य च प्रा
धान्यमुक्तं ज्ञानयोगाधिकारिणोऽपि कर्मयोगस्यान्तर्गतात्मज्ञानत्वादप्र
मादत्वात् सुकरत्वान्निरपेक्षत्वाज्ज्यायस्त्वं तृतीय एवोक्तं इदानीं कर्मयो
गस्यात्मप्राप्तिसाधनत्वे ज्ञाननिष्ठायाः शैघ्र्यं कर्मयोगान्तर्गताकर्तृत्वानु
संधानप्रकारं च प्रतिपाद्य तन्मूलं ज्ञानं च विशोध्यते कर्मयोगिनां संन्यासिनां
ज्ञानयोगतः कर्मयोगं च शैघ्र्यं संक्षिप्य उक्तं भवति तृतीयेनाध्यायेन
मुमुक्षोः प्रथमं कर्मयोग एव कार्यः कर्मयोगेन निर्दग्धान्तःकरणकषाय
मि॰

गी॰ टी॰ पं॰ स्वज्ञानयोगेनात्मदर्शनं कार्यमिति प्रतिपाद्य पुनस्तृतीयचतुर्थयोक्तीन
योगाधिकारस्य स्थामापन्नस्यापि कर्मनिष्ठैव ज्यायसी सैव ज्ञाननिष्ठानिर
पेक्षात्मप्राप्त्यैकसाधनमिति कर्मनिष्ठां प्रशंसन्ति तत्रैवञ्चार्योगकर्म नं
योगयोरात्मप्राप्तिसाधनभावे एकं सौकर्यात्कुर्यां द्वयं श्रेयः श्रेष्ठमिति त
न्मे ब्रूहि १॥

6

अभिनवगुप्तकृती टीका

संन्यासः प्रधानं उत योग इति संशयस्य प्रश्नः १।

परमार्थप्रपा टीका

अथ परस्परविरुद्धयोः कर्मसंन्यासकर्मयोगयोः स्वकृतउपदेशात्संदिहा
नोऽर्जुनः पृच्छतीति संन्यासमिति। भोः कृष्ण प्रथमं कर्मसंन्यासं शंससि पुन सं
रनंतरमेव योगं शंससि उपदिष्टवानसि तद्धि एतयोर्मध्ये यत्सु श्रेयः श्रेष्ठं तदेकं
सुनिश्चितं यथा भवति तथा मे ब्रूहि। अनेनोभयोरपि एकमेव कर्तव्यं चेति
ब्रूहीति प्रश्ने भगवानाह संन्यास इति १॥

वनमाली टीका

इति पूर्वाध्यायांते ज्ञानकर्मापि कार्ये हि सम्यक् निर्णीय माधवः सं
न्यासं कर्मणां चापि योगं चेमे कुरुणां निधिः। तत्र तृतीये ज्ञानाधिकृतस्य
कर्माविरुद्धकृतात् तद्धि कृतस्य लोकसंग्रहार्थं कर्मानुष्ठानमेव तज्ज्ञा
नावर्तकतेनोक्तं ज्ञानिनः कर्माधिकारे निश्चिते प्रारब्धवशात्कर्मानु
ष्ठाने संन्यासो वेति च तत्त्वे निर्णीतं न मन्तव्ये देहाद्य वचनेन ब्राह्मणा विवि
कै षंति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः सर्वं कर्माखिलं पार्थ ज्ञाने परि
समाप्यत इति भगवदुक्तेश्च ज्ञानार्थानि सर्वकर्माणि तथा कर्मसंन्या
सोऽपि ज्ञानार्थः श्रूयते तमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंति शांतो
दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् त्यजतैव
हि तज्ज्ञेयं त्यक्तुः प्रत्यक्पदं परं सत्यानृतं सुखदुःखं वेदानिमं लोकममुं
च परित्यज्यात्मानमन्विच्छेदित्यादौ तत्रैकमेवाज्ञं जिज्ञासुं प्रति ज्ञा
नार्थत्वेन कर्मतत्त्यागयोर्विधानात्तयोश्च विरुद्धयोर्युगपदनुष्ठानासं
भवात् मम किमिदानीमनुष्ठेयमिति संदिहानोऽर्जुनः पृच्छति सं
न्यासमिति हे कृष्ण सदानंदविग्रह भक्तपापकर्षणेति वा पकं मां प्रति

नित्यादिकर्मणां संन्यासं त्यागं शंससि वदसि तमेव पुनर्ज्ञानिन इत्यादिक्रान्त्या यो
गसंन्यस्तकर्माणमित्यादिगीतावाक्येनैव वा पुनस्त्वमेतं ज्ञानाग्नित्वा इत्यादि
वाक्येन योगमातिष्ठोत्तिष्ठेत्यादिगीतवाक्येन वा कर्मानुष्ठानं संशंससि कथ
यसि एकेन पुरुषेण द्वयोरनुष्ठानासंभवात्तयोर्मध्ये यदेकं श्रेयः प्रशस्
ततरं कर्मत्यागो वा तन्मे ब्रूहि सुनिश्चितं तन्नवतद्वदनाय सुनिश्चितं यथा
यथा स्यात्तथा ब्रूहीति वा ।

अर्जुनवैजयन्तीटीका ।

एवमेकर्मणो ज्ञानाच्छ्रेष्ठत्वे प्राप्ते कस्याश्चित्फलमप्येनत कर्तृ[illegible]रकर्तृत्वं
चेच्छ्रेयः एवं तावद्द्वितीयेऽध्याये कर्मण्येवाधिकारस्ते इत्यादिना कर्मणः
कर्तव्यता तत्र पुनरेषा ब्राह्मी स्थितिरित्यनेन ज्ञानस्याधिकर्तव्यता तत्
तृतीयेऽपि कर्मणैव हि संसिद्धिमास्थिता न मे पार्थास्ति कर्तव्यं उत्सीदेयुरिमे
लोका न कुर्यामित्यादिना सदाचारं दर्शयन् कर्मणः कर्तव्यतामभिधाय
पुनर्यस्त्वात्मरतिरेव स्यात्तस्य कार्यं न विद्यते इत्यादिना ज्ञानस्याधिकर्त
व्यतामुक्त्वा चतुर्थेऽपि कर्मणो ज्ञानाकारतामुभयोः स्वरूपभेदं च दर्शयन्
ज्ञानं प्रशस्य प्राप्यानन्तरमुक्त्वा पुनस्तस्माद्ज्ञानसंभूतं योगमातिष्ठोत्तिष्ठे
त्यनेन कर्मकर्तव्यतामुक्त्वा मिदानीं मत्तो गीतज्ञानस्य कर्मयोगस्यात्मप्रा
प्त्युपायत्वे कर्तव्यतां तु संशयानः प्रकारान्तरेणैव ज्ञानस्य प्रशस्यत्वं वोच्यते तयोरेकतरो
ऽयो भाव्योऽकर्मज्ञानाभ्यां पृष्ठो भगवानुक्ति निशम्यार्जुनं तत्त्वदनवधारितम
ना भयं वंतं समारोप्य पृच्छति सम संन्यासमिति हे कृष्ण हे सदानंद कर्मणां
नित्यवैदिकव्यापाररूपाणां संन्यासं सर्ववैदिकक्रियापरित्यागरूपं ज्ञानयोगं
पुनः शंससि पुनश्च योगं सकलेंद्रियव्यापाररूपं कर्मयोगं च शंससि एतयोर्ज्ञान
कर्मयोगयोर्मध्ये यच्छ्रेयः आत्मयाथात्म्यस्वरूपप्राप्तिसाधनं स्यात् तन्मे सुनिश्चितं
निर्णयपूर्वकमेकं ज्ञानं कर्म वा मे मह्यं ब्रूहि वद ब्रूहि किमुक्तं [illegible]णा कर्मयो
ग एव कार्यः किं वा ज्ञानयोग एव कार्यः ज्ञानाधिकारेऽपि कर्म कुर्या
देकस्य मते तोऽभयोरन्तः प्रकाशाप्रकाशयोरिव स्थितिगत्योरिव च विरुद्धध
र्मज्ञानयोर्युगपत्कर्तृत्वं कथमुपपद्यते तोऽद्वयोर्मध्ये यस्मिन्ममाधिका
रोऽस्ति तदेव ब्रूहीत्यभिप्रायः कृष्णेति संबोधनेन कृषिर्भूवाचकः तयोरैक्यं

णश्चाद्दोनस्त्वनिवृत्तिवाचकः

गी॰ टी॰ ३

7

पं ब्रह्मज्ञानस्य इत्यभिधीयत इति सूचयन् कृष्णनाम्ना स्वहितदानेश्वरात्मकः परं ब्रह्मस्व
रूपत्वमस्मिन्नेवोक्तिभिर्यदिमम् अस्य देहावतनं तेन हि मत्समो नाभावहीनः को
ऽपि ह नास्तीति सूचितं ॥१॥

मधुसूदनीटीका

अध्यायाभ्यां कृतो द्वाभ्यां निर्णयः कर्मबोधयोः कर्मतत्त्यागयोर्द्वाभ्यां निर्ण
यः क्रियतेऽधुना तृतीयेऽध्याये ज्यायसी चेत्कर्मणस्ते इत्यादिनार्जुनेन पृष्टो
भगवान् ज्ञानकर्मणोर्विकल्पसमुच्चयासंभवेनाधिकारिभेदव्यवस्थया लो
केऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयेत्यादिना निर्णयं कृतवान् तथा चा
ज्ञाधिकारिकं कर्म न ज्ञानेन सह समुच्चीयते तेजस्तिमिरयोरिव युगपदसं
भवात् कर्माधिकारहेतुभेदबुद्ध्युपमर्दकत्वेन ज्ञानस्य तद्विरोधित्वात् नापि
विकल्प्यते एककार्यत्वाभावात् ज्ञानकार्यस्याज्ञाननाशस्य कर्मणा कर्तुम
शक्यत्वात् तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतेः
ज्ञाने जाते तु कर्मकार्यं नापेक्ष्यत एव यावानर्थ उदपाने इत्यत्र तथा च
ज्ञानिनः कर्मानधिकारे निश्चिते प्रथमं कर्मवशाहृष्याचेष्टारूपेण तदव
ष्टानं वा सर्वकर्मसंन्यासो वेति निर्विवादं च तृतीये निर्णीतं अर्जुनेन ततः का
ण्वशुद्धिद्वारा ज्ञानोत्पत्त्यर्थं कर्माण्यनुष्ठेयानि तमेतं वेदानुवचनेन ब्राह्म
णा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः सर्वं कर्माखि
लं पार्थ ज्ञाने परिसमाप्यत इति भगवद्वचनाच्च एवं सर्वकर्माणि ज्ञाना
र्थानि तथा सर्वकर्मसंन्यासोऽपि ज्ञानार्थः श्रूयते एतमेव प्रव्राजिनो लोक
मिच्छन्तः प्रव्रजन्ति शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मा
नं पश्येत् त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदं सत्यानृते सुखदुःखे वेदा
निमं लोकममुं च परित्यज्यात्मानमन्विच्छेदित्यादौ तत्र कर्मतत्त्यागयोरा
रादुपकारकसंनिपत्योपकारकयोः प्रयाजावघातयोरिव समुच्चयो न
संभवति विरुद्धत्वेन यौगपद्याभावात् नापि कर्मतत्त्यागयोरात्मज्ञान
मात्रफलत्वेनैककार्यत्वादतिरात्रषोडशिग्रहणाग्रहणयोरिव वि
कल्पः स्याद्द्वारभेदेनैककार्यत्वाभावात् कर्मणो हि पापक्षयरूपमदृष्टमे
व द्वारं संन्यासस्य तु सर्वविक्षेपाभावेन विचारावसरदानरूपं दृष्टमेव द्वा

रनित्यमात्मरूपं च त्वद्दृष्टं सम्यग्वा यदि नाद्य वचानानादाविवनप्रयोजनकेन यथा चाहस्या र्थदृष्ट
र्थयोरारादुपकारकसन्निपत्योपकारकयोरेकप्रधानार्थत्वविकल्पोना
स्त्येव प्रयाजावघातादीनामपि तत्प्रसंगात्तस्मात्क्रमेणोभयमप्यनुष्ठेयं
तत्रापि संन्यासानन्तरं कर्मानुष्ठाने चेत्तदा परित्यक्तपूर्वाश्रमस्य कारणारू
ढपतितत्वात् कर्मानधिकारित्वं प्राक्तनसंन्यासस्य वैयर्थ्यं च तस्यादृष्टार्थ
त्वाभावात् प्रथमकृतसंन्यासेनैव ज्ञानाधिकारलाभे तदुत्तरकाले कर्मानु
ष्ठानवैयर्थ्यं च तस्मादादौ भगवदर्पणबुद्ध्या निष्कामकर्मानुष्ठानादन्तःक
रणशुद्धौ तीव्रेण वैराग्येण विविदिषायामुत्पन्नायां सर्वकर्मसंन्यासः श्रवणा
मननादिरूपवेदान्तवाक्यविचारपर्यन्तं कर्तव्य इति भगवतो मतं तथा चोक्तं
न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुत इति वक्ष्यते च आरुरुक्षोर्मुने
स्प॰ र्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते इति योगा
रूढत्वं च वैराग्यपूर्विका विविदिषा तदुक्तं वार्तिककारैः प्रत्यग्विविदिषासि
द्धौ वेदानुवचनादयः ब्रह्मावाप्त्यै तु तत्त्यागमीप्सन्तीति श्रुतेर्बलादिति स्मृ क॰
तिश्च कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्वे तत
तो ज्ञानं प्रवर्तते मात्वयमेव कषायं पाचयित्वा च श्रेणीस्थानेषु च त्रिषु प्र
व्रजेन्मोक्षपरं स्थानं पारिव्राज्यमनुत्तमं भावितैः करणैश्चायं बहुसंसारयोनि
षु आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे तमासाद्य तु मुक्तस्य दृष्टा
र्थस्य विपश्चितः त्रिष्वाश्रमेषु को न्वर्थो भवेत्परमभीप्सतः इति मोक्षवै
राग्ये यतेन क्रमाक्रमसंन्यासौ द्वावपि दर्शितौ तथा च श्रुतिः ब्रह्मचर्यं
…वदृहाद्वनीभूत्वा
…व्रजेद्यदि वेतरथा
ब्रह्मचर्यादेव प्रव्र ४
समाप्य गृही भवेद्गृहाद्वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति त
स्मादत्र स्याद्विरक्तस्य दशायां कर्मानुष्ठानमेव तस्यैव विरक्तस्य दशायां
संन्यासः श्रवणाद्यवसरदानेन ज्ञानार्थ इति दशाभेदेनाज्ञमधिकृत्यैव कर्म
तत्त्यागौ व्यवस्थाप्यातै पञ्चमषष्ठाध्याययोरारभ्येते विद्वत्संन्यासस्तु ज्ञानबलादर्थसि
द्ध एवेति संदेहाभावान्नात्र विचार्यते तत्रैकमेव जिज्ञासुमन्तं प्रतिज्ञानार्थत्वेन
कर्मतत्त्यागयोर्विधानात्तयोश्च विरुद्धयोर्युगपदनुष्ठानासंभवान्मयाजि
ज्ञासुना किमिदानीमनुष्ठेयमिति संदिहानो हेकृष्ण सदानन्दरूप भक्तदुःख ऽर्जुन उवाच
कर्षणेति वा कर्मणां यावज्जीवादिश्रुतिविहितानां नित्यानां नैमित्तिका

गी॰ टी॰ ५॰

18

नं च सन्यासं त्यागं जिज्ञासमानः प्रतिकथयसि वेदस्तवेन पुनस्तद्धि कर्तृयो
गं च कर्मानुष्ठानरूपं मन्यसे एतमेव प्रश्नाभिप्रायं लोकमिकंतः प्रश्नं जेति न
मेतं वेदान्तवचनेन न त्यागत्यागाविविदिषंति यत्तु त्यागादिवाक्यद्वयेन निराशीः
र्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं
छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारतेति गीतावाक्यद्वयेन वा नैतत्कर्म
तं प्रतिकर्मत्यागयोर्विधानात्कर्मण्यभयानुष्ठानासंभवात् एतयोः क
र्मतत्त्यागयोर्मध्ये यदेकं श्रेयः तदेतयोस्तत्समन्यसे कर्मवा तत्त्यागं वा तन्मे ब्रू
हि सुनिश्चितं तव मतमनुष्ठानाय १ [illegible] ॥

[illegible]नंददीपिका

ॐ श्रियो वासे सेहे दावनकृतनिवासे कृतिपदे कलावासावासे स्वनरस्था
ने वा वासजलधौ महोल्लासोल्लासे समजनि हृदिवासे गुणनिधिं प्रतिष्ठावासे वे
देनिरवधि विलासे मधुरिपुं ॥ अध्यायाभ्यां कृतोऽद्वाभ्यां निर्णयः कर्मबो
धयोः कर्मतत्त्यागयोर्द्वाभ्यां निर्णयः क्रियते पुना २ तत्तोपदेशितोध्यायेवि
भागः कर्मबोधयोः सूत्रापि कारिकं कर्म न सम्मन्नीयते धिया ३ परस्प
रविरुद्धत्वान्नेजस्तिमिरयोरिव ऐकार्थ्यी भावतो नापि कर्मयोगो विकल्प्यते ५
धीकार्याज्ञानवाधोद्रिक्तं शोकेन कर्मणा नाप्यतेतस्य मुत्यं ज्ञानेन क
र्मफलं मनाक् ४ तथा च ज्ञानिनः कर्मानधिकारो विनिश्चितो श्रावयन्
प्रातस्तस्य कर्मानुष्ठानमस्तु वा ५ कर्मत्यागोस्तु वे त्येवं चतुर्थे निर्णयं कृ
तः वित्तशुद्ध्यात्मविज्ञानप्राप्तये ज्ञानिनः सदा ७ अनुष्ठेयानि कर्माणि न
तत्यागः प्रशस्यते सर्वकर्मपरित्यागो ज्ञानार्थः श्रूयते तथा ८ एवमेवेतिवा
क्यादौ संन्यासोपि प्रशस्यते त्यजत्येव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदं ९ प्रया
जादिवदेवेदं कर्माराडुपकारकं अवघातवत्त्यागः संनिपत्योपकारकः ५
तयोः समुच्चयो नास्ति विरुद्धत्वेन सर्वथा न वा तयोर्विकल्पोस्तु ज्ञानमात्र
फलत्वतः ११ द्वारभेदेन चैकार्थ्यी भावात्सा च निरूप्यते कर्मणा चलयाद्दृष्ट
मेव द्वारं विनिश्चितं १२ संन्यासस्य तु विक्षेपाभावहेतुतयामतो दृष्टद्वार
मेवास्ति विकल्पो नाप्यतस्तयोः १३ तस्माद्बुद्धिं कर्मणोतं तं सांख्ये यमादरा
त् संन्यासानंतरं कर्मानुष्ठानं नैव संभवि १४ त्यक्तस्य पुनरादाने प्रत्यवायः

तितोभवेत् आरुरुक्षोर्नैष्किं कथं मे यस्तस्य चावतेशुनः १५ प्रायश्चित्तेन
पश्यपापक्षयेन शुद्धेऽत्मन्यात्मदृ तस्मादादावनुष्ठानात्कर्मणामीश्वरार्पणा
त् १६ चित्तशुद्धा समस्तीव्रवैराग्येणाविवेकिनः जिज्ञासायां दृढायां तु सं
न्यासः सर्वकर्मणां १७ श्रवणाद्यात्मवेदांतविचाराय विधीयते इत्येवं नि
श्चितं भाति श्रीमद्भगवतो मतं ज्ञतो विनिश्चितं ह्येवं सूत्रवेदविदां गिरः प्र
त्यागविविदिषा सिद्धैर्वेदानुवचनादयः ब्रह्मावाप्त्यैतु तत्यागमीप्संतीतिश्रु
तेर्बलात् इत्युक्तं संप्रदायज्ञैर्वार्तिके श्रीसुरेश्वरैः २० कषायपक्तिः कर्माणि
ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते २१ भाषितेः क
र्मणोऽध्यायेवह्नं संसारपातिषु आसादयति शुद्धात्मा मोक्षं वा प्रथमाश्रमे
तमासाद्य तथा शक्तः परमार्थविपश्चितः त्रिषाश्रमेषु कोन्यो वा भवेत्तमम
भीप्सिते २२ इत्येवं मोक्षधर्मे श्रीव्यासेनोक्तं महर्षिणा तस्मादैराग्यपर्यंतं
कर्मानुष्ठानमुच्यते २४ विरक्तानां दशायां तु संन्यासो ज्ञानसाधनं ततो न
पतितः सैवकर्मतत्यागयोर्विधिः २५ सम्यक्तत्वविदो नास्ति चोदना कापि वै
दिकी लौकिकी वा यतस्तस्य हातकृत्यतया हरिः कृत्याभावं स्वयं प्रूवंमा
वदन्निगमावपि विद्वत्संन्यासमाख्यानेत्सिद्धं पवार्थितो यतः संदेहाभावत
स्तस्मात्तद्वचनार्हविचार्यते तत्रैकमेव जिज्ञासुमत्तं मत्वात्मलब्धये २८ क
र्मतत्यागयोः प्राप्तो विधानात्तत्रवाज्ञनः विरुद्धयोरनुष्ठाने युगपन्नैव सं
भवेत् २९ यथा जिज्ञासतेदानीं किमनुष्ठेयमादरात् इतिसंशयवानेवमुवा
च श्रीहरिं प्रति ३० यावज्जीवादिवेदोक्तकर्मणां त्यागमित्यपि जिज्ञासक
पपक्षे प्रतिवेदगिरास्वयं ३१ नहि कश्चिद्शुनः कर्मानुष्ठानं च प्रशंससि प
तमेवेति वेदेन निराशीरिति च स्वयं ३२ नमेतमिति वेदेन ऊरुकर्मेति च स्व
यं तयोरेकेन युगपत्करणाद्दैवं टैदवयोः ३३ कर्मतत्यागयोर्मध्ये यदेकं मम
सेवकं तन्मश्रृति निश्चितं ब्रूहि मेऽनुष्ठानाय येन मतं ३४ सदानंदस्वरूपो मिर
क्तसभक्तानिकषेणा संप्रत्ययं संशयान्मेनिज्ञानेदेन पद्मभो ३५ १ ॥
गीतार्थदीपिका
तृतीयेध्यायेलोकेस्मिन् द्विविधानिष्ठेति विभिन्नाधिकारिकं निष्ठाद्वयं प्र
स्तुत्य न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते इत्यादिना कर्मनिष्ठायाः ज्ञा
ननिष्ठांगत्वेनमयसमानियंयेनानुष्ठेयत्वमुक्तं कर्मण्येवाधिकारस्ते इत्या

तितोभवेत् आरूढोनैष्ठिकं धर्मं यस्तस्मात्प्रच्यवते पुनः १५ प्रायश्चित्तं न
पश्यामि येन शुद्ध्येत्स आत्महा तस्मादादावनुष्ठानात्कर्मणामीश्वरार्पणा
त् १६ चित्तशुद्धिमवाप्तस्तु वैराग्येण विवेकिनः जिज्ञासायां दृढायां तु सं
न्यासः सर्वकर्मणां १७ श्रवणाद्यात्मवेदांतविचाराय विधीयते इत्येवं नि
श्चितं भाति श्रीमद्भगवतो मते अतो विनिश्चितं ह्येवं श्रुत्वा वेदविदां गिरः प्र
त्यग्विविदिषासिद्ध्यै वेदानुवचनादयः ब्रह्मचर्याद्वा स्यैतत्त्यागो गार्हस्थ्येतीति श्रु
तेर्बलात् इत्युक्तं संप्रदायज्ञैर्वार्तिके श्रीसुरेश्वरैः १८ कषायपक्त्याच विनाच
श्रेणीष्यातेषु च विश प्रव्रजेत्तु परं स्यात्ते पापिब्रात्यसमस्तु मे २१ भाषितैः क
षायैर्ध्यायेन्बहुसंसारयोनिषु आसादयति शुद्धात्मा मोक्षं वा प्रथमाश्रमे २२
तमासाद्य तथा क्रस्य दृष्टार्थस्य विपश्चितः त्रिष्वाश्रमेषु कोन्वर्थो भवेत्परम
भीप्सिते २२ इत्येवं मोक्षधर्मे श्रीव्यासेनोक्तं महर्षिणा तस्माद्वैराग्यपर्यंतं
कर्मानुष्ठानमुच्यते २४ विरक्ततादशायां तु संन्यासो ज्ञानसाधनं ततोत्र
मपि ह्यस्यैव कर्मत्यागयोर्विधिः २५ समुच्चयस्तु विरोधान्नास्ति चोदनाकापि वै
दिकी लौकिकी वा यतस्तस्मात्तदन्यत याहृदिः कृत्याभावं स्वयं पूर्वमा
वरन्निगमावपि विरुद्धं संन्यासमात्मस्ते सिद्धयवार्थितो यतः संदेहाभावत
स्तस्मात्स वचनाद्विचार्यते तदेकमेव निश्चित्य ममत्तं संन्यासमलब्धये २६ क
र्मतत्त्यागयोः साम्ये विधानाद्वेदवाक्येनः विरुद्धयोरनुष्ठाने युगपन्नैव सं
भवेत् २७ यथा निन्दा क्वचिदानीं किमवश्यमादरात् इतिसंशयवानेव मनुवा
च श्रीहरिं प्रति २८ यावज्जीवादिवेदोक्तकर्मणां त्यागमिच्छति निन्दा संक
ल्पसंज्ञं प्रतिवेदगिरा स्वयं ३१ न हि कर्हिचिदेवनः कर्मानुष्ठानं तु सम्यगस्ति ए
तमेवेतिवेदेननिराशीरितिवस्त्वयं ३२ तमेतमितिवेदेनज्ञात्वाकर्मेति चस्व
यं तयोरेकेन युगपत्करणात् द्वयोर्द्वयोः ३३ कर्मतत्त्यागयोर्मध्ये यदेकं मम
सेवदं तन्मां ब्रूहि निश्चितं श्रुद्धिमनुष्ठानाय तेनमते ३४ सदानंदस्वरूपोपास्त्र
क्लमभक्तार्तिकर्षणः संक्षेपत्वसंशयात्तिमेनिजानंदेनपस्वमो ३५ १ ॥

गीतावंदे टीका

ततीयेध्यायेलोकेस्मिन्द्विविधानिष्ठेतिविभिन्नाधिकारिकं निष्ठाद्वयं प्र
स्तुतं कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते इत्यादिना कर्मनिष्ठायाः ज्ञा
ननिष्ठांगत्वेनमयमानिर्वापितानुष्ठेयत्वमुक्तं कर्मणोपाधिकारस्तेइत्या

गी॰
टी॰
पं॰

1

दिना चतुर्थे तु तत्त्वज्ञसमग्रदर्शिनैः कृतमपि कर्माकृतमेव भवति ज्ञानेन क
र्त्तृत्वादिबाधात् अतस्तेष्वेव चेष्टावत्कर्मैवाकर्त्तव्यं संन्यासो वा कर्त्तव्यः स्यान्ना
स्य यायाप्रोक्ते अथेदानीं पंचमषष्ठयोः ज्ञानिनाज्ञानार्थिना वैराग्यात्यतेः आ
क्रमेणैवानुष्ठेयं संपन्ने तु वैराग्ये दृष्टविक्षेपनिवृत्तये कर्मसंन्यासं कृत्वा ज्ञा
१५ नोनिष्ठेयोगोनुष्ठेय इत्युच्यते तत्र चतुर्थे त्यक्तसर्वपरिग्रह इति संन्यासः यो
गमास्थितिष्ठेति कर्मयोगश्चैकेनोक्तमिति विहितः न चैतयोः स्थितिगतिवद्युगा
पदेकेन मयानुष्ठानं कर्तुं शक्यते परस्परविरुद्धत्वादिति मत्वानोः र्जुन उवा
च संन्यासमिति हे कृष्ण पापकर्षण मे मद्यं ज्ञानार्थिने संन्यासं कर्मयोगं वे
ति द्वयं परस्परविरुद्धं कथयसि संन्यासमिकयपयासिऽनविस्मनेन प्राप्तापित्यावेद
कर्त्तृद्वयं विहितमस्तीति गम्यते तथा च श्रुतिस्मृती भवतः एतमेव प्र
व्राजिनो लोकमिच्छन्तः प्रव्रजन्ति संसारमेवं निःसारं दृष्ट्वा सारदिदृक्षया प्र
व्रजन्त्यकृतोद्वाहाः परं वैराग्यमास्थिता इति च तथा तमेतं वेदानुवचनेन ब्रा
ह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति महायज्ञैश्च यज्ञैश्च ब्रा
ह्मीयं क्रियते तनुरिति च ब्राह्मी ब्रह्मदर्शनयोग्या अतः एतयोः श्रुतिविहित
त्वेन प्रशस्तयोर्मध्ये एकं श्रेयः प्रशस्ततरं यत्तन्मे सुनिश्चितं ब्रूहीति प्रश्नः १

श्रीधरी टीका

अथैवं सांख्ययोगयोः पूर्वाध्यायद्वये नार्थेऽवधारितेपि फलस्पृहां विना
ज्ञानेन समुच्चितं नित्यनैमित्तिककर्मानुष्ठानं श्रेयस्साधनं यदुपदिष्टं त
स्य चित्तशुद्धिनिरोधं विना उक्तत्वेन तदुपायभूतस्याभ्यन्तरस्य सं यम
योगस्य मनन्तराध्याये तत्तु स्वयं योगसंसिद्धः कालेनात्मनि वि
न्दतीति भगवताय उद्देशकृतस्तत्र योगसमन्वितकर्मणां ज्ञानसंमिश्रत्वसंश
यमिति पुनरपि समुपदिष्टयोर्योगसंन्याससशास्त्रयोस्तात्पर्यानवधारणा
द्दत्तमाश्रदधानश्च संशयात्मा विनश्यतीति समसत्यत्रतासोद्धरनिश्चयार्थमर्
जुन उवाच योगसंन्यस्तकर्माणमिस्तकापुनर्योगमातिष्ठोत्तिष्ठेति चास
त् तदेतयोः कर्मसंन्यासकर्मयोगयोर्मध्ये यः श्रेयानेकस्तन्मे निश्चितं
दूर्वनिश्चितमापुनरूपदेशेन संशयितस्य मे सम्यक्निःसत्वीकृत्य ब्रूहि १

रामकण्ठी टीका

ॐ अथ द्वितीयाध्यायपरिसमाप्तौ बुद्धिप्रशंसायां वाक्यानि प्राक् कर्मयोग
वचनानि श्रुत्वा तेषां च परस्परविरुद्धत्वं मन्यमानेनार्जुनेन ज्यायसी चेत्क
र्मणस्ते मता बुद्धिर्जनार्दनेत्यादिना प्रश्नो यः कृतोभूत् स भगवता यथाव
न्निर्णीत एव तृतीये तथापि चतुर्थाध्यायपरिसमाप्तौ योगसंन्यस्तकर्माणं
ज्ञानसंछिन्नसंशयमिति अत्र योगसंन्याससशब्दौ श्रुत्वा संन्यासं त्यागं मन्यमा
नः पुनरुत्पन्नसंशयोऽर्जुन उवाच ॥ हे कृष्ण कर्मणां त्यागं प्रशंससि त्वं पुन
स्तेषामेव योगमनुष्ठानेन स्वीकारं त्वं च तदेतयोर्विरुद्धयोः कर्मत्याग
स्वीकारयोः संन्यासयोगशब्देनोक्तयोर्यौगपद्येनानुष्ठानं तावन्न संभवति
अतो द्वयोर्मध्यादेकं संन्यासो वा योगो वा यदेव श्रेयान् प्रशस्यतरस्त्वमे निः
सन्देहतया ब्रूहि [illegible] ॥

तासिकी [illegible] टीका

एवं यस्त्वात्मरतिरेव स्यादित्यादिना पूर्वोक्तं कर्मणो नावश्यकत्वं संन्या
सशब्दार्थं मत्वा नः तथा योगसंन्यस्तेति । तमेवानुसन्धानो योगमाति
ष्ठेति कर्मयोगं च श्रुतवांस्तदेतयोरेकानुष्ठानविषययोः संन्यासकर्म
योगयोः परस्परविरोधं मन्यमानोऽतएव सन्दिग्धचेता अर्जुन उवाच संन्यासेति
हे कृष्ण कर्मणां संन्यासं त्यागं यस्त्वात्मरतिरेव स्यादित्या [illegible] दिना च पु
नस्तेषां योगमनुष्ठानेन स्वीकारं च योगमातिष्ठेत्यादिना कथयसि तदे
तयोः कर्मसंन्यासयोगयोः विरुद्धस्वभावयोरेकस्य यौगपद्येनानुष्ठा
नासंभवः अतएतयोर्मध्यादेवानुष्ठेयतया श्रेयः प्रशस्यतरं तथा सु
निश्चितं तवाभिप्रेतं तन्मे ब्रूहि उपदिश यत्सलब्धात्मबोधमात्रस्त्वत्ज्ञानया
गाधिरोहसिद्धये यावद्विकल्पसंभवे कर्मयोगो वश्यानुष्ठेयः स एव पुनस्तो
तथारापि भूढः [illegible] ॥ १ ॥

पंचोलीटीका

कर्मिणः कर्मयुः प्रथमे ज्ञानाग्निदग्धकर्माणं शारीरं केवलं कर्मय
दृच्छालाभसंतुष्टो ब्रह्मार्पणं ब्रह्म हविरित्यादिवचनैः । सर्वकर्मसंन्या

गी· समग्रज्ञानाच्छिन्नैनेसंशयं योगमातिष्ठेत्युक्तेन वचनेन कर्मयोगमवो
पं· चत् उभयोश्च स्थितिगतिवत् परस्परविरुद्धयोः एकेन युगपदनु
टी· ष्ठातुमशक्यत्वात् कालभेदेनानुष्ठानविधानाभावादिति अस्मा
न्तरकर्तव्यताप्राप्तौ एकस्य प्रश्नस्यान्तरस्य बुभुत्सया अर्जुन उवाच
संन्यासमिति हे कृष्ण कर्मणां संन्यासं शास्त्रीयाणां कर्मणां त्यागं
पुनः योगं तेषां कर्मणां ईश्वरार्थं कर्तव्यतां शंससि कथयसि एतयो :
यदेकं श्रेयः तन्मे मम सुनिश्चितं त्वं वा अभिप्रेतं ब्रूहि [illegible]
[illegible] १ ॥

10

भावीरसमिद्धायिनी ॥

श्रीकार्तवीर्यार्जुनाय नमः ॥ अथ योगसंन्यस्तकर्माणमित्यत्र
प्राक्व्याख्यातार्थानुसारेण विहितनिषिद्धत्व प्रकारद्वयभिन्नकर्म
प्रतियोगिकौ योगसंन्यासशब्दौ भगवतोक्तौ श्रुत्वा ततोऽन्यथैव तत्
प्रतिपत्तेरेकेषामेव तेषां परस्परविरुद्धत्वाद्युगपत्तदसंभवं मत्वा
संजातसंशयोऽर्जुन उवाच संन्यासमिति हे कृष्ण कर्मणां प्रारभ्यमा
णानां संन्यासं त्यागं पुनस्तेषामेव योगमनुष्ठानेन स्वीकारं शंससि
स्तौति एवं किं वदसि नचैतौ युगपत्संभवतः परस्परविरुद्धत्वात्
ततश्चैतयोः संन्यासयोगाभिधेययोस्त्यागस्वीकारयोर्मध्याद्यदेकं
त्यागलक्षणं स्वीकारलक्षणं वा श्रेयः प्रशस्यतरं कल्याणसाध
नं च भवेत् तदेवं सुनिश्चितं निःसंदेहं तया मे मह्यं ब्रूहि १॥

नवुनाथ

तृतीयाध्यायोक्तमेव कर्मयोगं प्रपंचयत्यनेनाध्यायेन य
दृच्छालाभसंतुष्ट इत्यादिना संन्यासं ऊरुकर्मैवेत्यादिना
कर्मयोगं च नियमनादिना सकललोकधारणात्कृष्णः त
द्वाक्यं यतः कर्षति देवर्षीन् नियम्य सकलं जगत् अतो वद
ति ब्रह्मवादिन इति महाकार्मे संन्यासशाङ्क

र्थं भगवानेव वक्ष्यति अयं प्रश्नाशयः यदि संन्यासः श्रे-
योधिकः स्यात्तर्हि संन्यासस्यैवाद्विरीयिपुइमिति नायं
संन्यासो यत्याश्रमः इह त्यागात्ते संन्यासस्यान्यन्नैव-
गरीयसीति ब्रुवनात् तानि वा एतान्यवराणि तपांसि
न्यास एवात्यरेचयदिति च संन्यासस्तु गरीयान्योनिष्क्रि-
यात्वः सधर्मकः न तस्मादुत्तमो धर्मो लोके कश्चन वि-
द्यते तदुक्तोपि द्वियञ्छेत हृद्रस्योनयामिकः मद्भक्ति
श्च विरक्तिस्तदधिकारो निरूप्यते यदाधिकारो भवति ब्र-
ह्मचार्यपि तद्भजेत् इति नारदीये ब्रह्मचर्यादेव प्रव्रजेद्यद-
हरेव विरजेदिति च संन्यासब्रह्मरीयवै प्रीतिर्मभगरीयसी
येषामनधिकारो न तेषां कर्मेति निश्चयः त्यादेश्चवासे ॥
अतो नाशाश्रमः संन्यासउक्तः संन्यासपाहार्थमाह ॥१॥

11

भाषा अनुवाद

कर्मयोग औ संन्यास योगमे अर्जुन को संशय निवारन करिके अब जि
तेंद्रियों की मोक्षपरता श्री भगवान श्रीमद्भगवद्गीता के पंचमे अध्याय
मे कहैंगे। अज्ञान से उत्पन्न भई जो संशय तिस को ज्ञान खड्ग से
छेदन करिके निष्काम कर्मयोग करो यह जो भगवान ने पुनर्वार
कर्म करने को कहा तो पूर्वापर कहे आगू पीछू जो कर्मत्याग औ
कर्म करने को भगवानकी आज्ञा तिस को विचारतेहुये अर्जुन क
हते हैं कि हे कृष्ण ३ अध्याय के १७ श्लोक मे जो आपने कहा कि
यस्त्वात्मरतिरेव स्यात् और ४ अध्याय के ३३ श्लोकादि मे कहा कि
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते यह तत्वज्ञानी को सर्व क
र्म का त्यागरूप संन्यास ही कहा और ४ अध्याय के ४२ श्लोक मे।
तस्मादज्ञानसंभूतं इत्यादि ज्ञानरूप असि से संशय छेदन करिके उठो
और युद्ध करो यह कहि फेरि कर्मयोग की आज्ञा देते हैं परन्तु ये
दोनो परस्पर विरुद्ध हैं अर्थात् कर्म का करना और छोड़ना यह ए
क पुरुष को एक ही काल मे असंभव है सो हे कृष्ण संन्यास अथ
वा कर्मयोग इन दोनो मे जो करने से हम कृतार्थ होय सो एक प्र
कार निश्चय करिके कहो और कभी संन्यास कभू कर्मयोग कहि
कहि हमे सन्देह मे बार बार न डालो १

दोहा

कर्मत्याग संन्यास अरु कह्यो कृष्ण फिर योग दोनो मे जो सुभ
ट मोहि निश्चय कहो सुभोग १॥

12

श्रीभगवानुवाच संन्यासः कर्मयोगश्च निःश्रेयस
करावुभौ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशि
ष्यते २॥

शांकरभाष्यं

स्वाभिप्रायमाचक्षाणो निर्णयाय श्रीभगवानुवाच संन्यास इति संन्यासः
कर्मपरित्यागः कर्मयोगश्च तेषामनुष्ठानं तावुभावपि निःश्रेयसकरौ
निःश्रेयसं मोक्षं कुर्वाते ज्ञानोत्पत्तिहेतुत्वेन उभौ यद्यपि निःश्रेयसकरौ
तथापि तयोस्तु निःश्रेयसहेतोः कर्मसंन्यासात् केवलात् कर्मयोगो
विशिष्यते इति कर्मयोगं स्तौति २॥

आनंदगिरिकृतटीका

प्रश्नमेवमुत्थाप्य प्रतिवचनमुत्थापयति स्वाभिप्रायमिति निर्णयाय त
द्द्वारेण परस्य संशयनिवृत्त्यर्थमित्यर्थः एवं प्रश्ने प्रवृत्ते कर्मयोगस्य सौक
र्यमभिप्रेत्य प्रशस्यतरत्वमभिधित्सुर्भगवान् प्रतिवचनं किमुक्तवानित्या
शंक्याह संन्यास इति उभयोरपि तुल्यत्वशंकां वारयति तयोस्त्विति कथंत
र्हि ज्ञानस्यैव मोक्षोपायत्वं विवक्ष्यते तत्राह ज्ञानोत्पत्तीति तर्हि द्वयोरपि प्रश
स्यत्वमप्रशस्यत्वं वा तुल्यमित्याशंक्याह उभाविति ज्ञानसहायस्य कर्मसं
न्यासस्य कर्मयोगापेक्षया विशिष्टत्वविवक्षया विशिनष्टि केवलादिति २

स्वामिकृतटीका

प्रश्नोत्तरं श्रीभगवानुवाच संन्यास इति अयं भावः नहि वेदांतवेद्यात्मत
त्त्वविदं प्रति कर्मयोगमहं ब्रवीमि यतः पूर्वोक्तेन संन्यासेन विरोधः स्यात्
अपि तु देहात्माभिमानिनं त्वां बंधुवधादिनिमित्तशोकमोहादिकृतमेनं सं
प्रायं देहात्मविवेकज्ञानाभिमानाद्धितापमात्मज्ञानोपायभूतं कर्मयोगा
मातिष्ठेति ब्रवीमि कर्मयोगेन शुद्धचित्तस्य त्वात्मतत्त्वज्ञाने जाते सति तत्प
रिपाकार्थं ज्ञाननिष्ठांगत्वेन संन्यासः पूर्वमुक्तः एवं सत्यंगप्रधानयोर्वि
कल्पायोगात् संन्यासः कर्मयोगश्चेत्येतावुभावपि भूमिकाभेदेन सम्य
कृतावेव निःश्रेयसं साधयतः तथापि तयोर्मध्ये कर्मसंन्यासात्सकाशात्क
र्मयोगो विशिष्टो भवति २॥

गी॰ टी॰ प॰

13

पैशाचभाष्यं

भगवानर्जुनस्याभिप्रायं विदित्वानुवाच संन्यासः कर्मयोगः श्रेया
न्कर्मयोगो ज्ञानफलकत्वेन विसृष्टं विधानात्तु कर्म्मणामसभ्यर्थ्यसिद्धिर्वि
दितिमानवशति २॥

रामानुजभाष्यं

संन्यासः ज्ञानयोगः कर्मयोगश्च ज्ञानयोगशक्तस्याप्युभौ निरपेक्षौ निःश्रे
यसकरौ तयोस्तु कर्मसंन्यासात् ज्ञानयोगात्कर्मयोग एव विशिष्यते २

अभिनवगुप्तकृतटी॰

तावेकाभिहितावपि तत्भौ मिलितौ निःश्रेयसे हेतुः योगेन विना संन्या
सो न संभवतीति योगस्य विशेषः २॥

श्रेयोभयोरपि एकश्रेष्ठत्वे एकं श्रे परमार्थप्रपा टी॰ यो ब्रूहीति प्रश्ने भगवानाह संन्यास इति

संन्यासं कर्मयोगश्चेत्युभावपि कारिभेदेन निःश्रेयसकरौ भवतः नह्येकं
प्रत्युभयोपदेशः प्रतीयते न ह्यात्मतत्त्वं प्रति कर्मयोगोपदेशः किंतु देहा
त्माभिमानिनं भवादृशं वधनिमित्त शोकाकुलं प्रति योगमाविष्टेति प्रवी
ति कर्मयोगेन शुद्धचित्तस्यात्मतत्त्वज्ञानेच्छा तिकर्मसंन्यासः संभवति एव
मुभावपि भूमिकाभेदेन निःश्रेयससाधनमवितावेव तथापि तयोर्म
ध्ये प्रस्तुतकर्मसंन्यासात्कारणात्कर्मयोगो विशिष्यते विशिष्टो भवति २

वनमाली टीका

संन्यासः कर्मयोगश्चेत्युभौ मातरूपतिः श्रेयसकरौ एकैकेनैवावस्थाभेदे
नानुष्ठेयौ तयोः कर्मसंन्यासादपक्वज्ञानेन पुरुषेणाकृतात्फलेच्छाविधा
यकर्मयोगो विशिष्यते २॥

ऊरुमवैजयन्ती

एवमर्जुनेन पृष्टः सर्वज्ञो देवकीनंदनो भगवांस्तदुत्तरमुवाच संन्यास इ
ति संन्यासः कर्मत्यागो ज्ञानयोग इत्यर्थः च पुनः कर्मयोगः उभौ ज्ञानक
र्मयोगौ ज्ञानयोगनिष्ठस्यापि समुत्तानिःश्रेयसकरौ मोक्षकरौ भवतः
एवमेवं तथापि तयोर्ज्ञानकर्मयोर्मध्ये कर्मसंन्यासात् ज्ञानयोगात्कर्म
योगः कर्मकरणमेव विशिष्यते विशेषो भवतीति शेषः न यद्यपि प्रमात्मया
थात्म्यज्ञानस्यसमुत्तेः कर्मकरणमप्रयोजकं तस्य सर्वमेवान्नष्ककरणं शुद्धे
तान्नयापि ज्ञानदार्ढ्यार्थं चित्तदोषनिवारणार्थं च फलाभसंधानरहितं सा

नगर्भकं सदायाथनललतणां स्ववर्णाश्रमोचितं नित्यनैमित्यादिकं कर्म
कर्तव्यमेव एवंभूतस्य कर्मणस्तु न लिप्तिरादिव ज्ञानविनाभावात्तस्यत्र
रस्य ज्ञानसहायत्वमेवस्यादिति ध्वनितम् २॥ रोधि

+एवमर्जुनस्य प्रश्ने नउत्तरं॥

मधुसूदनी टीका

निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनौ तयोस्तु कर्मसंन्या
सात् अनधिकारिकृतात् कर्मयोगो विशिष्यते श्रेयान् अधिकारसंपादकत्वेन २
[illegible]

सदानंदी टीका

एवं प्रश्ने अर्जुनस्य श्रीभगवानुत्तरं वचः निःश्रेयसकरौ कर्मसंन्यासौ मोक्षप्राप्ति
संमतौ १ मोक्षोपयोगिनौ ज्ञानोत्पत्तिहेतुतया तु उभौ तयोस्तु कर्मसं
न्यासात् अशुद्धसत्त्वकर्तृकात् २ शुद्धिसंपादकत्वेन कर्मयोगो विशिष्यते

नीलकंठी टीका

प्रश्नोत्तरं भगवानुवाच संन्यास इति निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत
या तथापि कर्मसंन्यासात् अविरक्तकृतात् कर्मयोग एव विशिष्यते चित्त
शुद्धिद्वारा वैराग्यादिहेतुत्वात् २॥

आनंदी टीका

यद्यपि न कर्मणा न प्रजया धनेन त्यागेनैके नामृतत्वमानशुरित्यादिश्रु
त्यर्थानुसारं केवलज्ञानिभिः कर्मसंन्यासो निःश्रेयसकरः प्रोक्तः तमे
तमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा
नाशकेनेति कर्मयोग एव केवलकर्मिष्ठस्य निःश्रेयसकरः प्रोक्तः
तथापि विचार्यमाणे कर्मसंन्यासात् कर्मयोगो विशिष्यते कर्मणां संन्या
से हि केवलज्ञानमनुष्ठेयं तच्च ततो भूय इव ते तमो य उ विद्यायां रता इति
प्रत्यवायश्रवणान्निषिद्धम् विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति श्रुति
सिद्धादुभयोः समुच्चयात् कर्मयोगो विशेषसिद्ध एव २॥

रामकंठी टीका

अथ शब्दमात्र विशेषमात्रजनितं संशयं अर्जुनस्य परिहर्तुं भगवानुवाच॥
सत्यं द्वावप्येतौ कर्मणां संन्यासयोगौ त्यागस्वीकारौ भिन्नानुष्ठातृपुरुषानु
ष्ठीयमानौ अपवर्गलक्षणाभ्युदयसंपादकौ भवतः यतः केवलज्ञानवादिनः
सर्वेषां कर्मणां त्यागेनापवर्गमिच्छंति समुच्चयवादिनस्तु कर्मणा
मत्यागेनानुष्ठानेनेति द्वयोरपि फलश्रुतिरस्ति किंतु तयोः संन्यासयोगयो

गी
पं· 14

मंध्यात्कर्मसंन्यासात्त्यागात्तमपेक्ष्य कर्मयोगो विहितकर्माचरणं विशिष्यते
उक्तं वक्ष्यमाणहेतुपर्यालोचनया प्रकृष्यते [illegible] २ ॥

+कर्ममूलभूतविकल्पत्तयेण स्व लासिकी [redacted] टीका यमेव संन्यासाधिकारमनयासेनोपगत

श्रयेन उजरेश्री वानुवाच+ वः समस्य ये संन्यासः कर्मणामावश्यकतया तत्तुष्ठाने कर्मयोगश्च कर्म
णां योगः स्वस्वरूपमन्यवमर्षी विनाभावेनानुष्ठानम् एतावुभावपि निः
मेण श्रेयसकरौ उक्तमोक्षसाधकौ तव्यतिरेके किं तु तयोर्मध्ये कर्मसंन्यासात्म
काज्ञात्कर्मयोगो विशिष्यते योगेन विना संन्यासो न भवतीति वक्ष्यमाणाः
योपपत्त्याश्रेष्ठो भवति २ [illegible]
[illegible] २ ॥

+स्वाभिप्राय माचक्षाणो निर्णयाय श्रीभगवानुवाच पैवोली टीका

+संन्यासः इति संन्यासः कर्मणां त्यागः च पुनः कर्मयोगस्तेषां कर्म
णामनुष्ठानमुभौ निःश्रेयसकरौ मोक्षसाधकौ तत्पुनस्तयोः कर्मसं
न्यासात् केवलाज्ञानरहितात् कर्मत्यागात् कर्मयोग ईश्वरार्थकर्म विशिष्य
ते उत्कृष्टं भवति २ ॥

धनपतिसूरिकृत भाष्योत्कर्षदीपिका —

प्रगावीरसमिद्धो थिनी ॥

अत्र निश्चयं भगवानुवाच संन्यास इति अयमभिप्रायः एककर्मप्र
तियोगिकावेककालीनौ च संन्यासयोगौ न मयोक्तौ किं तु प्रारभ्यमा
णायुद्धादिकर्मप्रतिरोधककर्णभीष्ममहं संख्ये इत्यादि रूपनिषिद्धमा
नसिककर्मप्रतियोगिकः संन्यासो निश्चयप्रयोजितआरंभपूर्वकाली
नः प्रारभ्यमानस्वधर्मभूतयुद्धादिविहितकर्मप्रतियोगिको योगश्च तत्
समनंतरकालीन एवेति भिन्नप्रतियोगिकत्वात् पूर्वोत्तरलक्षणभावि
त्वाच्च तयोः संभवे सिद्धे द्वावप्येतौ श्रेयस्करौ किं तु तयोस्त्यागस्वीकारयोः
केवलयोर्मध्यात्कर्मणां प्राक्कृतानां प्रारभ्यमाणविहितकर्मांतरायभू
तानां मनःसंकल्पात्मकानां निषिद्धानां संन्यासस्त्यागस्तस्माद्धेतोरनंत
रं वा यः कर्मयोगो विहितसमरकर्मानुष्ठानलक्षणः स विशिष्यते प्र
शस्यतरो भवति भाविसमाप्तिमत्त्वात् उक्तलक्षणसंन्यासरहितेन हि प्रा
रब्धं कर्म न समाप्यते स्नेहादिना ततो निवृत्तेः सद्यो भावित्वादिति एतेन च
प्राक्तृचितं हरेण स्यवरं कर्मेति विहृतं २ ॥

सपुमाष्य ॥

२॥

15

भाषा अनुवाद

अर्जुन को इस प्रश्न का उत्तर श्रीभगवान कहते हैं कि हे अर्जुन हम वेदान्ती तत्वज्ञानी के प्रति कर्मयोग करना नहीं कहते हैं क्यों कि तत्वज्ञानी को कर्मत्याग के उपदेश से विरोध पड़ेगा परन्तु देह आदि मे आत्मअभिमानी तुम कौजो बन्धुवध निमित्तक शोक मोह से उत्पन्न संशय तिस को स्थूल शरीर औ आत्मा का विवेक रूप ज्ञान खड्ग से छेदनके अनन्तर तत्वज्ञान उत्पन्न होनेका उपाय रूप जो निष्काम कर्मयोग सोई अनुष्ठान करने को कहाहै देखो निष्काम कर्म करने से चित्तशुद्ध होके तत्वज्ञान उत्पन्न होने पर ज्ञानके परिपाकार्थ ज्ञान निष्ठा का अङ्ग भूत कर्मके त्याग को मैने कहा है परन्तु ज्ञानमार्ग मे आरूढ़ पुरुष को कर्मका त्याग और अनारूढ़ पुरुष को भगवदाराधन निःकाम कर्मयोग कहा सोई कहते हैं कि संन्यास औ कर्मयोग ये दोनो निःश्रेयस मुक्ति के । करने वालेहैं परन्तु दोनोके बीच संन्याससे कर्मयोग ही अधिक है जिस हेतु कर्मयोग सेज्ञान प्राप्त होके तब संन्यास अर्थात कर्मका त्याग विहित है और पहिले नहीं २॥

दोहा

संन्यासअरु कर्मयोग जोहै शुभदायक दोय तामेकर्मसंन्या
सतेश्रेष्ठकर्मयोग है सोय २॥

16

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति निर्द्वंद्वो
हि महाबाहो सुखं बंधात्प्रमुच्यते ३॥

शांकरभाष्यं

कस्मादित्याह ज्ञेयो ज्ञातव्यः स कर्मयोगी नित्यसंन्यासीति यो न द्वेष्टि किंचि
न्न कांक्षति दुःखसुखे तत्साधने चैवंविधो यः कर्मणि वर्तमानोपि स नित्य
संन्यासीति ज्ञातव्य इत्यर्थः निर्द्वंद्वो द्वंद्ववर्जितो हि यस्मान्महाबाहो सुखं बंधा
दनायासेन प्रमुच्यते ३॥

आनंदगिरिकृतटीका

कर्मद्वैविध्यकारणं प्रसिद्धं ततः कथं निःश्रेयसकरं स्यादिति शंकते कस्मादिति
अकर्त्रात्मविज्ञानात् प्रागपि सर्वदा सौ संन्यासी ज्ञेयो यो रागद्वेषौ क्वचिदपि
न करोतीत्याह ज्ञेय इति यथानुष्ठीयमानानि कर्माणि संन्यासिनेन निव
र्त्यंते कृतानि च वैराग्येंद्रियसंयमादीनि फलाभिसंधिरहितानि नैष्ठेवानभि
संहितफलानि नित्यनैमित्तिकानि योगिनमपि न निवध्नंति निवर्तयंति च सं
वित्ते कुतस्तमित्यभिप्रेत्याह निर्द्वंद्वो हीति कर्मयोगिनो नित्यसंन्यासित्वज्ञान
मन्यथाज्ञानवान्निष्प्रज्ञानमित्याशंक्याह एवंविध इति कर्मिणोपि रागद्वे
षाभावेन संन्यासित्वं ज्ञातव्यमित्यर्थः रागद्वेषरहितस्यानायासेन बं
धप्रध्वंससिद्धेश्च युक्तं तस्य संन्यासित्वमित्याह निर्द्वंद्व इति ३॥

स्वामिकृतटीका

ऊत इत्यपि लायां संन्यासित्वेन कर्मयोगिनं स्तुवन् तस्य श्रेष्ठत्वं दर्शयति ज्ञे
यः स नित्येति रागद्वेषराहित्येन परमेश्वरार्थं कर्माणि योनुतिष्ठति स नित्यं
कर्मानुष्ठानकालेपि संन्यासीत्येव ज्ञेयः तत्र हेतुः निर्द्वंद्वो रागद्वेषादिद्वंद्वशू
न्यो हि शुद्धचित्तो ज्ञानद्वारा सुखमनायासेन बंधात् संसारात्प्रमुच्यते ३

पैशाचभाष्यं

कथं श्रेयानिति चेत् ज्ञेय इति ज्ञेयो बोद्धव्यः स नित्यसंन्यासी यो न द्वेष्टि न कां
क्षति कस्मादिति चेत् कामक्रोधादयो द्वंद्वास्तद्रहितो निर्द्वंद्वः हि यस्मान्महा
बाहो सुखं सुखेनैव बंधात्संसारात्प्रमुच्यते मुक्तो भवति कर्मयोगी ज्ञातस
कलकर्मसंन्यास एवेत्यभिप्रायः रागद्वेषवियोगात् ३॥

रामानुजभाष्यं

कुतस्तत्राह ज्ञेयइति यःकर्मयोगीतदंतर्गतात्मानुभवतृप्तस्तद्व्यतिरि
क्तंकिमपिनकांक्षति ततएवकिमपिनद्वेष्टिततएवद्वंद्वसहश्चसनित्यसंन्या
सीनित्यज्ञाननिष्ठइतिज्ञेयः सुकरकर्मयोगनिष्ठतयासहिसुखंबंधात्प्रमु
च्यते ३॥

अभिनवरामकृतटीका

अतस्सएवसार्वकालिकःसंन्यासीयेनमनसोभिलाषभेदद्वेषौसंत्यक्तौ।
यतोसद्वंद्वेभ्यःक्रोधमोहादिभ्योनिष्क्रांताधीःससुखंप्रमुच्यतएव ३॥

परमार्थप्रपा

अथकर्मकुशलस्याभ्यासवशेनसएवभवतीत्याह ज्ञेयइति ३ सपुरुषः
कर्मकुर्वन्नपिनित्यसंन्यासीज्ञेयः सकैयानद्वेष्टिनकांक्षति रागद्वेषरहितो
नत्वतःकर्मयोगःसएवकर्मसंन्यासोभवितुमर्हतीति हियस्मात्कारणात्नि
र्द्वंद्वःनिर्गतानिद्वंद्वानिरागद्वेषसुखदुःखजयपराजयादीनियस्मात्तथा
विधःसुखंयथाभवतितथाबंधाद्विमुच्यते यथाप्रसंनेतोदयमेशत्रुद्वेष
रागाद्यलोभेनवाप्रवर्तनस्यबंधोभवतितत्प्रतिनिवृत्तस्यबंधाभावःतथाचस
नएवतत्संन्यासपरिणतोभवतीत्यर्थः ३॥

वनमाली

संन्यासस्यमोक्षसाधनत्वमुपपादयितुंसंन्यासशब्दार्थंस्मारयति ज्ञेय
इति सएवनित्यंसंन्यासीज्ञेयःकोसौयोभगवदर्पणबुद्ध्याक्रियमाणोक
र्मेतिःफलत्वाशंकयानद्वेष्टिस्वर्गादिकंचनकांक्षति निर्द्वंद्वो रागद्वेषरहितो
हियतःसंसारबंधात्तत्त्वसमतायोगेनज्ञानभक्तिप्रसादलब्धात्प्रमुच्यतइ
त्यर्थः ३॥

ऊसमवैजयंती

ज्ञानयोगात्कर्मयोगःकस्माद्धेतोर्विशिष्टइत्यपेक्षायामाहज्ञेयइति सः
गृहीतक्षरणात्ज्ञानगर्भमहासाधनरूपनिष्कामकर्मनिष्ठःकर्मयोगीनित्यसं
न्यासीनित्यमेवज्ञानयोगनिष्ठस्त्याज्ञेयोज्ञातव्यःसकःयःस्वस्वरूपानुभा
वानंदामृततृप्तःकर्मयोगोस्वस्वरूपावलोकनादृतितिरिक्तंकिंचिदपिनकां
क्षतिनद्वेष्टि आत्मप्राप्त्यसाधनकर्तारंवनद्वेष्टिनेच्छतिकृतोयतोनिर्द्वं
द्वःद्वंद्वसहिष्णुःहेमहाबाहोहेअर्जुनअभेदात्मनेनमानम्र्थ्योयोगीनमहिति
अयेनसुखंयत्नंविनैवबंधात्संसारात्मकात्प्रमुच्यतेमुक्तोभवति ३॥

तमेव कर्मयोगं प्रशंसति त्रिभिः **मधुसूदनी**

सकर्मणि प्रवृत्तोपि नित्यं संन्यासीति ज्ञेयः कोसौ यो न द्वेष्टि भगवदर्प
णबुद्ध्या क्रियमाणं कर्म निष्फलत्वशंकया न कांक्षति स्वर्गादिकं निर्द्वं
द्वो रागद्वेषरहितो हि यस्मात्त्वमनायासेन हे महाबाहो बंधात् ततः कर
णाः शुद्धिद्वारा ज्ञानप्रतिबंधात् प्रमुच्यते नित्यानित्यवस्तुविवेकादिप्र
कर्षेण मुक्तो भवति ३

सदानंदीटीका

कर्मयोगं तमेव प्रशंसति लोकसंग्रहार्थे सकर्मणि प्रवृत्तोपि कर्मयोगप
नैष्कृतिः ज्ञानयोगी नित्यसंन्यासी यो न द्वेष्टि परिश्रमे ईश्वरार्पणबुद्ध्या कृतं
कर्म नैष्फल्यशंकया २ न स्वर्गादिफलं किंचित् कांक्षति द्वंद्ववर्जितः यतो
नायासेन क्षिप्रं त्वज्ञानाद्यखिलप्रतिबंधतः ३ विवेकादिप्रकर्षेण मुक्तो भवति
सुहृद्धीः ४३ ॥

नीलकंठीटीका

ननु भवतु नः कर्मयोगिनां विक्षेपः संन्यासिनां तु सर्वनाशीति कथमुच्यते
कर्मयोगो विशिष्यत इत्याशंक्याह ज्ञेय इति यो रागद्वेषरहितः स कर्मसु
वर्तमानस्तस्मिन्नेव काले नित्यसंन्यास्येव यतेन साधनभूतयोः सांख्ययो
गयोः रागद्वेषराहित्यकृतसाम्यमुक्तं फलभूतयोस्तु सर्वविकल्पराहित्य
रूपसाम्यमनंतरश्लोकाभ्यामुच्यते तथापि चित्स्वाभाव्यात्कदाचित्संन्या
सिनो रागादयः पतानां शंका किं तेन तस्य तिष्ठ वश्रयानितिभावः यद्यप्येवं
तथापि द्विप्रसिद्धं निर्द्वंद्वो द्वंद्वे सत्यानंदयोरात्मानात्मनोर्मिथुने यथा
स्वरूपात्मस्वरूपहितः सांख्यो रागाद्युदयहेतोरज्ञानस्यात्यंतोच्छेदात्
सर्वकर्मकरणायासं विनापि बंधात्संसारात् केवलज्ञानेनैव मुच्यते न
कर्माण्यपेक्षते यद्वा निर्द्वंद्वो द्वंद्वं वै मिथुनं तस्माद्द्वंद्वान्मिथुनं प्रजायते
इति श्रुतेर्द्वंद्वं स्त्रीपुंसयोर्मिथुनं तद्रहितः स्त्र्यादित्यागी संन्यासी अना
यासेन मुच्यते रागादिजयस्योभयत्रतुल्यत्वात् ग्रहचक्रदंडवभरणादे
यत्नाभावात्सुखं मुच्यत इत्यर्थः ३ ॥

ज्ञानेरीटीका

इदमत्र तात्पर्यं येन इष्टानिष्टेषु संस्कारेषु पापपुण्यभूतो रागद्वेषो प्रोक्तः प्रत्यक्षा।

गी
टी॰ पं

18

छिन्नो सन्कुर्वन्नपि कर्माणि नित्यसंन्यासी ज्ञेयः यस्त्वमेहा कर्माणि त्य
क्त्वा रागद्वेषौ छेत्तुं न शक्नोति स कथं न च्युत इति ॥ [illegible]
[illegible]
[illegible] ॥

यथा विशिष्यते तथाह ॥

रामकंठी टीका

सम्यक्त्वयानुष्ठाता कुर्वन्नपि कर्माणि नित्यसंन्यासी सदा त्यक्तकर्मा वोद्धव्यः
कोसौ यः न किंचिद्द्वेष्टि न किंचित्कांक्षति कस्मात्स नित्यसंन्यासीत्याह य
स्मान्निर्द्वन्द्वः द्वेषाकांक्षाद्वन्द्वप्रतिपादिताद्वेषरागलक्षणाद्द्वन्द्वान्निष्क्रांतः
कर्माण्यपि कुर्वन् स एव सुखेनैव बन्धात्संसारलक्षणात् दुर्गान्मुच्यते स्व
यमेव मोक्षमाप्नोति तदिदमत्र तात्पर्यं संसारकारागृहस्य यौ रागद्वेषा
वेव दृढकपाटाविव अनर्गलपाशौ तावेव यथोक्तात्मज्ञानासिना येन छिन्नौ तस्य
क्रियमाणान्यपि कर्माणि अकृतकल्पानीत्यसौ नित्यसंन्यासी तु अतः य
स्य परिहरन्नपि कर्माणि रागद्वेषौ छेत्तुं न प्रभवति स संन्यस्तकर्मापि क
र्मकृदेव तत्कृतस्य तत्फलस्य बन्धस्याविरामात् यथा च सर्वकर्मणां परि
त्यागानुपपत्तिः केषांचन वा त्यागे च अप्यकरणाभूतरागद्वेषानुपरमस्त
था प्रागेव भूयोभूयः प्रतिपादितम् प्रतिपादयिष्यते च इत्थं च सम्यक्त्विते ज्ञा
नकर्मणी प्राकृतव्ययोगशास्त्राभ्यां प्रतिपादिते तत एव संन्यासयोगशा
स्त्राभ्यामेके [illegible] ॥

तत्र तावन्नीरविकल्पस्य संन्यासि लासिकी [redacted] टीका धिकारिणः स्वरूपमाह ॥

स योगी कर्मेन्द्रियैः कर्म कुर्वन्नपि नित्यसंन्यासी सार्वकालिकत्यक्तक
र्मा वोद्धव्यः कोसौ यो दुःखं च तत्साधनेन द्वेष्टि न चा सुखं च तत्साधनेन कांक्षति
सर्वदा स्वस्वरूपप्रतिष्ठितप्रज्ञतया निर्विकल्पत्वात् हि यस्मात् हे महाबाहो
निर्द्वन्द्वः सुखदुःखरागद्वेषादिद्वन्द्वसंकल्पान्निष्क्रांतो योगी सुखमना
यासेन बन्धात्संसारलक्षणात्प्रमुच्यते स्वयमेव मोक्षमाप्नोति एतदुक्तं भ
वति यः कश्चित्कर्मपरिहारेणात्मनः संन्यासित्वमभिमन्यमानो रागादि
द्वन्द्वानुच्छेदात्स्वीकारोपपत्त्या कर्मकृदेव तदुक्तं प्रमादिनो बहिश्चित्ताः
पिशुनाः कलहोत्सुकाः संन्यासिनोपि दृश्यन्ते दैवसंदूषिताशया इति ॥

तमेवकर्मयोगंप्रशंसतित्रिभिः मधुसूदनी

सकर्मणिप्रवृत्तोपिनित्यसंन्यासीतिज्ञेयःकोसौयोनद्वेष्टिभगवदर्पणबुद्ध्याक्रियमाणंकर्मनिष्फलत्वशंकयानकांक्षतिस्वर्गादिकंनिर्द्वंद्वोरागद्वेषरहितोहियस्मात्सएवमनायासेन हेमहाबाहोबंधादंतःकरणाशुद्धिरूपात्ज्ञानप्रतिबंधात्प्रमुच्यतेनित्यानित्यवस्तुविवेकादिप्रकर्षेणमुक्तोभवति ३

सदानंदीटीका

कर्मयोगंतमेवेशःस्तौतिलोकप्रहृतये सकर्मण्यप्रवृत्तोपिकर्मयोगपनेहकृतिः ज्ञानव्योनित्यसंन्यासीयोनद्वेष्टिपरिश्रमे ईश्वरार्पणेकृतेवे कर्मनैष्फल्यशंकया २ नस्वर्गादिफलेकिंचिकांक्षतिद्वंद्ववर्जितः यतोनायासतस्सितास्त्रुद्ध्यारव्यप्रतिबंधतः ३ विवेकादिप्रकर्षेणमुक्तोभवतिशुद्धधीः ५३॥

नीलकंठीटीका

ननुमत्पक्षःकर्मयोगिनोविक्षेपःसंन्यासिनोतुसनास्तीतिकथमुच्यतेकर्मयोगोविशिष्यतइत्याशंक्याह ज्ञेयइति योरागद्वेषरहितःसकर्मकृत्स्वरूपतस्यात्केशस्यकेवृवानित्यसंन्यास्येव यतेनसाधनभूतयोःसांख्ययोगयोःरागद्वेषराहित्यकृतसाम्यमस्ति फलभूतयोस्तुसर्वविकल्पराहित्यरूपसाम्यमनंतरश्लोकाभ्यामुच्यते तथापिचित्तस्वाभाव्यात्कदाचित्संन्यासिनोरागादयपातात्शंकाकिंनेनरस्यतिद्युवच्छ्रयानितिभावः यद्यप्येवंतथापिहिप्रसिद्धं निर्द्वंद्वोद्वंद्वेसत्यानृतयोरात्मानात्मनोर्मिथुनं यद्वास्वरूपाध्यासस्तद्रहितः सांख्योरागाद्युदयहेतोरज्ञानस्यात्यंतोच्छेदात्सुखंकर्मकरणायासंविनापिबंधात्संसारात्केवलज्ञानेनैवप्रमुच्यतेनकर्मणापीत्यर्थः यद्वानिर्द्वंद्वोद्वंद्वंवैमिथुनंतस्माद्वंद्वान्मिथुनंप्रजायतेइतिश्रुतेर्द्वंद्वंस्त्रीपुंसयोर्मिथुनंतद्रहितः स्त्र्यादित्यागीसंन्यासीअनायासेनप्रमुच्येत रागादिजयस्योभयत्रतुल्यत्वात् प्रत्युतकुटुंबभरणवैयग्र्याभावात्सुखंप्रमुच्यतइत्यर्थः ३॥

आनंदीटीका

इदमत्रतात्पर्यं येनद्रष्टृदृश्योसंसारेपाशभूतौरागद्वेषौप्रोक्तप्रज्ञया

श्चित्तोऽसकुर्वन्नपि कर्माणि नित्यसंन्यासी ज्ञेयः यस्त्वनेहा कर्माणि त्य
क्त्वा रागद्वेषौ छेत्तुं न शक्नोति स कथं मुच्यत इति ॥ [illegible]
[illegible]
[illegible] ॥

यथा विशिष्यते तथाह ॥

रामकंठीटीका

सम्यक्त्वयाऽनुष्ठाताऽकुर्वन्नपि कर्माणि नित्यसंन्यासी सदा त्यक्तकर्मा वोद्धव्यः
कोऽसौ यः न किंचिद्द्वेष्टि न किंचित्कांक्षतीति कस्मात्स नित्यसंन्यासीत्याह य
स्मान्निर्द्वंद्वः द्वेषाकांक्षाद्वंद्वप्रतिपादिताद्द्वेषरागलक्षणाद्द्वंद्वान्निष्क्रांतः
कर्माण्यपि कुर्वन् सुखं सम्यक्प्रबंधात्संसारलक्षणात् दुर्गान्मुच्यते स्व
यमेव मोक्षमाप्नोति तदिदमत्र तात्पर्यं संसारकाराकुहरस्थानरागद्वेषा
वेव दृढकठोरौ बंधनपाशौ ताववश्यं योऽकातमत्त्वानासिनायेन छिन्नौ तस्य
क्रियमाणान्यपि कर्माणि अकृतकल्पानीत्यसौ नित्यसंन्यासी तूक्तः य
स्त्वपरिहरन्नपि कर्माणि रागद्वेषौ छेत्तुं न प्रभवति स संन्यस्तकर्मापि क
र्मकृदेव तत्कृतस्य तत्फलस्य बंधस्याविरामात् यथा च सर्वकर्मणां परि
त्यागानुपपत्तिः केषांचन वात्मारोवरूपकरणाभूतरागद्वेषानुपरमस्ता
षा प्रागेव भूयोभूयः प्रतिपादितम् प्रतिपादयिष्यते च इत्थं च सम्यक्छिन्नेऽज्ञा
नकर्मणां ग्रीष्मार्कसंतापयोगशास्त्राभ्यां ये प्रतिपादितेन तत्र एवं संन्यासयोगशा
स्त्राभ्यामुक्ते [illegible] ॥

तत्र तावत्त्रीण्विकल्पस्य संन्यासी

लासिकी [redacted] टीका

धिकारिणः स्वरूपमाह ॥

सयोगी कर्मेन्द्रियैः कर्म कुर्वन्नपि नित्यसंन्यासी सार्वकालिकत्यक्तकर्मा
मावोद्धव्यः कोऽसौ योऽतः स्वतत्त्वसाधनेन द्वेष्टि तथा स्वतत्त्वसाधनेन कांक्षति
सर्वदा स्वस्वरूपप्रतिष्ठितप्रज्ञतया निर्विकल्पत्वात् हि यस्मात् हे महाबाहो
निर्द्वंद्वः द्वंद्वैः रागद्वेषादिद्वंद्वसंकल्पान्निष्क्रांतो योगी सुखमना
यासेन बंधात्संसारलक्षणात्प्रमुच्यते स्वयमेव मोक्षमाप्नोति एतदुक्तं भवति
विज्ञेयः कश्चित्कर्मपरिहारेणात्मनः संन्यासित्वमभिमन्यमानो रागादि
द्वंद्वानुच्छेदात् सर्वकोपपत्या कर्मकृदेव तदुक्तं प्रमादिनो बहिश्चित्ताः
पिशुनाः कलहोत्सुकाः संन्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशया इति ॥

एतेन श्लोकेन पुरुषमुद्दिश्य संन्यासयोगस्य लक्षणमुक्तमिति ज्ञानं यो
गेन विना योगोपि तेन विना न संभवति एतौ हि नित्यसंबन्धाविति श्रो
तृमेवस्मारयति ३ ॥

पंचोलीटीका

ज्ञानरहितकेवलसंन्यासकर्मयोगमुक्तिहेतोर्मध्ये कर्मयोगे विशि
ष्टत्वमुक्तत्वात्तद्धेतुमाह ज्ञेय इति स एवंविधः कर्मयोगी नित्यसंन्यासी
यः सुखे सुखहेतौ न कांक्षति दुःखे दुःखहेतौ न द्वेष्टि निर्द्वंद्वः शीतोष्ण
सुखदुःखादिद्वंद्वे समः हि यस्मात् हे महाबाहो सुखं सुखेन बंधात्प्रमु
च्यते ३ ॥

रसालवीरसमिद्धायिनी ॥

ननु कथं स संन्यासः सिद्ध्येदित्यपेक्षायां तत्सिद्धावुपायं वदन्कर्मयो
गिनमेव स्तौति ज्ञेय इति स कर्मयोगी नित्यसंन्यासी ज्ञातव्यः यः सम
रविषये न द्वेष्टि सर्वेषां बंधादीनां विच्छेदको यं शुद्धमार्गः कथं द्वितः
स्यादित्येवं रूपं द्वेषं न करोति न च कांक्षति पुत्रमित्रादिविषयं स्नेहं च
न करोतीति रागद्वेषत्यागेनैव हि निषिद्धकर्मसंन्यासः सिध्यतीति भा
वः हि यतः निर्द्वंद्वो रागद्वेषरूपद्वंद्वातिक्रांतो तत एव च कर्मेंद्रियाणि
परत्रादौ विषये व्यापारयन् सुखं यथा स्यात्तथा बंधात्परकीयगृहा
दिमध्यप्रवेशो न जातादपुनर्निर्गमनलक्षणात्प्रापासंगलक्षणा
द्वा प्रमुच्यते हे महाबाहो अर्जुन यद्वा ववयोरैक्यात् हाय कहोप्यर्थे अ
हो पापबुद्धाश्चर्ये तथा च महामः शिवश्चेदमावेथामाचलक्ष्मीर्निग
यते अत्येका दारकोपानत् सो वेयास्तं ब्राह्मणं हंतीति महाब्रह्मघात
कोपि सुखं यथा स्यात्तथा बंधात् ब्रह्महत्याकृतात् दुःखप्रतिरोधात् मुक्तो
भवतीत्यर्थः कोर्थः मोक्षलक्षणरागद्वेषराहित्येन ब्राह्मणमप्या
ततायिनं क्षत्रियो ब्रह्महत्ययापि न स्पृश्यते किमुत परस्त्राजीवा
न्ब्राह्मणान्क्षत्रियादींश्च हिंसन्नु कपिदरमित्राभिद्रोहाभिधापेक
ष्यते इति ३ ॥

मधुभाष्य॥

19 ज्ञेयइति सन्यासस्य निःश्रेयसकरत्वंज्ञापयित्वंतच्छ्लाघ्यंस्मा
रयति ज्ञेयइति संन्यासोऽहिंसानांतरंगत्वेनोक्तो नतस्यतत्स्वरू
पलक्षणायेत्यादौ अतःकथंसोवगम्यतइत्यतआह ३॥

भाषा अनुवाद

जो संन्यास से कर्म योग को विशेष कहा सोई अब कर्मयोग की प्रशंसा करते कहते हैं कि जो कर्म करता हुआ भीन किसी से वैर करता और न कछु चाहता है तथा सुख दुख हानि लाभ द्वन्द भाव से रहित है सोई नित्य संन्यासी है और संसार बन्धन से छुट जाता है अथवा संन्यासी के ऐसे आचरण करता हुआ जो राग द्वेष रहित कर्म करता है सो नित्य संन्यासी कहे निश्चय संन्यासी और संन्यासी तो संन्यासी ही हैं क्यों कि कर्म संन्यास श्रेष्ट है इहो एक संन्यासी पन् यपद है ३ ॥

दोहा

सो नित संन्यासी जानीये आसा धरै न द्वेष द्वंद्व विना नर सुख लहै बंधन कार विशेष ३ ॥

20

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः एकम
प्यास्थितः सम्यगुभयोर्विन्दते फलं ४ ॥

शांकरभाष्य

ननु संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोः फलेपि विरो
धो युक्तो न तूभयोर्निःश्रेयसकरत्वमेवेति प्राप्त इदमुच्यते सांख्ययोगाविति
सांख्ययोगौ पृथक् विरुद्धभिन्नफलौ बालाः प्रवदंति न पंडिताः पंडितास्तु
ज्ञानिन एकं फलमविरुद्धमिच्छंति कथमेकमपि सांख्ययोगयोः सम्यगा
स्थितः सम्यगनुष्ठितवानित्यर्थः उभयोर्विन्दते फलमुभयोस्तदेव हि निःश्रे
यसं फलमतो न फले विरोधोस्ति ननु संन्यासकर्मयोगशब्देन प्रस्तुत्य सांख्य
योगशब्दयोः फलैकत्वं कथमिहाप्रकृतं ब्रवीति नैष दोषः यद्यप्यर्जुनेन सं
न्यासं कर्मयोगं च केवलमभिप्रेत्य प्रश्नः कृतो भगवांस्तु तदपरित्यागेनैव
स्वाभिप्रेतं च विशेषं संयोज्य शब्दांतरवाच्यतया प्रतिवचनं ददौ सांख्ययोगा
विति तावेव संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्य
योगशब्दवाच्याविति भगवतो मतमतो नाप्रकृतप्रक्रियेति ४ ॥

आनंदगिरिटीका

कर्मयोगसंन्यासादिना तथैव प्रतिवचनेव कथं सांख्ययोगयोरेकफलत्वम
प्रकृतं न भवतीत्युच्यते तत्राह यद्यपीति प्रतिवचनमपि तद्रूपमेव भ
गवता निरूपितमिति विशेषानुपपत्तिरित्याशंक्याह भगवांस्त्विति तदपरि
त्यागेनेत्यत्र तत्पदेन प्रश्नप्रतिनिर्दिष्टौ कर्मसंन्यासकर्मयोगावुच्येते सांख्य
योगाविति शब्दांतरवाच्यतया तयोरेव संन्यासकर्मयोगयोरत्यागेन स्वाभिप्रे
तं च विशेषं संयोज्य भगवान् प्रतिवचनं ददाविति योजना यदुक्तं स्वाभिप्रे
तं च विशेषं संयोज्येति तदेव व्यक्तीकरोति तावेवेति समबुद्धित्वादीत्यादिशब्दे
न ज्ञानोपायभूतः शमादिरादीयते प्रकृतयोरेव संन्यासकर्मयोगयोरुपादाने
फलितमाह अत इति सांख्ययोगावित्यादिश्लोकव्याख्यानसमाप्ताविति शब्दः ४

स्वामिकृतटीका

यस्मादेवं संगप्रधानत्वेन उभयोरप्यभेदेन क्रमसमुच्चयः अतो विकल्प
मंगीकृत्योभयोरेकः श्रेष्ठ इति प्रश्नो ज्ञानिनामेवोचितो न विवेकिनामित्या

ह सांख्ययोगाविति सांख्यशब्देन ज्ञाननिष्ठा वा विना तदंगसंन्यासं लक्ष
यति संन्यासकर्मयोगावेकफलौ सन्तौ पृथक् स्वतंत्राविति बाला अज्ञाः प्र
वदंति न तु पंडिताः तत्र हेतुः अनयोरेकमपि सम्यगास्थितः सन् उभ
योरपि फलं प्राप्नोति तथा हि कर्मयोगं सम्यगनुतिष्ठन् शुद्धचित्तः सन् ज्ञान
द्वारा यदुभयोः फलं कैवल्यं तद्विंदति संन्यासं सम्यगास्थितोपि पूर्वमनु
ष्ठितस्य कर्मयोगस्यापि परंपरया ज्ञानद्वारा यदुभयोः फलं कैवल्यं तद्विंद
तीति न पृथक्फलमनयोरित्यर्थः ५

पिशाचभाष्यं

इदानीं योगस्य संन्यासयोगात्तत्त्वरूपैकेन फलैक्यं दर्शयितुमाह सांख्य
योगौ पृथगभिन्नौ बालाः संप्रवदंति न पंडिताः बुद्धिमंतः यस्मादेकमप्या
स्थितः सेवमानः सम्यक् यावदुभयोः सांख्ययोगयोः फलं विंदते लभते ५ ॥

रामानुजभाष्यं

ज्ञानयोगकर्मयोगयोरात्मप्राप्तिसाधनभावे अन्योन्यनैरपेक्ष्यमाह सांख्या
योगाविति ज्ञानयोगकर्मयोगौ फलभेदात्पृथग्भूतौ प्रवदंति ये बालाः अ
निष्पन्नज्ञानाः न पंडिताः न कृत्स्नविदः कर्मयोगो ज्ञानयोगमेव साधय
ति ज्ञानयोगस्त्वात्मावलोकनं साधयतीति तयोः फलभेदेन पृथक्त्वं वदंतो न पंडि
ता इत्यर्थः उभयोरात्मावलोकनैकफलयोरेकफलत्वेनैकमप्यास्थितस्त
देव फलं लभते ५ ॥

अभिनवगुप्तकृतटीका उक्तार्थं ५ स्पष्टार्थं

परमार्थप्रपा

अथ पूर्वप्रश्नस्य ज्ञानकृत इति दर्शयति सांख्ययोगाविति ५ सांख्ययोगौ पृ
थगिति बालाः वदंति न पंडिताः सांख्यशब्देन ज्ञाननिष्ठावाची कर्मसंन्यासः यो
गस्तु कर्मयोगः तौ पृथक् स्वतंत्रफलाविति बाला अज्ञाः प्रवदंति न पंडिताः
ज्ञातार इत्यर्थः तत्राह अनयोरेकमपि सम्यगाश्रितवान् उभयोः फलं प्राप्नोति
अमासक्त्या कर्मयोगमनुतिष्ठन् शुद्धचित्तः सन् ज्ञानद्वारा उभयोः कैवल्यमेव
फलं न पृथक् फलत्वमित्यर्थः ५ ॥

वनमाली

ननु कर्मानुष्ठाता कथं संन्यासी त्यागानुष्ठानयोर्युगपद्विरोधादित्यत आह

सांख्येति सांख्यासम्यगात्मबुद्धिस्तां तिष्ठादयतीति सांख्यः संन्यासः यो
गः कर्मानुष्ठानं तौ पृथक् फलौ बालाः शास्त्रार्थविवेकज्ञानशून्याः प्रव
दंति न पंडिताः एकमपि संन्यासः कर्मयोगमध्ये सम्यगवस्थितः स्वाधिका
रानुरूपेण सम्यक् यथाशास्त्रं कृतवान् सन्नुभयोः फलं ज्ञानोत्पत्तिद्वारा
विंदते ४ ॥

ज्ञसमवैजयंती

आत्मप्राप्त्युपायभूतयोः कर्मज्ञानयोः ज्ञानाग्निसाधनत्वे परस्परापेक्षा
रहितत्वमाह सांख्ययोगाविति ये सांख्ययोगौ ज्ञानयोगकर्मयोगौ फल
भेदात्पृथग्भूताविति प्रवदंति प्रकर्षेण वादं कुर्वंति ते बाला मूर्खा न तु पंडि
ता न तत्त्वरूपविदः कर्मज्ञानस्य साधनं ज्ञानमात्मदर्शनस्य साधनमि
त्येवं फलभेदात्तयोः स्वरूपभेदं वदंति न तु तत्त्वरूपनिर्णयं कुर्वंत्यतो मू
र्खा इत्यर्थः पंडितास्तु एकमपि ज्ञानं कर्म वा आस्थितः आसमंतात् द्विप्राम
पूर्वकं स्थितः पुरुषः उभयोर्ज्ञानकर्मणोः सम्यक् समग्रं फलमात्मदर्शनरू
पं फलं मोक्षं वा विंदते लभते इत्येवं वदंति आत्मावलोकनस्योभे ज्ञान
कर्मणी निरपेक्षसाधने भवत इत्यर्थः ४ ॥

मधुसूदनी टीका

ननु यः कर्माणि प्रहतः स कथं संन्यासीति ज्ञातव्यः कर्मतत्त्यागयोः स्वरूप
विरोधात् फलैक्यान्नैवेति चेन्न स्वरूपतो विरुद्धयोः फलेपि विरोधस्यैवौचि
त्यात् तथा च निःश्रेयसकरावुभावित्यनुपपन्नमित्याशंक्याह ॥ सांख्या
सम्यगात्मबुद्धिस्तां वहतीति ज्ञानांतरंगसाधनतया सांख्यः संन्यासः योगः
पूर्वोक्तः कर्मयोगः तौ पृथक् विरुद्धफलौ बालाः शास्त्रार्थविवेकज्ञानशून्याः
प्रवदंति न पंडिताः किं तर्हि पंडितानां मतमुच्यते एकमपि संन्यासकर्मयोगम
ध्ये सम्यगास्थितः स्वाधिकारानुरूपेण सम्यग्यथाशास्त्रं कृतवान् सन्नुभयोर्विं
दते फलं ज्ञानोत्पत्तिद्वारेण निःश्रेयसमेकमेव ध [illegible]
[illegible] ॥

सदानंदीटीका

ननु यः कर्मणां कर्त्ता स संन्यासी कथं भवेत् कर्मतत्त्यागयोर्यस्माद्विरोधोस्ति
स्वरूपतः । फलतोपि विरुद्धत्वं स्वरूपेणाविरुद्धयोः निःश्रेयसकरत्वं वा तु पप

न्नमिवेतिचेत् १ सम्यगात्ममतिः सांख्यातां वहूत्पात्मबोधने ज्ञानांतरंगहे
तुत्वात्सांख्यः संन्यास उच्यते २ कर्मयोगस्तु पूर्वोक्तश्चित्तशुद्धेककारणं सं
न्यासयोगौ शास्त्रार्थविवेकज्ञानवर्जिताः ४ तौ विरुद्धफलौ बालाः प्रवदं
ति न पंडिताः पंडितानां मते तर्हि किं स्यादित्युच्यते शृणु ५ संन्यासकर्मणोः
मध्ये स्वाधिकारानुरूपतः कृतवान्सम्यगाश्रित्य एकमप्यादरात्सुधीः ६ ।
ज्ञानेनात्मविमर्शेनैवमेकं तिः श्रेयसं फलं उभयोर्विंदते तस्मान्न विरोधफलेतयोः २४

नीलकंठी टीका

नन्वेकत्र पातागोकापकत्वकर्मश्रमत्वदनुयोः पयोः कतरः श्रेयानित्या
शंक्य द्वयोरपि फलतः साम्यमित्याह सांख्ययोगाविति सांख्यसमित्येकी
भावेन तियास्कः पकीभावेनात्मानमनेन ख्यापयते प्रकाश्यते वस्तुस्वरूप
मनयेति सांख्या स्थूलसूक्ष्मकारणप्रपंचस्यानिर्विकल्पप्रत्यगात्मनि प्रवि
लापनेन उदिताचेतोवृत्तिः तत्साधनभूतोयं सांख्यः संन्यासः सच दारादि
६५ वस्तुतानां पदार्थानामात्मन्येकीभावेनन्यसनं त्यागः प्रविलापनं त
थायोगोप्यग्निहोत्रसंध्योपासनादिनिर्विकल्पसमाध्यंतमनुष्ठानं तत्र
ख्यस्य योगस्य च ततः योगश्चित्तवृत्तिनिरोध इति हेतुपरं प्रमाणविपर्य
यविकल्पनिद्रास्मृतय इति पंच तत्र प्रत्यक्षानुमानागमाः प्रमाणानि ते
षु प्रत्यक्षं सिद्धं तत्र वृत्तिः शब्दादिविषयेयाथार्थ्येन ज्ञानं विपर्ययस्तत
त्त्वेवरजतादिविषयं भ्रांतिरूपं ज्ञानं संशयोपि द्वयंशस्थितिर्वारजतं वेतिस्थाणुर्वा
पुरुषो वेत्यनेककोटिकं ज्ञानं सविपर्यय एवांतर्भवति विकल्पस्तु शब्दज्ञाना
नुपाती वस्तुशून्यः यथा शशविषाणं वंध्यापुत्र इति नहि शशविषाणवंध्यापु
त्रौ वस्तु किंचिदस्ति अथापि शब्देनाभिलापनेनैवायं विकल्पः शब्दज्ञानानुपा
तीवस्तुशून्यः एकस्मिन्नेकत्र द्विरसतिवस्तु दृष्टिरिति निद्रास्मृती लोकप्र
सिद्धे एतासां निरोधे सति निर्विकल्पः प्रत्यगात्मैवावशिष्यते तावेतौ फलभू
तौ सांख्ययोगौ साधनभूतौ तावेव संन्यासकर्मयोगाख्यौ तत्रात्मयोः साम्ये
ज्ञेयः सनित्यसंन्यासीत्यनेन सूचितं अनयोरेकमप्युच्यते आस्थितः प्राप्नो
ति स्वत् फले निर्विकल्पात्मनाऽवस्थितिरूपम् ४ ॥

आनंदी टीका

तदिदंप्रागुक्ताभ्यांसांख्ययोगशब्दा आनंदी टीका भ्यांसांख्यसंन्यासिनोधिकारःकर्मणि नास्तीत्याह ॥
वथहस्ये ति यत्नेसमायस
बालाविमर्शभूमत्वाज्जनाःसांख्ययोगौपृथगभिन्नार्थकौभिन्नफलानु
ष्ठेयौप्रवदंति पंडितास्त्वविमर्शकास्त्वेवंनप्रवदंति तेषैकामेवनिष्ठां
भिन्नेनप्रकारद्वयेनसाध्यामप्येकेनपृथक्फलेणानुष्ठेयामाहुः यतए
कमपिसांख्ययोगंसम्यक्पूर्वोक्तक्रमेणास्थितोद्वयोरपिसांख्ययो
गयोःफलमेकरूपमेवविंदति उक्तंपूर्वाचार्यफक्तिः आवश्यकंकर्म
कुर्वतामपिसांख्यानांयथोक्तात्मज्ञानसमाधौनकोपिप्रतिबंधः स
वलभ्यैवश्रेयःप्राप्तिःकर्माकरणेतप्रत्यवायःस्यात्तावृत्तमपव तथैवज्ञा
नापरित्यागेनविहितंकर्मकुर्वतामेवमसर्वेषांवर्णाश्रमिणांश्रेयःफलम
मेवज्ञानंविनातवृत्यइति ॥ तदेवंज्ञानिनांकर्माविनाभावात्कर्मिणांज्ञा
नेनाविनाभावाद्वयोस्तुल्यमेवफललाभः [illegible] ॥ ॥

रामकंठीटीका

ततःकिंतेसंशयकारणमित्याह ॥
सांख्यंयथाप्रतिपादितात्मतत्वज्ञानेयोगस्तद्विरहविधानविहितवर्णा
श्रमधर्माणांविहितानांकर्मणामनुष्ठानेतोनित्यमन्योन्यवियोगप्रतिला
भ्यसंघर्णास्वरूपत्वादभिन्नौबालास्तत्वज्ञानव्यवहारस्युत्पत्तिरहितत्वाद्बा
लिशाःपृथक् भिन्नफलानुष्ठेयतयाविविक्तावस्थानौप्रवदंतिसावदनेन
नतुपंडिताःपरमार्थविदः यतएकमपिसांख्ययोगंवा सम्यग्यथाप्रतिपा
दितेनरूपेणास्थितःसमाश्रितःउभयोर्द्वयोरपिसांख्ययोगयोःफ
लंकैवल्यलक्षणंविन्दतेलभतेकिमतोभवति यथोक्तसांख्यापरसंज्ञविज्ञा
नसमाश्रयणं एवमप्रतिपादितेपपन्नाययथाविहितकर्मानुष्ठानरूपयोग
मेतयोर्यथोक्तफलपर्यवसायिनभवत्येव योगोपिसांख्यरहितस्तत्येवेति ४
[illegible] ॥

लासिकी
[illegible]टीका

सांख्यंकर्मणिक्रियमाणेपिदेहात्मविवेक[illegible]त्मयोगमात्मत्वप्रमत
तयाकर्मानुष्ठानम् एतौबालास्तत्वज्ञानव्युत्पत्तिशून्याःपृथग्भिन्नफ
लानुष्ठेयतयाविविक्तावस्थानौकथयन्ति नतुपंडितास्तत्ववि

गी॰ दः यतोनयोरेकमप्यतममपिसम्यगाश्रितः उभयोर्द्वयोरपिफलं
टी॰ पं कैवल्यंलभते ४ [illegible] ॥ ४

23

पंचोलीटीका

कर्मयोगकर्मसंन्यासयोगःअंगप्रधानत्वेनअवस्थाभेदेनक्रमसमुच्चयेअभिहितेतत्त्वविकल्पमंगीकृत्यउभयोःकःश्रेयःइतिप्रश्नोत्तरितामेवउचितःनविवेकिनामित्याह सांख्येति बालाअज्ञाःसांख्ययोगोज्ञानसहितःकर्मणांत्यागःसांख्यंईश्वरार्थं कर्मानुष्ठानेयोगस्तौपृथक्फलौवदंतिनपंडिताःज्ञानिनःकिंतर्हिपंडितानामतमुच्यते एकमपिसम्यगास्थित एकस्यसम्यगनुष्ठानात् नरउभयोःफलंमोक्षाख्यंज्ञानोत्पत्तिद्वारेणविंदतेप्राप्नोति ४ ॥ ४ ॥

रागावीरसमिद्धोधिनी॥

प्रथमलोकेस्मिन्द्विविधानिष्ठेत्यत्रनिर्णीतमप्यर्थंविस्मृत्यैवंतमन्तएवसंन्यासयोगमाहमात्रश्रवणेनैवफलदित्येवसंजातसंशयमर्जुनंसम्यक्संदेहापनुत्तयेतमेवार्थंस्मारयन्नाक्षिप्तमेवविहृणोति सांख्ययोगाविति सांख्यंपृथक्त्वमप्रवृत्ताःसांख्यास्तेषामिदंसांख्यंनिश्चयात्मकंज्ञानंज्ञानयोगेनसांख्यानामित्युक्तेः योगस्तदनंतरंस्वोचितकर्मानुष्ठानलक्षणंकर्मकौशलंतौबालाःतत्त्वरूपज्ञानरहिताबालिशाःपृथक्पृथक्फलौप्रवदंति पंडितास्तुनैवंकथयंति यतउभयोरनयोर्मध्येएकमपिसांख्यंयोगंवासम्यगास्थितःसमाश्रितःक्षत्रियप्रवरउभयोःफलंराज्यभोगादिलक्षणंविन्दतेलभते फलमित्येकवचनेनैकमेवफलंद्वयोर्भवतीतिध्वनति कर्मसुप्रवृत्तिलक्षणयोगस्यनिश्चयात्मकज्ञानलक्षणसांख्येनविना तस्यतेविनासिद्धेरेकफलत्वेवसांख्ययोगाविति भावः ४॥

मधुभाष्य॥

सांख्ययोगाविति उभयोरप्यंतरंगत्वेनविरोधः अग्निहोत्रयो

द्वैधूम्यतांतःस्वंलोकंनप्रतिजानाति भावः प्रद्युम्नःपि
तथूमदाश्रिताथायत्तथालाधूमवत्मेनामित्यादिकामय
कर्मविषयमितिभावः येत्वन्यथावदंतितेबालाः प्रक
मपीत्यस्याभिप्रायमाह ४॥

24

भाषा अनुवाद

जिस हेतु संन्यास औ कर्मयोग दोनो प्रधान अङ्गरूप अवस्था मे
देखे पाये जाते हैं इस से इन मे कौन श्रेष्ठ ऐसा पूछना अज्ञानी
को तो उचित होसकता है, पर ज्ञानी को तो नहीं यही कहते
हैं कि ज्ञान निष्ठा जो सांख्य औ उसी का अङ्गरूप संन्यास तथा सं
न्यास से लक्षित कर्मयोग भी संन्यास है इन दोनो का फल एक ही।
है तो भी दोनो भिन्न हैं यह केवल अज्ञानी कहते हैं औ पण्डित
ऐसा नहीं कहते हैं देखो इनमे से एक पक्ष का आश्रय लेने वाला
पुरुष दोनो के फल को प्राप्त होता है जैसे लोग निःकाम कर्म कर
ते शुद्धचित्त होय तत्वज्ञान प्राप्ति के द्वारा उन दोनो का फल जो
कैवल्य सो लाभ करते हैं ऐसे ही सब कर्मत्याग रूप संन्यासधारी
लोग भी पूर्वोक्त कर्मयोग की परम्परा रूप जो कैवल्य सो पावते
हैं तो अलबत्ता दोनो का फल पृथक् नहीं है सोई कहा कि सांख्य
औ योग को बालक कहै अज्ञजन भिन्न कहते और पंडित नहीं
कहते हैं एक मे भी अच्छी तरह से स्थित होके फल दोनो का भी।
पावता हैं इससे दोनो एक है ४॥

दोहा

सांख्ययोगभिन्न बालक कहैं पंडित कहिते नाहिं जो एक हि आ॰
श्रित भलें दोउ फल मिल ताहि ४॥

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सां
ख्यं च योगं च यः पश्यति स पश्यति ५ ॥

शांकरभाष्यं

एकस्यापि सम्यगनुष्ठानात् कथमुभयोः फलं विंदत इत्युच्यते यदिति य
त्सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं तद्योगैरपि ज्ञानप्रा
प्त्युपायत्वेनेश्वरे समर्प्य कर्माणि आत्मनः फलमनभिसंधायानुतिष्ठंति
ये ते योगिनः तैरपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायः अत
एकं सांख्यं च योगं च यः पश्यति स पश्यति फलैकत्वात् सम्यक्पश्यतीत्यर्थः ५

आनंदगिरिकृतटीका

प्रश्नपूर्वकं श्लोकांतरमवतारयति एकस्यापीति केचिदेव तयोरेकफलत्वं
पश्यंतीत्याशंक्य तेषामेव सम्यग्दर्शित्वं नेतरेषामित्याह एकमिति निष्ठत्वं स
न्न्यावर्तेष्वपि वृत्तिव्युत्पत्तिमाश्रित्याह मोक्षाख्यमिति योगशब्दार्थमाह ज्ञान
प्राप्तीति ये हि निष्कामाः सर्वाणि कर्माणि भगवत्यर्पयंते न तेषां फलाभि
लाषः तत्कृतात् ज्ञानप्राप्तौ बुद्धिशुद्धिद्वारेणोपायत्वेनानुतिष्ठंति ते च योगं विव
क्षंते अत्र प्रसंगस्य तत्वार्थत्वं गृहीतोसौ योगिन इति सर्वोपि द्वैतप्रपंचो नवा
स्तवभूतो मायाविलासत्वादात्मा न विक्रियावद्वितीयो वस्तुतस्त्विति प्रयोजकत्वा
नं परमार्थज्ञाने तत्पूर्वकसंन्यासद्वारेण कर्मिभिरपि तदेव स्थानं प्राप्यमि
त्येकफलत्वं सन्न्यासकर्मयोगयोरविरुद्धमित्याह तैरपीति फलैकत्वे फलि
तमाह अत इति ५ ॥

स्वामिकृतटीका

एतदेव स्फुटयति यत्सांख्यैरिति सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिर्यत्स्थानं मो
क्षाख्यं प्रकर्षेण साक्षात्प्राप्यते योगैरित्यत्रार्शआदित्वेन मत्वर्थीयो अच्प्रत्ययो
द्रष्टव्यः कर्मयोगिभिरपि तदेव ज्ञानद्वारेण गम्यत अवाप्यत इत्यर्थः अतः
सांख्यं च योगं चैकफलत्वेनैकं यः पश्यति स एव सम्यक्पश्यति ५ ॥

पिशाचभाष्यं

यत्सांख्यैः ज्ञाननिष्ठैः प्राप्यते स्थानं मोक्षाख्यं तद्योगैः कर्मभिरपि गम्यते
अत एवाभिन्नं सांख्ययोगं च यः पश्यति स सम्यक्दर्शीत्यर्थः ५ ॥

रामानुजभाष्यं

एतदेव विवृणोति सांख्यैर्ज्ञाननिष्ठैर्यदात्मावलोकनरूपं फलं प्राप्यते त

दैः कर्मयोगनिष्ठैरपि प्राप्यते एवमेकफलत्वेनैकं वैकल्पिकं सांख्यं योगं च यः पश्यति स पश्यति स एव पण्डित इत्यर्थः ५॥

अभिनवगुप्तमहान्तटीका

इदं सांख्यं ज्ञानमयं च योगः इति न भेदः एतौ हि नित्यसंबद्धौ ज्ञानेन योगेन विना योगोऽपि तेन विना अत एकत्वमनयोः ५॥

परमार्थप्रपाटीका

यत्सांख्यैरिति सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः यत्स्थानं कैवल्यं प्रकर्षेण साक्षात्प्राप्यते तदेव योगैः कर्मयोगैर्ज्ञानद्वारा प्राप्यते अतः सांख्यं योगं च एकमेकफलत्वेन यः पश्यति स एव पश्यति परमार्थं दृष्टा नान्यः ५

वनमालीटीका

कथं तत्राह यदिति सांख्यैर्भगवज्ज्ञानाभ्यासपरैर्दृढजन्मनिजन्मांतरेवा हृतकर्मभिः शोधितांतःकरणैः संन्यासिभिः श्रवणादिपूर्वकज्ञाननिष्ठया भगवत्प्रसादद्वारा यत्स्थानं वैकुंठाख्यं मोक्षरूपं स्वस्वरूपानंदाविर्भावरूपं प्राप्यते योगैरपि भगवदर्पणाभिप्रायफलेच्छारहितेन कृतानि कर्माणि स्वोचितानि योगास्ते विद्यंते येषां ते योगाः अर्श आदित्वान्मत्वर्थीयो च्प्रत्ययः तैः संन्यासश्रवणादिकं प्राप्य तत्स्थानं गम्यते अत एकफलत्वात्सांख्यं योगं च यः एकं पश्यति स एव सम्यक् पश्यति ५॥

उत्तमवैजयन्ती

एतदेव स्फुटयति यदिति सांख्यैः सांख्यमात्मज्ञानं विद्यते येषां ते सांख्याः अर्श आदित्वादच्प्रत्ययः तैरात्मज्ञानिभिर्मुमुक्षुभिः उत्कर्षेण त आत्मा
त्रि॰ वलोकनरूपं स्थानं स्वमहत्त्वः तिष्ठंत्यस्मिन्निति स्थानं फलरूपं पदं न कदापि दपि न च्यवंते इत्यर्थः प्राप्यते प्रतिपद्यते योगैरप्यत्राप्यच्प्रत्ययः ज्ञानगर्भकनिष्कामकर्मकर्तृभिरपि कर्मयोगिभिस्तत्स्थानं गम्यते प्राप्यते यो मुमुक्षुः सांख्यं ज्ञानयोगं योगं च कर्मयोगमेकमुभयोः स्वरूपभिन्नत्वेऽपि फलस्यैकत्वादेकमेव पश्यति जानाति स पश्यति स एव वेत्ति स एव ज्ञानलोचनवान्नांध इत्यर्थः ५॥

एकस्यानुष्ठानात्कथमुभयोः फलं विंदते तत्र मधुसूदनीटीका आह॥

सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिरैहिककर्माननुष्ठानेऽपि प्राग्भवीय

कर्मभिरेव संस्कृतांतःकरणैः श्रवणादिपूर्विकया ज्ञाननिष्ठया य
त्प्रसिद्धं स्थानं तिष्ठत्येवास्मिन्न तु कदापि च्यवत इति व्युत्पत्त्या मोक्षाख्यं
प्राप्यते श्रवणाभावमात्रेणालब्धत्वेऽपि नित्यप्राप्तत्वात् योगैरपि
भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येनानुष्ठितानि कर्माणि शास्त्री
याणि योगास्ते येषां संति तेऽपि योगाः अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्य श्रा४
यः तैर्योगिभिरपि सत्त्वशुद्ध्या संन्यासपूर्वकश्रवणादिपुरःसरया ज्ञा
ननिष्ठया वर्तमाने भविष्यति वा जन्मनि संपत्स्यमानया तत्स्थानं
गम्यते अत एव फलैकत्वात् एकं सांख्यं च योगं च यः पश्यति स एव स सपश्यति ५
म्यक् पश्यति नान्यः अयं भावः येषां संन्यासपूर्विका ज्ञाननिष्ठा दृश्यते
तेषां तयैव लिंगेन प्राक्जन्मसु भगवदर्पितकर्मनिष्ठानुमीयते का
रणमंतरेण कार्योत्पत्त्ययोगात् तदुक्तं यान्यतोऽन्यानि जन्मानि तेषु नू
नं कृतं भवेत् यत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिरिति एवं ये
षां भगवदर्पितकर्मनिष्ठा दृश्यते तेषां तयैव लिंगेन भाविनि संन्यास
पूर्वकज्ञाननिष्ठानुमीयते सामग्र्याः कार्याव्यभिचारित्वात् तस्माद
ज्ञेन जन्मन्यंतःकरणशुद्धये प्रथमं कर्मयोगोऽनुष्ठेयो न तु संन्या
सः स तु वैराग्यतीव्रतायां स्वयमेव भविष्यतीति ५ ॥

सदानंदी टीका

कथमेकस्य करणादुभयोर्विंदते फलं शृणु संन्यासिभिः पुण्यैः पूर्व
जन्मस्वनुष्ठितैः १ शुद्धांतःकरणैः सम्यग्वेदांतश्रवणादिभिः श्रवणा
त्मावबोधयेन्मोदास्थ्यं प्राप्यते फलं २ ईश्वरार्पणधिया योगाः शास्त्रीया
णि कृतानि च कर्माणि संति येषां ते योगास्तैरपि योगिभिः सत्त्वशुद्ध्या
च संन्यासपूर्वया ज्ञाननिष्ठया तत्स्थानं गम्यते वर्तमाने भाविनि वा भ
वे च ३ अत एकफलत्वाद्यः पश्यत्येकं विशुद्धधीः सांख्यं योगं स एवेह सम्य
क् पश्यति नापरः ४ दृश्यते ज्ञाननिष्ठैव येषां संन्यासपूर्विका तेषां तल्लिं
गतः पूर्वजन्मस्वीशसमर्पितं ५ कर्मानुष्ठानमप्यस्तीत्येवमनुमीय
ते न विना कारणं कार्योत्पत्तिर्दृश्यते यतः ६ यान्यतोऽन्यानि जन्मा ७
नि तेषु नूनं कृतं भवेत् यत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिः ८

गी॰ टी॰ ५

एवमीश्वरार्पितकर्मानुष्ठानं दृश्यते नुगतो येषां तेषां संन्यासं ज्ञानं
भाष्यनुमीयते ९ तस्माज्जित्वा स्वनाज्ञेन प्रथममेव चित्तशुद्धये कर्मयोगो
स्वनुष्ठेयो न संन्यासः कथंचन ९ वैराग्यतीव्रतायां संन्यासमेवम
विष्यति ९ ५ ॥

नीलकंठटीका

योगैः योगिभिः अर्थादात्मज्ञानयुक्तैः तेऽयं योगशब्दः स्थानं मोक्षा
ख्यं एकं अभिन्नं स्पष्टं योजनात्मोक्षरूपस्य ५ ॥

आनंदीटीका स्पष्टार्थम् ५

हे महाबाहो संन्यासस्तु [illegible] योगतः योगेन ज्ञानकर्म
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥

रामकंठीटीका

वहछयिवमाह सांख्येन ज्ञानेन तु सम्यक्त्वाः पूर्वोक्तलक्षणाया सार्थ्यैः स्मृताः तद्योगसं
बन्धायोगस्तैरेवावधेः सांख्यैर्यो ज्ञानवद्भिर्यत्स्थानं विश्रांतिपदं प्रा
प्यते निरुपरोपयतया समाश्रीयते तदेव योगिभिरनुगम्यते पश्चात्काल
यास्वीक्रियते ज्ञानपूर्वतादनुष्ठानसापेक्षत्वात्सांख्यैः प्राप्यते तयोगैरनुगम्यते
इत्यर्थः न पुनः केवलं लन्नामौकफलसंपादनेन लक्षतत्वान्न योर्भेदोस्ति ।
ततः सांख्यं योगं चैकमेव यः पश्यति जानाति स एव पश्यति तस्यैव सम्यक्
ज्ञानमिकारदर्शनं शक्तिः न तु ज्ञानेन यो केवलेनैव मोक्षः कर्मयोगेन
सर्वैराणापि वदन्ति पश्यति ५ ॥

लामिकी [redacted]टीका

तदेवस्पष्टयितुमाह ॥

सांख्यैर्यथोक्तज्ञानवद्भिर्यत्स्थानं विश्रांतिपदं योगभूमिकाधिरोहेण प्राप्यते तदेव योगैरपि स्वस्वभावावस्थितनयाकर्मानुष्ठानाभिगम्यते वा प्यते अतः सांख्ययोगौ चैकफलत्वेनैकं यः पश्यति स एवोन्मीलिततत्व दृष्टिः सम्यक्पश्यति नान्यः योगैरित्यत्राधीशादित्वात्मत्वर्थीयो वृ [illegible] र्गो योगो विद्यते येषामिति योगविशेषणमाह ५ ॥

पैबोलीटीका

एकस्यानुष्ठानात्कथमुभयोः फलं विंदते तत्राह यदिति सांख्यैर्ज्ञाननि ष्ठैः संन्यासिभिः यत्स्थानं मोक्षाख्यं प्राप्यते ईश्वरार्पितकर्मकारिभिः यो गैस्तदेव प्राप्यते तदेव ज्ञानप्राप्तिद्वारेण मोक्षाख्यं यः सांख्ययोगं च एकफ लत्वादेकमेव पश्यति सः पश्यति सम्यक्जानाति ५ ॥

रसवीरसमिद्धाधिनी ॥

एतदेव दर्शयति यत्सांख्यैरिति सांख्यैर्बुद्धसंज्ञैर्यत्स्थानं स्वर्गादिल क्षणं प्राप्यते योगो विद्यते येषां ते योगा योगिनः अर्च आद्यच् तैः क र्मयोगिभिरपि तत्प्राप्यते अतो यः सांख्यं योगं चैकमेकफलमेव प श्यति स एव सम्यग्दर्शीति भावः एतः प्रज्ञानयोगेन सांख्यानामि त्यत्र व्याख्यातं तत एवावधार्य ५ ॥

मधुभाष्य ॥

यत्सांख्यैरिति योगिभिरपि ज्ञानद्वारा ज्ञानफलं प्राप्यत इत्यर्थः अतश्च संन्यासाद्योगो वर इत्यादि ५ ॥

भाषा अर्थवाद

सांख्य औ योग दोनोमे से एकके सम्यक अनुष्ठान करने से
दोनो का फल किस तरहपावताहै इस शंकापर सांख्य औ यो
गका एक फलत्व प्रकाश करते हुये कहते हैंकि सांख्यकहे
ज्ञाननिष्ठ संन्यासी जोमोक्षपद पावतेहैं सोई पद योग शब्द वाच्य
कर्म योगी भी ज्ञानके द्वारा प्राप्त होते हैं इस से एकही फलके
हेतुरूप संन्यास औ योग कोजो एक रूप देखते है सोईसम्यक
दर्शीहैं सोई कहा कि जोपद सांख्य लोगपावते सोई योग युक
घों को मिलताहै और सांख्य योग कोजो एक देखते सो देखते
है बाकीसूरदासहै या जो कोई विरले ऐसे देखते है सब नहीं ऐ
से देखतेहै ५ ॥

दोहा

जोसांख्यीकोपदप्राप्तहै योगीतिहपदपाए एकहिसांख्यअ
रुयोगकोदेखेंसोहिदिषाए ५॥

29

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो
मुनिर्ब्रह्म नचिरेणाधिगच्छति ६॥

शांकरभाष्यं

एवं तर्हि योगात् संन्यास एव विशिष्यते कथं तर्हि इदमुक्तं तयोस्तु कर्मसं
न्यासात् कर्मयोगो विशिष्यते इति शृणु तत्र कारणं त्वया पृष्टं केवलं कर्म
संन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयानिति तदनुरूपं प्रतिवच
नं मयोक्तं कर्मसंन्यासात् कर्मयोगो विशिष्यत इति ज्ञानमनपेक्ष्य ज्ञानापे
क्षस्तु संन्यासः सांख्यमिति मयाभिप्रेतः परमार्थयोगश्च स एव यस्तु कर्मयो
गो वैदिकः स च तादर्थ्यात् योगः संन्यासः इति चोपचर्यते कथं तादर्थ्यमित्युच्यते
संन्यास इति संन्यासस्तु पारमार्थिको हे महाबाहो दुःखमाप्तुमयोगतः योगे
न विना योगयुक्तो वैदिकेन कर्मयोगेन ईश्वरसमर्पितरूपेण फलनिरपेक्षेणा
तेन युक्तो मुनिर्मननात् ईश्वरस्वरूपस्य मुनिर्ब्रह्म परमात्मज्ञाननिष्ठालक्षणत्वा
त् प्रकृतः संन्यासो ब्रह्मोच्यते न्यास इति ब्रह्मा ब्रह्मा हि परः इति श्रुतेः ब्रह्म परमा
र्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं नचिरेण क्षिप्रमेवाधिगच्छति प्राप्नो
त्यतो मयोक्तं कर्मयोगो विशिष्यते इति ६॥

आनंदगिरिटीका

यदि यथोक्तज्ञानपूर्वकसंन्यासद्वारा कर्मिणामपि श्रेयोवाप्तिरिष्टा तर्हि
संन्यासस्यैव श्रेयस्त्वं प्राप्तमिति चोदयति एवं तर्हीति संन्यासस्य श्रेष्ठत्वे कर्म
योगस्य प्रशस्यत्ववचनमनुचितमित्याह कथं तर्हीति पूर्वोक्तमेवाभिप्रायं
स्मारयन् परिहरति शृण्विति कर्मयोगस्य विशिष्टत्ववचने तत्रेति परामृष्टं
तदेव कारणं कथयति त्वयेत्यादिना केवलं विज्ञानरहितमिति यावत् त
योरन्यतरः कः श्रेयानिति इति प्रश्नोऽभ्याहर्तव्यः त्वदीयप्रश्नमनुसृत्य तद
नुरूपं प्रतिवचनं ज्ञानमनपेक्ष्य तद्रहितात् केवलादेव संन्यासात् योगस्य
विशिष्टत्वमिति यथोक्तमित्याह तदनुरूपमिति ज्ञानापेक्षः संन्यासस्तर्हि
कीदृगित्याशंक्याह ज्ञानेति तर्हि कर्मयोगे कथं योगशब्दः संन्यासशब्दो
वा प्रयुज्यते तत्राह यस्त्विति तादर्थ्यात् परमार्थज्ञानशेषत्वादिति यावत्
तदेव तादर्थ्यं प्रश्नपूर्वकं प्रकाशयति कथमित्यादिना कर्मानुष्ठानाभावेबु
द्धिशुद्ध्यभावात् परमार्थसंन्यासस्य सम्यग्ज्ञानात्मनो न प्राप्तिरिति व्यति

गी. टी. पं.

30

रेकस्वपरमस्यात्मयमनपरमस्यति योगीति पारमार्थिकः सम्यग्ज्ञानात्मकः ।
सामग्र्यभावे कार्यप्राप्तिरशक्तेतिमत्वाह दुःखमिति योगयुक्तत्वं व्याचष्टे वैदि
केनेति ईश्वरस्वरूपस्यमननविशेषस्यानिशेषः ब्रह्मेति व्याख्येयं परमपादाय
व्याचष्टे प्रकृत इति तत्र ब्रह्मशब्दप्रयोगे हेतुमाह परमात्मेति लक्षणाशब्दो ।
गमकविषयः संन्यासे ब्रह्मशब्दप्रयोगे तैत्तिरीयकश्रुतिं प्रमाणयति न्यास
इति कथं संन्यासी हिरण्यगर्भवाची ब्रह्मशब्दं प्रयुज्यते द्वयोरपि परत्वाविशे
षादित्याह ब्रह्महीति ब्रह्मशब्दस्य संन्यासविषयत्वे फलितं वाक्यार्थमाह
ब्रह्मेत्यादिना नयाः श्रोतांस्मीवर्तिनमवगाणि कर्मभिरमितरां परिपक्वकषा
यस्य करणानि सर्वतो व्यावृत्तानि निरस्ताशेषकूटस्थप्रत्यगात्मान्वेषणाप्रव
णानि भवन्तीति कर्मयोगस्य परमार्थसंन्यासप्राप्त्युपायत्वे फलितमाह ब्रह्मेति ६

स्वामिकृतटीका

यदि कर्मयोगिनोऽप्यन्ततः संन्यासेनैव ज्ञाननिष्ठा तर्हि आदित एव संन्यासः
कर्तव्य इति मन्वानं प्रत्याह संन्यासस्त्विति अयोगतः कर्मयोगं विना संन्या
सः प्राप्तुं दुःखं दुःखहेतुरशक्य इत्यर्थः चित्तशुद्ध्यभावेन ज्ञाननिष्ठायाः अ सं
संभवात् योगयुक्तस्तु शुद्धचित्तत्वान्मुनिः संन्यासी भूत्वा चिरेणैव ब्रह्मा
धिगच्छति अपरोक्षं जानाति अतश्चित्तशुद्धेः प्राक्कर्मयोग एव संन्यासाद्वि
शिष्यते इति पूर्वोक्तमित्यर्थः तदुक्तं वार्तिककृद्भिः प्रमादिनो बहिश्चित्ताः पिशुना सं
कलहोत्सुकाः संन्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशया इति ६ ॥

पैशाचभाष्यं

२,योगतः संन्यासः दुःखप्राप्यः

कर्मसंन्यासात्कर्मयोगो विशिष्ट इत्युक्तं कथं विशिष्यते अतः कर्मयोगो
विशिष्यत इत्युक्तं यतः योगयुक्तो मुनिः ज्ञानी ब्रह्म चिरेणाधिगच्छति प्राप्नो
ति ६ ॥

रामानुजभाष्यं

न भवति ज्ञानयोगस्त्वयोगतो कर्मयोगं संन्यासेयात् विशेषश्चेत्याह ज्ञानयोगा
स्तु योगादृते प्राप्तुमशक्यः योगयुक्तः स्वयमेव मुनिरात्ममननशील इ
ति सुखेन कर्मयोगं साधयित्वा अचिरेणाल्पकालेनैव ब्रह्माधिगच्छत्या
त्मानं प्राप्नोति ज्ञानयोगयुक्तस्तु महता दुःखेन ज्ञानयोगं साधयति
दुःखसाध्यत्वादात्मानं चिरेण प्राप्नोतीत्यर्थः ६ ॥

अभिनवगुप्तकृतटीका

रेकस्यैव प्रत्यगात्मत्वमपनस्यति योगीति पारमार्थिकः सम्यग्ज्ञानात्मकः।
सामग्र्यभावे कार्यप्राप्तिरयुक्तेति मत्वाह दुःखमिति योगयुक्तं व्याचष्टे वैदि
केनेति ईश्वरस्वरूपस्य सविशेषत्वेनेति शेषः ब्रह्मेति व्याख्येयं पदमुपादाय
व्याचष्टे प्रकृतमिति तत्र ब्रह्मशब्दप्रयोगे हेतुमाह परमात्मेति लक्षणशब्दो।
गमकविषयः संन्यासे ब्रह्मशब्दप्रयोगे तैत्तिरीयकश्रुतिं प्रमाणयति न्यास
इति कथं संन्यासो हिरण्यगर्भवाची ब्रह्मशब्दं प्रयुज्यते द्वयोरपि परत्वाविशे
षादित्याह ब्रह्म हीति ब्रह्मशब्दस्य संन्यासविषयत्वे फलितं वाक्यार्थमाह
ब्रह्मेत्यादिना न्यासः श्रौतं स्मार्तं च नित्यनैमित्तिककर्मभिरमितरां परिपक्वकषा
यस्य करणानि सर्वतो व्यावृत्तानि निरस्ताशेषबहुकटस्य प्रत्यगात्मान्वेषणप्रव
णानि भवन्तीति कर्मयोगस्य पारमार्थसंन्यासप्राप्त्युपायत्वे फलितमाह अत इति ९

स्वामिकृतटीका

यदि कर्मयोगिनोऽप्यन्ततः संन्यासेनैव ज्ञाननिष्ठा तर्हि आदित एव संन्यासः
कर्तव्य इति मन्वानं प्रत्याह संन्यासस्त्विति अयोगतः कर्मयोगं विना संन्या
सः प्राप्तुं दुःखं दुःखहेतुरशक्य इत्यर्थः चित्त[?]अभावेन ज्ञाननिष्ठाया अ शु
संभवात् योगयुक्तस्तु शुद्धचित्ततया मुनिः संन्यासी भूत्वा न चिरेणैव ब्रह्मा
धिगच्छति अपरोक्षं जानाति अतश्चित्तशुद्धेः प्राक् कर्मयोग एव संन्यासाद्वि
शिष्यत इति पूर्वोक्तमिति तदुक्तं वार्त्तिककृद्भिः प्रमादिनो बहिश्चित्ताः पि[?]नाः शु
कलहोत्सुकाः संन्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशया इति ९॥

पैशाचभाष्यं

ᵃ, योगतः संन्यासः दुःखं प्राप्यः

कर्मसंन्यासात्कर्मयोगो विशिष्ट इत्युक्तं कथं विशिष्यते ᵃ अतः कर्मयोगो
विशिष्यत इत्युक्तं यतः योगयुक्तो मुनिः ज्ञानी ब्रह्म नचिरेणाधिगच्छति प्राप्नो
ति ९॥

रामानुजभाष्यं

नभवति ज्ञानयोगस्त्वयोगतोऽकर्मयोगसंन्यासेऽयान् विशेषः स्यादह ज्ञानयोगा
स्त्वयोगादृते प्राप्तुमशक्यः योगयुक्तः स्वयमेव मुनिरात्ममननशीलः
सुखेन कर्मयोगं साधयित्वा अचिरेणाल्पकालेनैव ब्रह्माधिगच्छत्या
त्मानं प्राप्नोति ज्ञानयोगयुक्तस्तु महता दुःखेन ज्ञानयोगं साधयति
दुःखसाध्यत्वाद्दात्मानं चिरेण प्राप्नोतीत्यर्थः ९॥

अभिनवगुप्तकृतटीका

तस्माद्धेवथारयो भिन्नक्रमः योगरहितस्य संन्यासमाप्तुं दुःखमेव प्राँनी ३
त्याकर्मणो दुःसंन्यस्तत्वात् योगिभिस्तत्फलमप्येवैतदित्युक्तं प्राक् ६ ॥

परमार्थप्रपा

यदि कर्मयोगिनोप्यंततः संन्यासेनैव ज्ञाननिष्ठा तर्हि आदित एव संन्यासः
कर्तव्य इत्याशंक्याह संन्यासस्त्विति ६ भो महाबाहो अयोगतः कर्मयोगं विना
संन्यासः प्राप्तुं दुःखहेतुरेवाऽतः अतो योगयुक्तः सन् मुनिर्मननशीलः नचिरे
ण शीघ्रमेव ब्रह्माधिगच्छति अपरोक्षं जानातीत्यर्थः ६ ॥

वनमालीटीका

ननु प्रथमं संन्यासः एव मुमुक्षुणा कृतो न क्रियते ज्ञाननिष्ठाहेतुत्वेन तस्या
वश्यकत्वात् तत्राह संन्यासस्त्विति अयोगतः योगो मदाराधनरूप
स्तः करणशोधकैर्निष्कामकर्मानुष्ठानैस्तद्विना हठादेव कृतो यः संन्या
सः स तु दुःखमाप्तुमेव भवति अशुद्धान्तःकरणत्वेन तत्फलज्ञाननिष्ठा
या असंभवात् ज्ञानकर्मोभयभ्रष्टत्वं स्यादित्यर्थः कर्मयोगयुक्तस्तु शुद्धा
न्तःकरणतया मननशीलो मुनिः संन्यासी भूत्वा ब्रह्म हृद्गुहायामाविर्भू
तं हृद्गुहायामाविर्भूतं हृद्गुहाकं स्वस्वरूपं च नचिरेण शीघ्रमेव साक्षा
त्करोति प्राप्नोति च ६ ॥

ऊलमवैजयंती

कर्मयोगं विना केवलं ज्ञानयोगो दुःखहेतुरेव स्यात् कर्मयोगस्तु सुख
कर इत्याह संन्यासस्त्विति हे महाबाहो हे सामुद्रिकलक्षणपूर्वकषत्रुशात्रोः
वध्याशयो संन्यासो ज्ञानयोगो अयोगतः कर्मयोगं विना दुःखमाप्तुं केवल
दुःखप्राप्त एव भवति न तु सुखप्राप्तये योगयुक्तः कर्मयोगयुक्तो मुनिर्म
ननशीलं सन्न्यस्तः नचिरेणाति प्रमेव ब्रह्मात्मानमधिगच्छति प्राप्नो
ति आत्मनो ब्रह्मात्मकत्वाद्ब्रह्मशब्दाभिधेयता ब्रह्मव्याप्यत्वात् ब्रह्माधीनस्थि
तिप्रवृत्तिकत्वाद्ब्रह्माष्टविधकस्वरूपत्वाद्वा ब्रह्मरूपमात्मानमधिगच्छतीत्यर्थः ६

मधुसूदनीटीका अशुद्धान्तःकरणेनापि संन्यास एव प्रथमं कृतो ज्ञाननिष्ठाहेतुत्वेन कृत्वादिति चेन्न च

नुष्ठानमं अयोगतः योगमन्तःकरणशोधकं शास्त्रीयकर्म तद्विना हठादेव यः कृतः
संन्यासः स तु दुःखमाप्तुमेव भवति अशुद्धान्तःकरणत्वेन तत्फलस्य ज्ञाना
निष्ठाया असंभवात् शोधके च कर्मण्यनधिकारात् कर्मब्रह्मोभयभ्रष्ट
त्वेन परमसंकटापत्तेः कर्मयोगयुक्तस्तु शुद्धान्तःकरणत्वान्मुनिर्मननशी
लः संन्यासी भूत्वा ब्रह्म सत्यज्ञानादिलक्षणमात्मानं नचिरेण शीघ्रमेवा

गी॰ टी॰ पं॰ 31

धिगच्छति सांख्यात्वाक्करोति प्रतिबंधकाभावात् एतच्चोक्तं प्रागेव न कर्मणा
मनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छतीति अ
त्र पक्वफलत्वेपि कर्मसंन्यासात्कर्मयोगो विशिष्यत इति यदाशंकितं तदुप
पन्नं [illegible]
[illegible] ६॥

सदानन्दी टीका

किमर्थं कर्मसंन्यासो नादौ कार्यः स्यादुक्तं धीशोधकत्वेन कर्मसंन्यासो
योऽहृदाच्छतः सङ्गः स्वमात्मैव वास्तिबुद्धिशुद्धेरभावतः ज्ञानस्यासंभवात्क
र्मत्यागान्नुष्ठातो भवेत् १ कर्मानुष्ठानशक्त्या स्वशुद्धबुद्धितया मुनिः सत्व
ज्ञानुमननात्स्वमात्मानं ब्रह्मस्वरूपं व्रजेत २ धीश्च संप्रतिबंधे न सम्यक्त्वात्ताक
रोत्यसौ अतः पक्वफलत्वेपि संन्यासाज्ज्ञानवर्जितात् ३ श्रेयान्सकर्मयोगो
स्तिधीशुद्ध्यार्जनकारणं न कर्मणामनारंभादित्यत्र हरिणोक्तं ४ धी
शुद्धिहेतुं कर्म न त्याज्यमित्युदाहृतं चित्तशुद्धिमनेत्याग्यः करोति स्वक
र्मणां ५ सर्वशास्त्रापरित्यागी एतस्यैव न संशयः श्रुतिस्मृती ममैवाज्ञे तेउ
ल्लंघ्य प्रवर्तते ६ आज्ञाभंगी मम द्वेषी मद्भक्तोपि न वैष्णवः इति स्मृतौ हरे
राज्ञा वश्यं कार्यं तयोदिता ७ ६॥

नीलकंठेटीका

नन्वेवं निर्विकल्पस्यावश्यमपेक्षितो मार्गोऽज्ञो स्यान्नान्तःपन्था विद्य
तेयनायेति श्रुतिविरुद्धमित्याशंक्याह संन्यासस्त्विति संन्यासो नैष्कर्म्यं अयो
गतो योगं विनाप्त्वाप्तुं दुःखं हे महाबाहो अयमर्थः निर्विकल्पकसमाधि
रणितश्वमसौ त्येतद्वाकार्यं प्रतिपत्त्युपायभूतएव न स्वतः पुरुषार्थ इति द्वि
तीयमार्गस्याभावान्नोदाहृतश्रुतिविरोधः शांतोदांत उपरतस्तितिक्षुः स
माहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुत्यैव शमादिवत्समाधेरप्यात्मदर्श
नार्थत्वस्य दर्शितत्वात् तथा च समाहितपदं वार्तिककारैर्व्याख्यातं स्वांतं श्रोत्र
पुकर्तुः स्यात्करणाकरणां प्रति तान्येवतनिषिद्धानि कर्माणीह शमादिभिः
शमादिश्रुत्या अस्वातंत्र्यं तथैव स्यात्करणाकरणां प्रति समाहितोऽज्ञाश्चैतदा
नीतन्निरोधोविधीयते अस्वातंत्र्यं गुरूपदेशापेक्षत्वं येषु मानमेय व्यवहारनिरो
धेषु पिंडीकृत्येंद्रियग्रामं ब्रह्मवारोप्यति अलं विषयाकल्पस्तौ स्यक्तातिहे
चित्तवृत्तिरोधतः एषोभ्युपायः सर्वत्र वेदांतेषु प्रतिष्ठितः तत्त्वमस्यादिवाक्यार्थ
ज्ञानेनासत्यर्थमादरादिति एवं व्यतिरेकमुक्त्वान्वयमाह योगयुक्त इति मुनिः

संन्यासीनचिरेणशीघ्रमेवब्रह्माधिगच्छतिवाकथंवा मोक्षेण नतु
केवलसंन्यासी यथोक्तेनचसंन्यासमनोदेवसिद्धिमसमधिगच्छतीति ६

आनंदीटीका

हेमहाबाहो संन्यासस्तु भावितुंनैष्कर्म्यमयोगतः यो
गोज्ञानकर्मसमुच्चयरूपःकिंविनादुःखमाप्तुंदुःखमार्गप्रापकएवनत
निःश्रेयसकरः योगयुक्तोज्ञानकर्मसमुच्चययुक्तिसोमुनिर्मननशी
लोज्ञानीनचिरेणब्रह्माधिगच्छति तथाचायोगतोष्टांगयोगाभ्यासंविना
संन्यासःकर्मसंन्यासः कर्मफलसंन्यासोवादुःखमाप्तुंदुःखमाश्रयएव
भवति यस्तुयोगेनाभ्यंतरेणध्यानधारणसमाधिभिःसंयमेनवक्ष्यमा
णेनयुक्तःसब्रह्मनचिरेण धिगच्छति ६ ॥

रामकंठीटीका

तदाह अयोगतोयोगाद्यथोक्तनीत्याकर्मानुष्ठानसमाधानादिनासंन्यासःपु
नर्बंधसंबंधाभावफलः कर्मत्यागः प्राप्तुमा[illegible]साधयितुंदुःखंकष्टेनाप्य
तइत्यर्थः यस्माद्योगयुक्तः योगेकर्मसमाधौयुक्तोयथोक्तज्ञानेकतानत
यानित्यसंबंधः सन्मुनिर्भूत्वाशीघ्रमेवब्रह्मपरमात्मलक्षणंपरंतत्वमधि
गच्छति आत्मतयासमासादयति किमुक्तंभवतिज्ञाननिष्ठत्वेनस्वकर्मानु
ष्ठानंमुक्तित्वकारणं अल[illegible]प्रासिलस्यफलस्याछलाविसंवाद्यपाय
त॰ भूतत्वात् [illegible] ॥

यदुक्तंकर्मयोगोविशिष्यतेइति

लासिकी[illegible]टीका

तमेवविशेषमाह ॥

तदेवधारणोहेमहाबाहो अयोगत उक्तरीत्याकर्मानुष्ठानसमाधानादि
नासंन्यासोविकल्पास्फुरणेनकर्मत्यागःप्राप्तुंदुःखमेवाशक्यमेवाना
प्यतेइत्यर्थः सर्वसंकल्पदाहकत्वात्तद्धारणाधिरोहंविनाज्ञानीत्वा कर्मभ
गांदुः [illegible] संत्यसत्वात् अतोयोगकर्मसमाधानेयुक्तः संबंधो मुनिर्मननः
शीलः सदाप्रमत्तोब्रह्मनिरूपाधिकं परंतत्वंनचिरेणशीघ्रमेवाधिगच्छ
ति आत्मतयासमासादयति अतःकर्मयोगोविशिष्यते प्रथमोपायभूत
त्वात् [illegible] ६ ॥

पंचोलीटीका

तर्हिआदितएवसंन्यासःकर्तव्यइति मत्वानेत्याह संन्यासइति
हेमहाबाहोतत्वतः संन्यासःसर्वकर्मणांत्यागः अयोगतः ईश्वरार्पण।

गी॰
पं॰
टी॰

32

कर्मयोगयुक्तः

फलनिरपेक्षकर्मविना दुःखमाप्तुं दुःखाय भवति योगयुक्तः मुनिः
ब्रह्मवित् अचिरेणातिशीघ्रं मुनिर्मननशीलः संन्यासी भूत्वा ब्रह्म सत्य
ज्ञानादिलक्षणमात्मानं शीघ्रमेवाधिगच्छति क्षिप्रमेव ब्रह्म परमार्थ
ज्ञानहेतुसंन्यासं वा अधिगच्छति प्राप्नोति ६ ॥

रणवीरसमिद्धायिनी ॥

ननु कर्मयोगस्य कर्मसंन्यासं विनाप्यस्त्येव सिद्धिरुक्ता निर्णयेन त
दुत्तरत्वलक्षणभावित्वात् कर्मसंन्यासस्य तु प्रागेवोत्पत्तेः कथमित
दं विना सिद्धिरित्यर्जुनाभिप्रायमाशंक्य केवलस्य निषिद्धकर्मसं-
न्यासस्य न प्रवृत्तिनिमित्तीभूतप्रयोजनवत्त्वं विहितकर्मानाचरणे
योगातिलक्षणप्रत्यवायदर्शनादित्यभिप्रायेणोत्तरयति संन्यासस्त्वि
ति हे महाबाहो अर्जुन अयोगतो विहितकर्मयोगं विना संन्यास उक्त
लक्षणः स्ववर्णाश्रमेषु तिनिषिद्धानां वर्णान्तरोचितानां तपस्याकृ-
षिवाणिज्यादीनां कर्मणां यमेऽयमेव धर्मकायात्मकानां मानसिकव्या
पाराणां च त्यागः स दुःखं राज्यभ्रंशापकीर्त्यादिलक्षणमैहिकं नरका
दिलक्षणं पारत्रिकं च आपयितुं नेय इति योषः अन्तर्भावितण्यर्थोऽया-
पिः अतस्तु संन्यासो विहितकर्मप्रवृत्तिलक्षणयोगनिष्पत्तिफल
को योगस्त्वोभयलोकप्राप्तिफलक इति साक्षात्परंपरयापितयोरे
कफलत्वमेवेति तयोरनैकान्तिकत्वमिति भावः तदेतदाह योग
युक्त इति मुनिर्गुणमण्डवाक्येमंता कथं भीष्ममहं संख्ये इत्यादि
प्रकारपर्यन्तयोगे युजोऽषमास्थितस्वदृढनिश्चयः क्षत्रियवीरः यो
गयुक्तः कर्मसु प्रवृत्तिमान् सन् ब्रह्म यज्ञवेदसाध्यं राज्यस्वर्गोभय-
लोकभोगरूपं परमैश्वर्यात्मतत्त्वसायुज्यलक्षणापवर्गरूपं च
फलं शीघ्रमेवाधिगच्छति ६ ॥

मधुभाष्य

संन्यासस्त्विति योगाभावे मोक्षादिफलं न भवति अतः कामज
यादि दुःखमेव तस्य मोक्षाद्येवादिफलं अन्यत्तत्फलमल्पत्वाद

फलमेवेत्याशयः तथोक्तं विनामोक्षफलं यत्तु न तत्फ
लमुदीर्यत इति पाठे यत्तु महत्फलयोग्यं तत्स्यात्स्वल्पंफल
मेवन भवति यथा पक्वस्य रागस्य तंडुलव्रीहिः महत्फलस्य
योगस्तु तस्य तेनान्यायमदत्यादि ९ ॥

भाषा अनुवाद

जोऐसाहै कि योगी लोगों कोभी शीघ्रमे संन्यास हीसे ज्ञाननिष्ठा होती औरज्ञानके द्वारामोक्षपद पावते तोफेर संन्यास से कर्मयोग को अधिकक्यों पीछे कहा उचितहै कि प्रथमहींसे सन्यासकरै इससंशय युक्त अर्जुनके प्रति भगवान कहतेहैं किप्रथम कर्मयोगके किये विना हेमहा बाहो अर्जुन संन्यासका अभ्यास करनाअति कठिन औ दुःखकामूलहै क्योंकि चित्तशुद्ध भयेबिना ज्ञान होना असंभव है परन्तु कर्मके अनुष्ठान करने वाले मुनि लोग चित्तशुद्धिके द्वारा संन्यासी होय अर्थात् कर्म छोड़कर अविरातकरै शीघ्रही ब्रह्मपद को प्राप्त होतेहै याने ब्रह्म रूप होजातेहैं इससे चित्तशुद्धिके पहले निष्काम कर्म करना हीसन्यास से श्रेष्ठ होता है ६॥

दोहा॥

विनायोगसंन्यासनरदुखसेंप्रापतहोय जोमुनियोगहियुक्त
है सोब्रब्रह्महोय सोय ६॥

34

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः सर्व
भूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ७ ॥

शांकरभाष्यं

यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायत्वेन योगेति योगेन युक्तो विशुद्धात्मा वि
शुद्धसत्त्वो विजितात्मा विजितदेहो जितेंद्रियश्च सर्वभूतात्मभूतात्मा सर्वेषां ब्र
ह्मादीनां स्तंबपर्यंतानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य स सर्व
भूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः स तत्रैवं वर्तमानो लोकसंग्रहाय कर्म कु
र्वन्नपि न लिप्यते योगयुक्तो न कर्मभिर्बध्यत इत्यर्थः ७ ॥

आनंदगिरिटीका

ननु पारिव्राज्यपरिशिष्टश्रवणादिसाधनमसकृदनुतिष्ठतो लब्धसम्यग्बोध
स्यापि यथापूर्वं कर्माण्युपलभ्यंते तानि च बंधहेतूनि भविष्यंतीत्याशंक्य ।
श्लोकांतरमवतारयति यदा पुनरिति सम्यग्दर्शनप्राप्त्युपायत्वेन यदा पुनरयं
पुरुषो योगयुक्तत्वादिविशेषणः सम्यग्दर्शी संपद्यते तदा प्रातिभासिकीं ।
प्रवृत्तिमनुसृत्य कुर्वन्नपि न लिप्यते इति योजना योगेन नित्येन नैमित्तिकेन क
र्मानुष्ठानेनेति यावत् आदौ नित्याद्यनुष्ठानवतो रजस्तमोमलाभ्यामकलु
षितं सत्त्वं सिद्ध्यतीत्याह विशुद्धेति बुद्धिशुद्धौ कार्यकरणसंघातस्यापि स्वाधी
नत्वं भवतीत्याह विजितेति तस्य यथोक्तविशेषणवतो जायते सम्यग्दर्शित्व
मित्याह सर्वभूतेति सम्यग्दर्शी न तर्हि कर्मानुष्ठानेऽज्ञत्वं तदनुष्ठाने वा ज्ञा
नोद्बंधविश्लेषसिद्धिरित्याशंक्याह स तत्रेति सम्यग्दर्शने सम्यर्थः ७ ॥

स्वामिकृतटीका

कर्मयोगादिक्रमेण ब्रह्माधिगमं सत्यपि तदुपरितनेन कर्मणा बंधः स्या
देवेत्याशंक्याह योगयुक्त इति योगेन युक्तः अत एव विशुद्धः आत्मा चित्तं यस्य
अत एव विजित आत्मा शरीरं यस्य अत एव विजितानींद्रियाणि येन त
तश्च सर्वेषां भूतानामात्मभूत आत्मा यस्य सः लोकसंग्रहार्थं स्वाभावि
कं वा कर्म कुर्वन्नपि न लिप्यते नैव बध्यत इत्यर्थः ७ ॥

पैशाचभाष्यटीका

अतो योगयुक्तो विशुद्धात्मा प्राप्तसत्त्वशुद्धिः विजितात्मा रागद्वेषाभ्यामना
कृष्यमाणः जितेंद्रियः सर्वभूतात्मभूतात्मा सर्वेषु भूतेष्वात्मैकत्वदर्शी
कर्माणि कुर्वन्नपि तत्फलेन न लिप्यते न संबध्यते ७ ॥

रामानुजभाष्यं

गी॰ टी॰ पं॰ 35

योगयुक्त इति योगयुक्तस्त्व शास्त्रीयपरमेश्वराराधनरूपे विशुद्धे कर्म
णि वर्तमानमनस्त्वेन विशुद्धमनाः विजितात्मा स्वाभ्यस्ते कर्मणि ध्यानमनः
स्त्वेन स्ववेन विजितमनास्ततएव विजितेंद्रियस्माकर्तेरात्मनो याथात्म्ये
नैथानतिष्ठतया सर्वभूतात्मा सर्वेषां देवादिभूतानामात्मभूत आत्मा यस्य स
सौ सर्वभूतात्मभूतात्मा आत्मयाथात्म्यमनुसंदधानस्य हि देवादीनां स्वस्मा
देकाकारत्वाद्देवादिदेहानां प्रकृतिपरिणामविशेषरूपतयात्माकारत्वासं
भवात् प्रकृतिविमुक्तः सर्वत्र देवादिदेहेषु ज्ञानैकाकारतया समानाकार इति
निर्दोषं हि समं ब्रह्मेत्यनेनैतरवसते सएवंभूतः कर्म कुर्वन्नपि अनात्मन्यात्मा
भिमानेन न लिप्यते अतो न विरेणात्मानमाप्नोतीत्यर्थः अतः सौकार्या क्लेशा
त्वकर्मयोगएवश्रेयान् ७॥

अभिनवगुप्तकृतटीका उपक्रमे ७ स्पष्टार्थम्

परमार्थप्रपाटीका

अथोक्तप्रमेये दृष्टौ कुर्वन्कर्मलेपाभावक्रममाह योगयुक्त इति योगे
न कर्मयोगेन युक्तो निष्प्रयुक्तो योगयुक्तः ततएव विशुद्धात्मा चित्तयस्य
सतएव तद्वशवर्ती विशुद्धात्मा देहो येन स ततएव तत्संसक्तानि जितानींद्रि
याणि येन स तथाभूतः सर्वभूतानामात्मभूत आत्मा यस्य सर्वेषु भूतेषु समत्व
दर्शीनाद्दृशः प्रमानकर्म कुर्वन्नपि न लिप्यते न बध्यते ७॥

वनमालीटीका

नै॰ ननु कर्मणामवश्यं जनयितृत्वात्कर्म बंधकत्वश्रवणात्कथं तेनामोक्ष इत्याह यो
गेति फलेष्वासक्त्या परमेश्वराराधनरूपकर्मयोगेन युक्तो विशुद्धात्मा रजस्तमो
भ्यामकलुषितमना अतएव जितवाह्यांतरेंद्रियवात्तस्मात्स योगयुक्तोपिए
तादृशस्य तत्त्वज्ञानमवश्यंभवतीत्याह सर्वेति सर्वभूतानामात्मभूतेमय्येश्व
रे सर्वांतर्यामिणि आत्मा मनो यस्य सः सर्वभूतात्मभूतात्मा एषत आत्मांतर्
याम्यमृत इति श्रुतेः अंतर्यामिणा एवकारितत्वं तस्य स्वतोकर्तृत्वस्य च ज्ञात
त्वात्कर्मफलालेपाभावात्ततः करणाशुद्ध्यासंन्यासवत्तत्त्वज्ञानामिति भावः
मुमुक्षुत्वादशायां साधनत्वेन जीवन्मुक्तिदशायां प्रारब्धकर्मवशात् किंमासाणा यै॰
न्यपि कर्माणि न लिंपंते स्वस्य स्वतोकर्तृत्वानुसंधानादिति भावः ७॥

कुसमवैजयन्ती

यदि दृशः स्यात्सर्वभूतानां प्रियतरस्त्याह योगयुक्त इति योगी फलानुसंधान
रहितेमदाराधनलक्षणकर्मयोगयुक्तोऽविरतप्रीतियुक्तः कृतएततयतोवि

शुद्धात्मा विशेषेण शुद्धो विषयवासनारहितः आत्मा मनो यस्य सः भगवद
र्पणतन्त्रेण कर्मणा निर्मलीकृतान्तःकरण इत्यर्थः ततश्च विजितात्मा
विशेषेण जितः स्ववशीकृतः आत्मा मनो येन सः अत एव जितेंद्रियः जिता
नि स्वाधीनकृतानींद्रियाणि बाह्यानि दशेंद्रियाणि येन तथा सः सर्वेषां प्रा
कृतवस्तूनां ग्रामीणानामप्यत्र इत्यर्थः अत एव सर्वभूतात्मभूतात्मा सर्वेषां भू
तानां प्राणिनामात्मभूतः प्रियतर आत्मा देहो यस्य तथा सः यद्वा सर्वेषां
ब्रह्मादिस्थावरांतानां भूतानां जीवानामात्मभूतः स्वरूपरूपः आत्मा स्वस्वरू
पो यस्य तथा सः प्रकृतिकार्यरूपविविधदेहेंद्रियादिसंयुक्तेन नानाविधा
कारदृश्यमानेनापि स्वस्य च सर्वेषां जीवानामात्मनो प्रकृतिसंसर्गविरहितत्वेन
तुल्यानंदरूपताज्ञानादिधर्माश्रयतावपरतंत्रसत्ताकतावाणुपरिमाणक
तावस्वरूपसमानाकारवदित्यर्थः निर्दोषं हि समं ब्रह्मेति वक्ष्यमाणत्वात्
एवंभूतो मुमुक्षुः कर्म कुर्वन्नपि प्राकृतेषु नात्मस्वदेहादिष्वहंकर्तेत्याकार
केनाभिमानेन न लिप्यते किं त्वात्मानं प्राप्नोतीति तस्मात्कर्मयोग एव श्रेयस्कर इत्यर्थः ७

ननु कर्मणो बंधहेतुत्वाद्योगयुक्तोऽपि निर्बं **मधुसूदनी टीका** स्याद्विगच्छतीत्यत्र उपपन्न मित्यत आह

भगवदर्पणफलाभिसंधिराहित्यादिगुणयुक्तः शास्त्रीयकर्मयोग इत्यु दित्या
च्यते तेन योगेन युक्तः पुरुषः प्रथमं विशुद्धात्मा विशुद्धो रजस्तमोभ्यामक शु
लुषित आत्मा अंतःकरणरूपं सत्वं यस्य स तथा निर्मलांतःकरणः सन् वि
जितात्मा स्ववशीकृतदेहः ततो जितेंद्रियः स्ववशीकृतसर्वबाह्येंद्रियः एते
न मनोवाक्कायदंडी कथितः वाग्दंडोऽथ मनोदंडः कायदंडस्तथैव च यस्यैते
नियता दंडाः स त्रिदंडीति कथ्यते वागिति वागिंद्रियोपलक्षणमेतादृशस्य
तत्वज्ञानमवश्यं भवतीत्याह सर्वभूतात्मभूतात्मेति सर्वभूतस्य आत्मभूतस्य
आत्मा स्वरूपं यस्य स तथा अजडजडात्मकं सर्वमात्ममात्रेण पश्यतीत्यर्थः स त्रि
र्वेषां भूतानामात्मभूत आत्मा यस्येति व्याख्याने तु सर्वभूतात्मेत्येतावतैव
वार्थलाभादात्मभूतेत्यधिकं स्यात् सर्वात्मपदयोर्जडाजडपरत्वे तु समंज
सं एतादृशः परमार्थदर्शी कुर्वन्नपि कर्माणि परदृष्ट्या न लिप्यते तैः कर्म
भिः स्वदृष्ट्या तदभावादित्यर्थः [illegible] ॥ ॥ ॥

सदानंदी टीका

कर्मणो बंधकत्वात्कथं मोक्षहेतुता इत्याकांक्षायां कर्मफलासं

गी॰ टी॰ प

36

गाविवर्जिते १ योगश्चाख्यातेतेनयुक्तः सम्यगेततः रजस्तमोमलात्सु
शुद्धसत्त्वंयस्यसशुद्धधीः २ स्ववशीकृतदेहः मनस्स्वाधीनकृतेंद्रियः एतेन
मनुजेनाक्रांतविरूपीहरियोगस्थितः ३ वाग्दंडोथमनोदंडः कायदंडस्तथैव
च यस्यैतेनियतादंडाः सत्रिदंडीतिकथ्यते ४ सर्वेंद्रियपरांस्त्रवाकथा
होऽस्तिमनुष्यस्यतो ईदृशस्यभवेदेवतत्त्वज्ञानमितीर्यते ५ यस्यात्मासर्व
भूतानामात्मभूतः सर्वद्रष्टा आविशाद्वैतनिष्ठः संसृष्टके भेदमतिःभ्रमा
त् ६ सर्वभूतस्यात्मभूतश्चात्मायस्येतिविग्रहे जडाजडात्मकेविश्वंप
श्यन्नात्ममयंमुनिः ७ उभयत्राप्यविरोधीवोयमिद्धिरितीरिता ईदृशा

द॰ स्तत्कुर्वन्नपिलोकदृष्ट्याक्रियाः ८ ताभिर्नलिप्यतेयस्मात्स्वदृष्ट्यातद
भावतः ९ १० ॥

नीलकंठीटीका

योगेति योगेननिर्विकल्पसमाधिनायुक्तोयोगयुक्तः अतएवविशु
द्धात्माहतनिःशेषदोषेणहीनः आत्माप्रत्यक्चेतनोयस्य निर्विकल्पा
वस्थायांकेवलएवचेतनोस्तिनान्यदित्युक्तं तदाहद्रष्टुः स्वरूपेवस्थानेहंतिसा
रूप्यमितरत्रेति तदाहंत्वभावे इतरत्रवृत्तिकालेइतिसौत्रपदद्वयार्थः अत्र
हेतुः यतोयंविजितात्माविजितचित्तोजितेंद्रियश्च एवंशुद्धत्वंपदार्थमुक्त्वा
तस्यतत्पदार्थाभेदमाह सर्वभूतात्मेति सर्वेषांभूतानांब्रह्मादिस्तंबप
र्यंतानांविषयदारीणांचेतनाचेतनानामात्मभूतः उपादानत्वेनस्वरूपभू
तः कनकमिवकुंडलादीनांस्वरूपभूतेकारणानन्यत्वात्कार्यस्य सर्वभूता
त्मभूतआत्माप्रत्यक्चेतनोयस्यससर्वभूतात्मभूतात्मा यत्तुसर्वेषां
भूतानांआत्मभूतआत्मायस्येतिभाष्येसर्वभूतात्मेत्येतावतैवार्थलाभा
दात्मभूतइत्यधिकमितिद्रष्टव्यं स्वयंचसर्वभूतआत्मभूतआत्मायस्येति
विग्रहोदर्शितः तत्रसंकोचेकारणाभावात्सर्वपदेनैवविजुगुप्सयोर्ग्रहे
परस्यापिआत्मभूतइत्यधिकमेव सर्वभूतश्चेतनाचेतनप्रपंचभूतआत्मा
यस्येतितत्रापीष्टार्थलाभात् सर्वंचआत्मानभूतइत्यात्मायस्येतिवि
ग्रहेसर्वात्मभूतात्मेत्येतावतैवसिद्धत्वाद्यमभूतपदस्यवैयर्थ्यंचभाष्य
मतेब्रह्मादीनामप्यात्मभूतआत्मायस्येतिश्रुत्यैवजीवेशाभेदउच्यते परस्य
तुउपादानत्वलिंगेनजडमात्राधारणेनजीवस्यब्रह्माभेदावगमइतिवि

हृद्विरविनयः तत्वतः यतो यस्मै वैधाप्र संगात्मा अतोऽहमिव सोपि कुर्वन्न
पि न लिप्यते असंगात्मत्वात् नाहं कर्ता देवोपि नत्वाव बुध्यानेन तस्मातो नाव पिउ
त्वात देहोऽग्नेरगवद्वायकत्वाच्चेत्यर्थः ७॥

आनंदटीका

अतः परमाभ्यंतरमेव संयमयोगं प्रपंचयति योगयुक्तः विशुद्धात्मा
विशुद्धो विमल आत्मा बुद्धिर्यस्य विजितः संयमेन वशीकृत आत्मा
येन एवं जितेंद्रियः एवं सर्वेषु भूतेषु च तत्तद्देशाविधेषु आत्मभूतः सं
क्रांत्युत्क्रांतिसामर्थ्याद्धृत्यमाणस्य यो महाविदेहाख्याया हृत्यात्त
त्तत्कायावेशेन कर्मभोगार्थं संपन्न आत्मा यस्य स कुर्वन्नपि न लि
प्यते ७॥

रामकंठटीका

+ यतो योगयुक्तः कुर्वन्नपि कर्माणि न लिप्यते ततो न चिरेणाब्रह्माधिगच्छतीति सं कस्माद्योगयुक्त ब्रह्मनचिरेणाधिग
बंधः तदेतद्व्याख्यायते योगे ज्ञानकर्मसमुच्चयानुष्ठानसमाधौ युक्तस्तत्प
रतया नित्यसमाहितो योगी संमाविशुद्धाविशेषेणासमाचरन्नपि स्वकर्मवे
पक्षेत नात्तत्फलेन स्वाभाव्यात्मना न लिप्यते न मलिनात्मतां नीयते यतोसौ वि
शुद्धात्मा हेयत्वयैकलत्वसाधो याति सर्गातिर्निर्मलचिन्मात्रस्वरूप आत्मा तस्यैताव
त्यशुद्धिर्यदनाद्यविद्यावशाद्धेयैकस्वरूपे जात्यादिविविधपरिच्छेदभाजि प्रति
नियते देहमात्रे स्वात्मप्रतिपत्तिः तदभावमात्रमेवास्य विशुद्धिः इत्थं विशुद्धस्या
त्मा यस्य स तथाविधः सत्यस्वभावप्रतितिष्ठितात्मभावतया प्रामस्वभाविकप्र
सादस्तत्यर्थः ततश्च विजितात्मा जितेंद्रियश्च आत्मेंद्रियशब्दाभ्यां ज्ञानक्रियाशब्दा
भ्यां ज्ञानक्रियाप्रपंचो विवक्षितः सउभयात्मापि विजितः स्वशक्तित्वेन स्वेच्छा
विधेयप्रवृत्तिनिवृत्तित्वाद्वशीकृतो येन सपरद्वयेन तथोक्तः एवं हि योगयुक्तः
प्रज्ञा १ कर्मयोगी सत्तामात्क्रियासु वर्तमानोपि मुच्यते येयमकृत्रिमप्रकाशात्मक
स्वभावपरामर्शैकरूपा समाधिरिति क्रियाशक्तिः सैव स्वेच्छानिर्मितज्ञेयकार्यस्व
भावविषयप्रकाशनाय प्रसरंती ज्ञानक्रियाभेदेन द्विप्रकारतयावभासते तस्या
ज्ञानरूपो यो भेदः सोंतःकरणवर्गो यः क्रियारूपः स बहिष्करणवर्ग इति स्वयमस्य
यथा प्रभारूपाशक्तिः किरणचक्रात्मनावभासते तथैवेयं मम शक्तिरेवांतःकर
णबहिष्करणभावेन विजृंभते न च प्रकाशमानत्वेन सम्यग्देशामृतत्वरवा स्वरू
पैर्विषयैरेषा कलुषीकर्तुं पार्यते न हि दिनकरकिरणाः प्रकाशरूपे नीलपीतादि
भिर्भावभेदैः स्वाभासेनोपरंजयितुं शक्यन्ते स्वतंत्राप्यवतान्यप्रकाशयन्तीति

गी॰ टी॰ पं॰

37

तथैवैतेऽन्तःकरणादिरूपाः शक्तिभेदा ममैवेति विजितात्मा जितेन्द्रियश्च
तत्त्वेवमपि विशुद्धात्मत्वादिव्याख्यातविशेषणविशिष्टत्वेनोपपद्यते कर्मयो
गिनो यतो विषयप्रवृत्तिस्तेभ्यश्च निवृत्तिरुपादेयत्वहेयत्वविज्ञानं संभवति तत्
संभवे च रागद्वेषकलङ्कोऽतुर्निवारः तस्मिन्सति कुतो विशुद्धत्वादीत्यत्र परिहारार्थं
हेतुगर्भं विशेषणमाह ॥ सर्वभूतात्मभूतात्मेति सर्वाणि भूतान्यशेषाः स्था
वरजंगमाभावमापन्नाः पदार्थास्तेषामात्मभूतः स्वरूपत्वं प्राप्त आ विषय त्मा
स्वभावो यस्य स तथाविधः किमत्र तात्पर्यम् कर्मयोगी किल येषु विषयेष्वन्त
र्बहिष्करणप्रवृत्तिद्वारेण प्रवृत्तिनिवृत्ती भजते तेषु तस्य यथोक्तज्ञाननिष्ठात
त्त्वादेवंविधा स्थिरा प्रतिपत्तिः यथा यदमी चेतनाचेतनरूपाः पदार्था वि
षयमापन्नास्ते संवेद्यमाना न तावत्व्यतिरेकेण न तन्मत्स्वरूपं प्रतिलभंते ततश्च
चिदेव तेन तेन रूपेणावभासते तत्त्वतो नैतद्वस्त्वन्तरं किंचिदिति परमेश्वरप्र
सादापनीतमायातिमिरत्वादेकस्मिन्परमार्थसत्यात्मतत्त्वे निहृत्य द्वित्वावभा
सविभ्रमया सम्यग्दृष्ट्या सर्वमन्तःकरणबहिष्करणविषयात्मकं पदार्थजातं
परमात्मस्वरूपादनन्यतमभिन्नतया निभालयन्योगयुक्तः सहजात्मसुखास्वादवि
हितासक्तियास्य प्रवर्तमानो न त्वशुद्धात्मत्वादिविशेषणव्यभिचारं भजते [illegible]

कस्माद्योगयुक्तस्यैव ब्रह्मसम्प्राप्य लाक्षिकी ...रीका मित्यत आह ॥

योगकर्मानुष्ठाने युक्तो नित्यमात्मसमाहितः अत एव विशुद्धात्मा देहाद्य
हमिति प्रत्ययशून्य आत्मा स्वभावो यस्य स स्वरूपप्रतिष्ठ इति यावत् अत एव
विजितात्मा विजितो वशीकृत आत्मा स्वस्वभावो येन सः अत एव विजिते
न्द्रियो वशीकृतान्तवर्गः ततः सर्वभूतात्मभूतात्माभ्यासक्रमेण सर्वेषां भू
तानां स्थावरजंगमानामात्मभूतः स्वरूपत्वमाप्तः आत्मा स्वस्वभावो यस्य
स एवंविधो योगी कर्म कुर्वन्नपि न लिप्यते पुण्यपापादिकलंकितवासनया
न मलिनीक्रियते ब्रह्मभावापन्नत्वात् [illegible] ७ ॥

पंचोलीटीका

कर्मयोगादिक्रमेणब्रह्माप्तिगमेसत्यपितदुपचितेनेनकर्मणांबंधः स्यादित्याशंक्याह योगयुक्तइति योगयुक्तः कर्मयोगयुक्तः विशुद्धात्माविशुद्धबुद्धिर्विजितात्माविजितदेहः जितेंद्रियः सर्वभूतात्मभूतात्मासर्वेषांब्रह्मादीनामात्मभूतः आत्मायस्यसः लोकसंग्रहार्थं कर्मकुर्वन्नपिनलिप्यते ७॥

रसावीरसमिद्धोधिनी॥

उक्तमेवार्थंद्रढयति योगयुक्तइति योगयुक्तः कर्मसुप्रवृत्तिमान् विशुद्धात्मानिष्कपटप्रवृत्त्यायोग्यतयानिर्मलबुद्धिः यतोविजितात्मा विजितआत्मामनोयेनस्वायत्तीकृतेन्द्रियांतःकरणइत्यर्थः सर्वेषांभूतानांप्राणिनामात्मभूतः परमेश्वरस्तत्रात्माबुद्धिर्यस्य ससर्वभूतात्मभूतात्मापरमेश्वरमेवप्रारणीकुर्वाणइत्यर्थः यद्वा सर्वस्यजगतोभूतेयुक्तेस्मादाहृतेभूतेप्राणातीतेसमेविश्चित्यनुपश्यसनायुक्ते उष्टदमनेनातिहिते आत्मनियत्नेभूतः संपन्नआत्मा बुद्धिर्यस्यजगच्छ्रेयोविधानार्थंदुष्टदमनरूपेयत्नेप्रवृत्तबुद्धिरित्यर्थः यद्वासर्वत्रब्राह्मणश्वपाकादौभूतः समआत्माबुद्धिस्तेनात्मनाकरणभूतेनभूतोयुक्तः सर्वस्यतरआत्मायत्नोयस्यब्राह्मणत्वादिकंविहायतत्ताधिक्रमंगीकृत्यकृतयाचन्नप्रयोगइत्यर्थः वक्ष्यतिच विद्याविनयसंपन्नइत्यादि यद्वासर्वेषांभूतानामात्मभूतोधृतिभूतोधैर्यावलंबनभूत आत्मादुष्टनिग्रहरूपोयत्नोयस्यस्वयत्नेनदुष्टराजांतरकृतान्यायदंडानुपद्रवापसारणात्संतोषितसर्वलोकइत्यर्थः सगुरुवधादिकं कुर्वन्नपिनलिप्यतेपापैरितिशेषः ७॥

मथभाष्य

38 योगयुक्त इति सर्वभूतात्मभूतः परमेश्वरः यद्वाप्नोतीत्यादेः
सत्रात्मभूतः स्वसमीपमत्यागेनादि कर्त्तायस्य ससर्वभूता
त्मभूतात्मा संन्यासस्य प्रयति उनः श्लोकद्वयेन संन्यासयोग
युगपवकर्मण्यपनलिप्यतइत्याह ७॥

भाषा अनुवाद

जो ऐसा कहो कि कर्मके अनुष्ठान से चित्तशुद्धि प्रभृति परम्परा प्रणाली क्रमसे ब्रह्मज्ञान होनेके अनन्तर इस ज्ञानीका पूर्वकृत कर्म प्रतिबंधक क्यों न होय इस आशंका पर कहते हैं कि जो पुरुष योगयुक्त अर्थात् निष्काम कर्मयोग रूप भक्ति अनुष्ठान करता है और जिसने चित्त तथा इंद्रियगण अपने वशीभूत कर राखा है और जो अपने आत्मा को शरीरधारी दूसरे प्राणियोंके आत्मा से । भिन्नबुद्धि न करके सर्वभूतमे टिका जो चेतन रूप आत्मा तिसको अद्वैत कहे एकरूप विचार कर देखते हैं इसीसे वे लोग शुद्धचित्त मिलाके अर्थ अथवा सभाव आधीन सोच मिला आदि जो सव कर्मोंको करते हुये भी उन कर्मोंमे लिप्त नहीं होते न कर्म उनको लगते हैं ७ ॥

दोहा

योगसहित शुधबुद्धि मनजीत जितेंद्रि जोय ईश्वरमें दृढबुद्धि
जो करत लिपें नहि सोय ७ ॥

39

नैवकिंचित्करोमीतियुक्तोमन्येततत्ववित् पश्यञ्शृ
ण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ८ ॥

शांकरभाष्यं

नचासौपरमार्थतः करोतीत्यत नैव किंचित्करोमीति युक्तः समाहितः सन्मन्येतचिंतयेत् तत्वविदात्मनोयाथात्म्यं तत्वंवेत्तीति तत्ववित् परमार्थदर्शीत्यर्थः कदाकथंवातत्वमवधारयन् मन्येतेत्युच्यतेपश्यन्निति मन्येतेतिसर्वेणसंबंधः ८॥

आनंदगिरिकृतटीका

कर्माण्यंगीकृत्यतैरस्यविशेषोबन्धो नास्तीत्युक्तमिदानीं वस्तुतस्तस्य कर्माण्येवन संतीत्याह नचेति लोकदृष्ट्याविदुषोपिकर्माणिसंतीत्याशंक्य स्वदृष्ट्या तदभावमभिप्रेत्याहनैवेति सार्द्धमनंतरश्लोकमाकांक्षापूर्वकमुत्थापयति कदेत्यादिना चक्षुरादिभिर्ज्ञानेंद्रियैर्वागादिकर्मेंद्रियैः प्राणादिवायुभेदैरंतःकरणचतुष्टयेनचतत्तच्चेष्टानिर्वर्तनावस्थायांतत्वदर्शीसर्वाप्रवृत्तिरिंद्रियाणामेवेत्यनुसंदधानोनैवकिंचित् करोमीतिविद्वान्प्रतिपद्यते इत्यर्थः ८

स्वामिकृतटीका

कर्मकुर्वन्नपिनलिप्यतइत्येतद्धिकथमित्याशंक्यकर्तृत्वाभिमानाभावान्नविरुद्धमित्याह नैवेतिद्वाभ्यांकर्मयोगेनयुक्तःक्रमेणतत्वविद्भूत्वादर्शनश्रवणादीनिकुर्वन्नपिइंद्रियाणींद्रियार्थेषुवर्तंतइतिधारयन् बुद्ध्यानिश्चिन्वन्नैव
किंचिदपिअहंनकरोमीतिमन्येत तत्रदर्शनश्रवणस्पर्शनघ्राणाशनानिच
क्षुरादिज्ञानेंद्रियव्यापाराःगतिःपादयोःस्वापोबुद्धेःश्वासःप्राणस्य ८ ॥

पैशाचभाष्यं

यतएवमतःनैवेति आत्मनोऽकर्तृत्वान्नैवकिंचिदहंकरोमीतिमन्यते तद्दर्शनादिषुकर्तृत्वस्याविचारतःप्रतिभासेष्वपिपश्यन्रूपमालोचयन् शृण्वन्शब्दंशृण्वन्जिघ्रन्गंधानुपाददानःअश्नन्नोदनान्भुंजानःगच्छन्पदाविहरन् स्वपन्शयानःश्वसन्श्वासंविसृजन्नपि ८॥

रामानुजभाष्यं

प्रतस्तदपेतितंशृणु एवमात्मतत्ववित्श्रोत्रादीनिज्ञानेंद्रियाणिवागादीनिकर्मेंद्रियाणिप्राणाश्चस्वविषयेषुवर्तंतइतिधारयन्ननुसंदधानोनाहं किंचित्न करोमीतिमन्येत ज्ञानैकस्वभावस्यममकर्ममूलेंद्रियप्राणसंबंधकृतमीदृशंकर्तृत्वंनस्वरूपप्रयुक्तमितिमन्येतइत्यर्थः ८॥

गी॰ टी॰ ५

40

अभिनवगुप्तकृतटीका [illegible] ८ सप्तार्थम्

परमार्थप्रपाटीका

अथ युक्तोऽपि न लिप्यत इत्यनेन कर्तृत्वाभिमानशून्यतया कर्म क्रियत इत्याह नैव किंचिदिति द्वाभ्यां कर्मयोगेन युक्तः शुद्धचित्तः क्रमेण तत्त्ववित्भूत्वा ज्ञानकर्मेंद्रियप्राणव्यापारेष्वप्यहं किंचित्करोमीति मन्येत ८॥

वनमालीटीका

संन्यासमेव स्पष्टयति नैवेति द्वाभ्यां युक्तो नियमितचित्तो नतरिंद्रियः तत्त्ववित् अहं ज्ञानानंदस्वरूपः स्वतो निर्विकारो नैव किंचित्करोमीति मन्येत तत्र दित्वात् इंद्रियैर्वागादिकर्मेंद्रियैः प्राणादिवायुभिरंतःकरणचतुष्टयेन चैतैर्येन ये यामिप्रेरितैस्तत्तच्छास्त्रक्रियमाणास्व हरिप्रेरितेंद्रियादीन्येवेंद्रियार्थेषु स्वस्वविषयेषु वर्तंते प्रवर्तंते नत्वहमिति धारयन् तत्र दर्शनश्रवणस्पर्शनघ्राणरसनानि चक्षुःश्रोत्रत्वग्घ्राणरसनानां पंचज्ञानेंद्रियाणां व्यापाराः पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्नित्युक्ताः गतिः पादयोः प्रलापो वाचः विसर्गः पायूपस्थयोः ग्रहणं हस्तयोरिति पंचकर्मेंद्रियव्यापाराः गच्छन्प्रलपन्विसृजन्गृह्णन्नित्युक्ताः स्वपन्निति प्राणादिपंचकव्यापारोपलक्षणं उन्मिषन्निमिषन्निति नागकूर्मादिपंचकस्योपलक्षणं अंतःकरणचतुष्टयस्य अनाद्यविद्यया जीवस्य प्रमोहः नाद्यदृष्टसंबंधस्ततो देहेंद्रियादिष्वीश्वरप्रेरितेषु जायमाने कर्मादिकं प्राकृतसंबंधेन वास्तवं जीवसंबंधेनेतो स्य संसारः निःकामकर्मयोगादिनाराधितेश्वरप्रसादाद्विद्यानिवृत्तिस्ततो देहेंद्रियतज्जन्यकर्मादिष्वहंममेत्यभिमाननिवृत्त्याभिमानघटितस्य स्वस्वामित्वादिसंबंधस्य जीवांतःकरणयोरभावेन कर्मादृष्टसुखदुःखादिकं प्रारब्धकर्मादिवशाद्देहादौ तेन ज्ञानमपि जीवेन संबध्यते एतादृशावस्था जीवन्मुक्तस्य भवति मुमुक्षुणा गोक्षसंबंधेन दुःखादिमन्नापि तत्स्वरूपमवधारयित्वा यता स्वोचितं कार्यं मुक्तात्मा जक्षन्क्रीडन्रममाण इति श्रुत्युक्ताक्रियातः स्वाम्यपि केवलस्वरूपेण निरंजनः परमं साम्यमुपैतीति श्रुत्या निर्मुक्तत्वनिर्लेपत्वस्मारणेन रत्नादिनामुक्तस्य सुखस्यामुक्तेरिति भावः ८॥

उक्तमर्थं जयन्ती

न च कर्मसक्तः सन्नपि देहादिषु न लिप्यत इत्युक्तं तत्केन प्रकारेणेत्याशंक्य शुद्धस्यात्मनो देहेंद्रियमनोबुद्धिप्राणादिभ्यो विलक्षणत्वं दर्शयंस्तस्य तत्त्व

युक्तः कर्तृत्वं वारयति द्वाभ्याम् नैव किं[चि]त् इति तत्त्ववित् अहं किंचिदपि नैव करोमीति
मन्येत मन्यत तत्त्वं याथात्म्यं स्वरूपं वेत्तीति तत्त्ववित् परमार्थदर्शी युक्तः फलाभिसंधानरहितेन भ
गवदाराधनरूपेण कर्मणा युक्तः कर्मकर्ता पि सन् कर्मयोगेन समाहितचित्तः प्रागुक्तरीत्या देहादिना
रूपः प्राकृतेन्द्रियादि प्रयुक्तेन किंचिदपि स्वल्पमपि कर्म न करोमीति प्राकृततया चेतनत्व
भिन्नत्वात्मस्वरूपस्य चित्स्वरूपस्य ममैतेषु तत्प्रयुक्तं कर्तृत्वं नास्ति स्वरूपप्रयुक्तं
तस्मिन्नेवेतरार्थः किं कुर्वन्सन् इन्द्रियाणि स्वस्वविषयेषु प्रवर्तमानानीन्द्रियाणि विषया
ल्पानि तत्र करणानि प्राणाः प्राणादयो दश वायवः स्वस्वव्यापारेषु प्रवर्तमाना प्रयुक्ताः स्वस्व
ज्ञानमयानि इन्द्रियार्थेषु शब्दादिषु स्वस्वविषयेषु स्वस्वानुकूलेषु वर्तन्ते प्रवर्तमानेषु
कः प्रकारेण धारयन्निश्चिन्वन्सन् इन्द्रियादीनां पार्थक्येन स्वस्वविषयप्रवर्तक
त्वं दर्शयति पश्यन् किं कुर्वन् श्रृण्वन् श्रवणेन शब्दानिति शब्दादि रूपे वा शब्दादिकं वा श्रृण्व
न् श्रवणं कुर्वन्नपि स्पृशन् त्वचा शीतोष्णमृदुकठिनादिकं वस्तु स्पृशन् स्पर्शं कु
र्वन्नपि पश्यन् चक्षुषा नीलपीतादिरूपं पश्यन् अवलोकयन्नपि अश्नन् रसनया अ
शनपानादिकमश्नन् भोजनं कुर्वन्नपि जिघ्रन् नासिकया
सुगन्धादिकं अपगन्धादिकं वा जिघ्रन्नपि इत्येवं ज्ञानेन्द्रियैः स्वस्वव्यापारं कुर्वन्नपि प्रल
पन् वाचा शुभमशुभं वा वचनं ब्रुवन्नपि गृह्णन् हस्ताभ्यां फलपुष्पादीनां ग्रह
णं कुर्वन्नपि गच्छन् पादेन गमनं कुर्वन्नपि स्वपन् अन्तःकरणानि स्वस्वरूपेन स्वपन्
पञ्चव्यापारं कुर्वन्नपि श्वसन् प्राणादिपञ्चकेन स्वस्वरूपव्यापारं कुर्वन्नपि उन्मि
षन्निमिषन् नागादिपञ्चकेन उन्मेषनिमेषरूपव्यापारं कुर्वन्नपि अर्थ
क्रमवशात् द्वादशकर्मविहाराय पदशोको व्याख्यातः एवं कर्मसु इन्द्रियप्राणादि
प्रयुक्तकर्तृत्वं तद्रहितस्य ममनास्तीत्येवं तत्त्ववित्मन्येतेत्यर्थः ८ ॥
मधुसूदनी टीका
तदेव विवृणोति द्वाभ्यां ॥
+ चक्षुरादिज्ञानेन्द्रियैर्वागादिकर्मेन्द्रियैः प्राणादिवायुभेदैरन्तःकरणचतुष्टये
न च तत्तच्चेष्टासु क्रियमाणासु इन्द्रियाणि इन्द्रियार्थेष्वेव इन्द्रियार्थेषु स्वस्ववि
षयेषु वर्तन्ते प्रवर्तन्ते न त्वहमिति धारयन् अवधारयन् नैव किंचित्करोमीति म
न्येत मन्यते तत्त्ववित् परमार्थदर्शी युक्तः समाहितचित्तः अथवा देयुक्तः कर्म
योगेन पश्चादन्तःकरणशुद्धिद्वारेण तत्त्ववित् ज्ञानी नैव किंचित्करोमीति मन्ये
त इति संबंधः तत्र श्रवणदर्शनस्पर्शनघ्राणाशनानि च चक्षुःश्रोत्रत्वग्घ्रा
नारसनानां पञ्चानां ज्ञानेन्द्रियाणां व्यापाराः पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् जिह्वा
नाः गतिः पादयोः प्रलापो वाचः विसर्गः पायूपस्थयोः ग्रहणं हस्तयोरिति

पंचकर्मेंद्रियाणांव्यापाराः ८ ॥

सदानंदी टीका

द्वाभ्यांतद्देतदेवेशोविहरणेतिस्फुटंहरिः श्रीमुद्ध्याभ्रक्रपवादौभूतानांतत्त्ववि-
देवमः क्रियमाणामप्येष्टां न करोमीतिमन्यते ८ ॥

नीलकंठी टीका

(एवं [illegible]
[illegible]
[illegible] नलिप्यतइत्येतदुपपादयति नैवेतिद्वाभ्यां तत्त्ववितआ-
त्मैवाकिंचित्करोमीतिमन्येतमन्यते तत्रहेतुः इंद्रियाणिउपलक्षणमिदंप्रा-
णादेरपि इंद्रियाणइंद्रियार्थेषुस्वेषुविषयेषुवर्तंतेइतिधारयन्निश्चिन्वन्
तत्स्वदेहेविषयेषुवर्तंतइतिमन्यतेधारयन्नितिहेतौशतृप्रत्ययः पश्यन्दर्शनादयः पं-
चज्ञानेंद्रियाणांव्यापाराः गमनविसर्गप्रलपनग्रहणानिकर्मेंद्रियाणां तानिच
ज्ञानेंद्रस्यउपलक्षणानि श्वसन्नितिप्राणस्य स्वपन्नितिबुद्धेः उन्मेषणनिमेषणेकू-
र्माख्यप्राणस्येतिविभागः कर्मणांविवक्षितः एतानिकुर्वन्नप्यभिमानाभावा-
न्नलिप्यतेइत्यर्थः ८ ॥

आनंदीटीका

कथमित्याह युक्तोज्ञानकर्मसमुच्चयानुष्ठानपूर्वंसंयमाभ्यासीतत्त्ववि-
त् विषयेंद्रिययोर्ग्राह्यग्राहकतांविदन्पश्यन्नालोचयन्नित्यर्थोवगमा-
द्युद्दिष्टएवन्निति श्रोत्रंस्पृशन्नितित्वचं जिघ्रन्नितिघ्राणंअश्नन्नितिरस-
नंगच्छन्नितिपादौस्वसन्नितिप्राणान् स्वपन्नितिनिरिंद्रियप्रदेशेम-
नसोवस्थानंनिर्देतिलक्षणमुपगमान्मनः ८ ॥

रामकंठीटीका ॥

तमेतंकर्मयोगिनःसमाधिमासनप्राणजयप्रत्याहाराद्यभ्यासपरि-
कर्मनिरपेक्षंयथोपस्थितविषयपर्यायविलक्षणपरवैराग्यंसर्वथास-
र्वदासर्वस्यसुलभपरमात्मप्रतिष्ठालाभलक्षणंनिरतिशयमहत्फ-
लंवितत्प्रतिपादयितुमाह ॥ उत्तरश्लोकेगम्यार्थम् ८ ॥

लासिकी टीका

कर्मकुर्वन्नपिनलिप्यते इत्येतद्विरुद्धमित्याशंक्य कर्तृत्वाभिमाना-
भावान्नविरुद्धमित्याह ॥ उत्तरश्लोकेगम्यार्थम् ॥ ८ ॥

कुर्वन्नपि न लिप्यते इति विरुद्धमाशंक्य कर्तृत्वाभिमानाभा
वान्न विरुद्धमित्याह नैवेति युक्तः समाहितस्तत्ववित् आत्म
नो याथात्म्यवित् अहं किंचिन्नैव करोमीति मन्येत चिंतयेत् क
दा कथं तावत्तत्वमवधारयन् मन्येतेत्युच्यते पश्यन्नित्यादिसा
र्धेन तत्ववित्परमार्थदर्शी दर्शनश्रवणादिक्रियां कुर्वन् इंद्रि
याणींद्रियार्थेषु वर्तंते नाहं किंचित्करोमीति अवधारय
न् चिंतयन् सन् मन्यते ८ ॥

रत्नावीरसमिद्बोधिनी ॥

न कर्मणामनारंभादित्यत्र सूचितां नैष्कर्म्यसिद्धिं विवृणोति नैवे
ति नाप्येवेति पदच्छेदः एवशब्दो भिन्नक्रमः करोमीत्यनेन संब
ध्यते तथा चायमर्थः नायं पुरुषः पौरुषलक्षणविशिष्टः क्षत्रियः
वीरः युक्तः आत्मकर्मयोगः तत्ववित् कर्मसंन्यासयाथात्म्यज्ञान
वान् एवं मन्येत निश्चिनुयात् अहं किंचित्कर्म करोम्येव न पुनः स
र्वथा कर्मयोगः संभवतीति कोर्थः सर्वथा कर्मत्यागलक्षणं नैष्क
र्म्यं न सिध्यतीति कुतो न सिध्यतीत्याह यतः इंद्रियाणि विषये प्र
वर्तंते प्रवृत्तिमंतो भवंतीति धारयन् देहत्वेन जानन् कथं वर्तंते
इत्यतो विशिनष्टि पश्यन्नित्यादि यतो दर्शनादिव्यापारान् कुर्वन्
तत्र दर्शनश्रवणस्पर्शनाघ्राणनाशनानि चक्षुरादिबुद्धींद्रिय
व्यापाराः गतिः पादयोः स्वापो बुद्धेः श्वासः प्राणस्य प्रलपनं वाचः
विसर्गो पायोः मूत्रोत्सर्जनमुपस्थयोः ग्रहणं हस्तयोः उन्मेषणनि
मेषणे कूर्माख्यप्राणस्येति विवेकः अयं चेंद्रियाणां रूपादिषु दर्श
नादिव्यापारवत्वात्सर्वथा कर्मणामत्यागो सिद्धः किंप्रयोजनो विहि
तरूपाणां तेषां त्याग इति निरर्थकादिनिवर्तनप्रयोजनोस्ति विहितकर्म
त्यागएव सर्वकार्यो न पुनर्वैदिकानुवर्तिकोमथ फलककर्मणांत्यागो

पीतिभावः यद्वा न केवलमारंभाद्यवहित पूर्वत्वात्यवोक्तलव
णो निःश्रेयो विधेयोपि शुद्धमारुरुक्षोरपि मध्ये सर्वदा सविधेय इ
42 त्याह नैवेति युक्तः कर्मसु प्रवृत्तः त्यक्तप्रियवीरः तत्त्ववित् शुद्धमा
र्गस्वरूपज्ञानवान् एवं मन्येत निश्चिनुयात् कथमित्याह अहं किं
चैव करोमि करिष्यामि अपि तु सर्वदुःसाध्यमपि साधयिष्यामीति
वर्तमानसामीप्ये वर्तमानवद्वेति लट् कीदृशः सन्नेवं निश्चिन्वी
तेत्याह पश्यन्नित्यादि पश्यन् वत्सपालत्वमवलोकयन् तथा
शृण्वन् परप्रेरिता मर्मच्छिदस्तेजोवर्धननिमित्तभूता वाचः श्रुति
गोचरीकुर्वन् तथा स्पृशन् तत्सयुक्तं पाशादिकं हृदयादौ संलग्नम
नुभवन् तथा जिघ्रन् रक्तमांसवसादिगंधं जिघ्रमाणः तथाश्नन्
कोपेन रदै रदच्छदान् खादन् यद्वा वीरपानादिकं कुर्वन् अश्नाति
रसपानविशेषपरः तथा गच्छन् रथादिना पद्भ्यां वा शत्रुसंमुखं प्र
तिष्ठमानः तथा स्वपन् पाने पार्था स्वस्य पाः स्वपाः स्वरक्षणं
तत्करोतीति स्वपः स्वरक्षकः सारथिः सद्वाचरतीति स्वपन् स्वं
पाति रक्षतीति अतो वयोपेति डे स्वपः सारथिः सद्वाचरन् स्वपन्
सारथिमरणे सति तत्कर्मापि स्वयमेव कुर्वन्नित्यर्थः यद्वा पक्षतः
प्राप्तनिद्रस्य तत्रापि विश्रमार्थं स्वापमपि कुर्वन् यद्वा दिने समर
कर्म कृत्वा रात्रौ श्रमापनोदार्थं निद्रां भजन् तथा श्वसन् सकलव
कोप विषमुद्गिरन् यद्वा कारणकार्योपचाराच्छ्रमकार्येण श्वासे
नाभिव्याप्तोपि श्रमार्तोपीतियावत् तथा प्रलपन् परस्परं वीर
गोष्ठीमाचरन् तथा विसृजन् शस्त्रादीन्मुञ्चन् तथा गृह्णन् अस्त्रा
णि संहरन् यद्वा परप्रहितानि प्राप्तान्यायुद्धानि स्वकरेण न गृही
तानि प्रत्येवप्रति विसृजन् यद्वा तन्मुक्तानि शस्त्राणि स्वीकुर्वन्
वीरादिव्यस्यासिवायव्यादीष्यसि वेत्युक्तान्स्थास्यामीति तेन प्रयुक्ते गृ
ह्णामीति गृहीष्यामीत्युक्ते संवेतीति तथोन्मिषन् स्वयं वाणादि प्र
योगे विहितनेत्रः परप्रयुक्तास्त्रादौ चजागरूकश्च तथा निमिषन्

सर्वदेवतास्मरणादौ नयनमनिमीलनं कुर्वन् तथा इंद्रियाणि कर्मेंद्रियाणि हस्तपादादीनि विषयेषु मास्वादिषु वर्तंते प्रयोगसमर्थानि भवंति न पुनः शिथिलानीति धारयन् हेतुत्वेन मनसा निश्चिन्वन् यतश्च मम सर्वाणि हस्तादीनि कर्मेंद्रियाणि वक्त्रादीनि ज्ञानेंद्रियाणि च स्वस्वविषयग्रहणसमर्थानि भवंति ततोऽहं सर्वं दुष्करमपि महारथजयं करिष्यामीति निश्चिन्वीतेति भावः ८ ॥

मधुभाष्य

८ ॥

43

भाषा अनुवाद

और जो ऐसी शङ्का करो कि कर्म्म अनुष्ठान करके भी उसमे लिप्त
करे आशक्त नहोना यह अत्यन्त असंभव है लिप्त हीहोगा इस प
र दो श्लोकसे कहते हैं कि कर्त्तत्व अभिमान रहित होना असं
भव नहीं है क्यों कि निष्काम कर्मयोग रूप भक्ति अनुष्ठान
करने वाले मनुष्य क्रमसे तत्वज्ञानी होयके दर्शन आदि इन्द्रि
यव्यापार करते भी इन्द्रिय सब अपना अपना काम करतीहैं
और हम कछभी नहीं करते ऐसी बुद्धि उनको निश्चय बनी
रहती है यथा दर्शन श्रवण पर्श घ्राण भोजन ये ज्ञान इन्द्रियों
के व्यापार और गमन वचन विसर्जन कहे विष्टा मूत्र त्याग जो
कर्म इन्द्री के काम औ ग्रहण जो करका व्यापार औ स्वपन् बुद्धि
व्यापार निद्राहोना श्वसन् प्राणवायु व्यापार और उन्मेष नि
मेष कहे पलक लगना खुलना जो कूर्म वायुसे होताहै यह स
ब इन्द्रिय आदि का कर्म है और हमद्रष्टा साक्षी रूप है यह कछ
नहीं करते ऐसेही ज्ञाने पुरुष इन कर्मों मे अभिमान शून्य लि
प्त नहीं होते हैं सोई कहा दो श्लोकसे कि इन्द्रियाणीन्द्रियार्थे
षु वर्त्तते इति धारयन् यहां तक ८ ॥

चौपई

करौंनाहिमैकर्महूंकिंचित ऐसैं माने युक्त जो तत्ववित देष
त सुनत परसत संघत खावत चलत पायन दि स्वासन ८

44

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ९ ॥ ॥

शांकरभाष्यं

यस्यैवंतत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मसु अकर्मैव पश्यतः सम्यग्दर्शिनस्तस्य सर्वकर्मसंन्यास एवाधिकारः कर्मणो भावदर्शनान्नहि मृगतृष्णिकायामुदकबुद्ध्या पानाय प्रवृत्त उदकाभावज्ञानेपि तत्रैव पानप्रयोजनाय प्रवर्तते ९

आनंदगिरिकृतटीका

यथोक्तस्य विदुषो विध्यभावेपि विद्यासामर्थ्यात् प्रतिपन्नि कर्मभूतं कर्मसंन्यासं फलात्मकमभिलषति यस्येति अतत्त्वविदुषोपि कर्मसु प्रवृत्तिसंभवात्ज्ञातः संन्यासेपि कारस्यादित्याशंक्याह नहीति ९॥

स्वामिकृतटीका

प्रलपन् वागिंद्रियस्य विसर्गः पायूपस्थयोः ग्रहणं हस्तयोः उन्मेषणनिमेषणं कूर्माख्यप्राणस्येति विवेकः एतानि कर्माणि कुर्वन्नपि अभिमानाभावात् ब्रह्मविन्न लिप्यते तथा च परमार्थसारे ज्ञानदर्शिगमउत्तरदर्शीवीर्ययोरश्लेष विनाशौ तद्व्यपदेशात् ९॥

पैशाचभाष्यं

तथा प्रलपन् भाषमाणः विसृजन् पुरीषं विसृजन् गृह्णन् हस्तेनोपाददानः उन्मिषन्निमिष निमीलोन्मीलन्नपि इंद्रियाणींद्रियार्थेषु विषयाभिमुखेषु वर्तंत इति धारयन्मन्यमानः नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् इति सर्वेणासैवं यस्यैवं तत्त्वविदः सर्वकार्यकारणचेष्टासु कर्मसु अकर्मैव संपश्यतः सम्यग्दर्शिनः सर्वकर्मसंन्यास एवाधिकारस्तत्र कर्मणो भावदर्शनात् नहि मृगतृष्णिकायां उदकबुद्ध्या पानाय प्रवृत्तो उदकाभावज्ञानेपि तत्रैव पानप्रयोजनाय प्रवर्तते ९

रामानुजभाष्यं ९ पूर्वश्लोके उक्तम्

अभिनवगुप्तकृतटीका ९ स्पष्टार्थम्

परमार्थप्रपा

अथैतदेवाह पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन्निति ज्ञानेंद्रियकृत्यं तथा गच्छन् प्रलपन् गृह्णन् इति कर्मेंद्रियकृत्यं तथा श्वसन् उन्मिषन्निमिषन्निति प्राणकृत्यं एतत्सर्वमहं किमपि न करोमीति मन्येत न तु क्रियमाणकार्यमे

गी॰ टी॰ पं॰

45

तदहं करोमीति यः कश्चिज्ज्ञानात्मेव सकथं न मन्येते त्यो ग्रं का हं इन्द्रियाणी
ति ९॥

वनमालीटीका उपक्रमे ९॥ पूर्वश्लोके उक्तार्थं

उत्तमवैजयन्ती उपक्रमे ९ पूर्वश्लोके उक्तार्थं

मधुसूदनी टीका

गच्छन् प्रलपन् विसृजन् गृह्णन् त्रिभिः श्वसन्निति प्राणादिपंचकस्य
व्यापारोपलक्षणं उन्मिषन्निमिषन्निति नागकूर्मादिपंचकस्य स्वपन्निति
अन्तःकरणचतुष्टयस्यार्थक्रमेव प्राप्तान्युक्तमे भेदा व्याख्याता यश्लोकः।
ध्या॰ यस्मात्सर्वव्यापारेष्वात्मनोऽकर्तृत्वमेव पश्यति अतः कुर्वन्नपि न लिप्यत इ
ति युक्तमेवोक्तं इति भावः ९॥

सदानंदी टीका

ज्ञानकर्मेन्द्रियैः कर्मेन्द्रियाभिस्तथा यथा यथं कुर्वन्नकर्तृत्वबुद्ध्या पश्यन्नात्मा
नमक्रियं पश्यन् प्राणैः स्वपन्नन्तःकरणेन स्वपन्निस्तथा उन्मिषन्निमिषन्नेवं
नागकूर्मादिपंचकैः एतानि सर्वस्वविषयेषु वर्तन्ते न त्वहमिति धारयन्सर्वव्या
पारेष्वात्मानमक्रियं विदन् कुर्वन्न लिप्यते वा तो युक्तमेवेति तद्वचः ९॥

नीलकंठी टीका उपक्रमे ९

आनन्दी टीका

प्रलपन्निति वाचं विसृजन्निति पायूपस्थौ गृह्णन्निति हस्तौ उन्मिषन्निति चक्षु
र्व्यापारयन्निति तीर्थ्यं ज्ञानेन्द्रियकर्मेन्द्रियप्राणान्तःकरणानां व्यापारं कुर्वन्नपि इन्द्रि
याणीन्द्रियार्थेषु वर्तन्त इति धारयन् विषयेन्द्रिययोर्हि ग्राह्यग्राहकात्मको यं
संबंधः स्वाभाविकोऽनपायी आत्मनस्तु फलानपेक्षस्य न कश्चिदभिसम्बन्ध
इत्यवधारयन् नैव किंचित्करोमी फलग्रहणाभावात् कृतमकृतमेवेति ज्ञा
तदनन्तरं नीन अष्टचतुष्कआभ्यन्तरयोगाभ्यासेन पूर्वपूर्वभूमिजयादुत्तरोत्तरां भूमि
मारूढस्तत्त्वविन्मसमप्रज्ञालोकः पश्यञ्छृण्वन्निति संयमादिन्द्रियसन्नि
द्रियार्थेषु वर्तन्तेन तत्र धारयन् योगानुशासने द्वितीये पादे इन्द्रियाणां विषया
संप्रयोगे चित्तस्य स्वरूपानुकार इव प्रत्याहार इति ततः परमा वश्यतेन्द्रियाणा
मिति सूत्रद्वये शब्दादिष्वव्यसनमिन्द्रियजय इत्येको रागद्वेषाभावे सुखदुःखा
दिशून्यं शब्दादिज्ञानमिन्द्रियजय इति केचित् चित्तैकाग्र्यादप्रतिपत्तिरेवेति जै
गीषव्य इति द्वन्द्वथावगमात् धारणाविषयी कुर्वन्नैव किंचित्करोमीति मन्येत तत्त्व
ध्यानधारणासमाधिसमुदायसंज्ञके संयमे दृढाभ्यासस्य ग्रहणस्वरूपाभिना
न्वयार्थवत्त्वसंयमादिन्द्रियजय इति सूत्रे शब्दादिषु विषयेषु श्रोत्रादीनां हृति

गृह्णं श्रोत्रस्पर्शरूपवहन्निरित्यादिः स्वरूपम् अहं स्पृणोमीत्या॰
दिरहंकारोस्मितान्यवसायात्मकः प्रकाशक्रियास्थितिशीलाहि
गुणायेषामिन्द्रियाणिसाहंकाराणिविपरिणामइत्यानयः सर्वे
पर्वतेपुरुषोपभोगप्रयोजनाइत्यर्थवत्वं पञ्चपंचस्वयथाक्रमंसं
यमादिंद्रियाजयः प्राडुर्भवतीतिहत्यर्थावगमाद्योगारूढस्य वरम॰
स्फुटएवकर्तृत्वाभिमानः ८ ॥ ॥ ॥ । वानुपा॰

रामकंठीटीका

अतोसौयकोव्याख्यातस्वरूपः कर्मयोगसमाहितः कुर्वन्नपिनलिप्यते
यतोनैवकिंचित्करोमीतिमन्यते सर्वास्क्रियास्वलोकवदवर्त्तमानोपिने
कर्म्मफलमेवप्रतिपद्यतेइतिसंबंधः किंजवन्नेवंमन्यतेपश्यन्नित्यादिना सर्वे न्या॰
न्द्रियवृत्तीःप्राणादिवृत्तीश्चप्रवर्त्तयन्नपीतिधारयन्नेवंविधामस्यकर्मयोगस्य
यथोक्तफलप्राप्त्युपायभूतांधारणामहरहन् कथंधारयन् दर्शनादिक्रि॰
यास्वप्रवर्त्तमानान्यपीन्द्रियाणिप्राणाश्चेंद्रियार्थेषुस्वेषुस्वेषुविषयेषुवर्त्ततेसं
वन्धमात्रेणैवनभवंति नतुतेषुस्वविषयसंबंधेषुनित्यानित्यनिरतिशयचि
त्प्रकाशस्वभावस्यममलोकवद्रागादिकलंकस्पर्शोन्ततःसंभवतीति पश्य
न्नित्यादिनानिमिषन्नित्येतेनग्रंथेन सर्वेंद्रियप्राणवृत्तयःसंगृहीताः तथाच
बुद्धीन्द्रियवृत्तयः श्रवणस्पर्शनदर्शनरसनघ्राणरूपाः क्रमसमनपेक्ष्यप॰
श्यन्नित्यादिनाश्नन्नित्येतेनपदपंचकेनप्रतिपादिताः एवमेववचनग्रहणग
मनविसर्गप्रजननरूपाःकर्मेन्द्रियवृत्तयःप्रलपन्गृह्णन्गच्छन् विसृज
ये॰ न्निति पदचतुष्टयेनप्रतिपादिताः यतोविसृजन्नितिपदेनविसर्गप्रजननरू॰
पेद्वेवृत्तीप्रतिपाद्यते स्वपन्नित्यनेनमनोवृत्तिःप्रतिपादिता स्वपावस्थायां
हिमनएववृत्तिमद्भवति नेंद्रियाणि उन्मिषन्निमिषन्नितिपदद्वयेनबुद्धि
वृत्तिः प्रतिपादिता निश्चयात्मिकाहिबुद्धिवृत्तिरिति साभावविषयत्वे
नभवन्त्युन्मेषशब्देनोक्ता अभावविषयत्वेनभवन्तीनिमेषशब्देन भावा
भावौहिबुद्धिवृत्तिरेवनिश्चिनुते अहंकाररूपात्ववृत्तिः पश्वसंश्वसन्निति
कर्त्तृतयाव्यापारिष्वेषुरूषप्रवर्त्तितेष्वेता अंतर्वहिष्करणवृत्तयः समन्ति
व॰

गी॰
टी॰ पं
46

मनेनप्राणाहुतिःप्रतिपादिता प्राणाधारणामेवहिस्वमननमिति तदिदम्
स्यवाक्यस्यतात्पर्यम् यस्मिन्सर्वमितिव्याख्यातस्वरूपस्यपरस्यतत्व
स्यात्मनएवपरमेश्वरस्यताद्दकस्वभावपरामर्षमात्रात्मिकायाशक्तिर
व्यतिरिक्ता सैवतदिच्छावभासितज्ञेयकार्यात्मकजगतक्रीडनकविषय
त्वेनप्रसरन्तीतन्मायाजनितविपर्ययदर्शनानांसांसारिकपुरुषाणांसं
शहेणज्ञानक्रियारूपापि प्राणबहिष्करणप्राणाहुतिभेदेनचतुर्दशमार्ग
प्रसृतत्वेनावभासमानासंसारबन्धहेतुत्वेनपर्यवस्यति परमेश्वरानु
ग्रहादेवतूंमिषितपरिमृष्टद्वैतकलंकनिर्मलनिजज्ञानचक्षुषांसर्वव्यव
हारव्याप्ततानामपियथोक्तस्वभावमात्रपरामर्शैकरूपतयायथोक्तक
र्मयोगिनामवभासमाना परमात्मसमापत्तिलक्षणमोक्षफलप्राप्त्य
र्थमेवकल्पते इत्येतायुक्तोनैवकिंचितकरोमीति मन्यतेइत्यायुक्तम्
[illegible] ९॥

लासिकीसगमी टीका

युक्तःकर्माणिक्रियमाणोपिआत्मनिसमाहितः ततोभ्यासक्रमेणात
त्वविद्भूत्वा आविर्भूताद्वैतज्ञानःसन्कर्मकुर्वाणोपिनैवकिंचितकरोमीति
तै॰ मन्येतनिश्चिनोतिकीदृशःसन्पश्यन्नित्यादि ज्ञानेंद्रियकर्मेंद्रियान्तःकर
णप्राणाहुतिभिःकर्मकुर्वन्नपि तथेंद्रियाणिइंद्रियाणीनिस्वस्वविषये
षुवर्त्तंतेइतिभजंते नाहमित्येवंधारयनप्रत्यभिजानन् एतानकिंविहि
कुर्दमिति तदुक्तंकुलार्णवे स्वकार्येषुप्रवर्तन्ते करणानीतिचिंतयेत् अ
हंभावमपास्यैवयःकुर्यान्नलिप्यतेइति [illegible]
[illegible]
[illegible]
[illegible] ९॥

पंचोलीटीका स्पष्टार्थम् ९

रणवीरसमिद्धोधिनी॥
स्पष्टार्थम ९॥

ਸਪੂਰਣ॥

੧॥

47

भाषा अनुवाद

आठ नव इन दोनो श्लोक का अर्थ एक ही साथ है ९

चौपई ॥

कहितहिंत्यागतजोपुनगहन अरुउनमेरवतजोहिनिमे
रवत इंद्रिइंद्रिमेंवरतैंनित ऐसैंसोनिजमनमेधरत ९॥

48

ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः लिप्यते
नसपापेनपद्मपत्रमिवांभसा १० ॥

शांकरभाष्यटीका

यस्तुपुनरतत्त्ववित् प्रवृत्तश्चकर्मयोगे ब्रह्मणीति ब्रह्मणीश्वरे आधायनि
क्षिप्यतदर्थंकरोमीतिभृत्यइवस्वाम्यर्थं सर्वाणिकर्माणिमोक्षेपिफलेसंगंत्य
क्त्वाकरोतियः सर्वकर्माणिलिप्यतेनसपापेन संबध्यते पद्मपत्रमिवांभसोदके
न १० ॥

आनंदगिरिटीका

नहिविद्यावानिवाविद्यावानपिकर्माणिनप्रवर्तेत पापोपहतिप्रसंगादि
त्याशंक्याह यस्त्विति यथाभृत्यः स्वाम्यर्थंकर्माणिकरोतिनस्वफलमपे
क्षते तथैवयोविद्वान् मोक्षेपिसंगंत्यक्त्वाभगवदर्थमेव सर्वाणिकर्माणि ।
करोतिनस्वकर्मणाबध्यतेनहिपद्मपत्रमंभसासंबध्यतेतद्वदित्यर्थः १०

स्वामिकृतटीका

नहियस्यकरोमीत्यभिमानोस्तितस्यकर्मलेपोऽवश्यंभावीत्यत्रविशुद्धचित्तत्वा
त्तेत्याशंक्याह ब्रह्मणीति ब्रह्मण्या
धायपरमेश्वरेसमर्प्यतत्फलेसंगंत्यक्त्वायःकर्माणिकरोति असौपापेन
बंधहेतुतयापापिष्ठेनपुण्यपापात्मकेनकर्मणानलिप्यते यथापद्म
पत्रमंभसिस्थितमप्यंभसानलिप्यतेतद्वत् १० ॥

पिशाचभाष्य

यस्तुपुनरतत्त्ववित्प्रवृत्तश्चकर्मयोगेभवतिब्रह्मणीतिकर्माणिब्रह्मणि
ईश्वरेआधाययतदर्थंकरोमीतिभृत्यइवस्वाम्यर्थंमोक्षेपिफलेसंगंत्यक्त्वाक
रोतियःकर्माणिलिप्यतेनसपापेनसंबध्यते पद्मपत्रमिवांभसाउदकेन १

रामानुजभाष्य

ब्रह्मणीति ब्रह्मशब्देनप्रकृतिरिहोच्यते ममयोनिर्महद्ब्रह्मेतिवक्ष्यते इंद्रिया
णांप्रकृतिपरिणामविशेषरूपत्वेनेंद्रियाकारेणावस्थितायांप्रकृतौपश्य
न्नेवावतिष्ठतइत्येवंप्रकारेणकर्माण्याधायफलसंगंत्यक्त्वानैवकिंचित्करो
मीतियःकर्माणिकरोति सप्रकृतिसंसृष्टतयावर्तमानोपिप्रकृत्यात्माभिमा
नरूपेणबंधहेतुनापापेननलिप्यते यथापद्मपत्रमंभसासंसृष्टमपिनलि
प्यतेतथानलिप्यतइत्यर्थः १० ॥

परमार्थप्रपा टीका

ईक्षतिजानातीदृक्ः परमात्मानंतत्त्ववेदीनीन्द्रियाणिवर्तन्तदीतिइन्द्रियार्थेषु
रूपरसादिषुवर्तन्तेप्रवर्तन्तेनत्वहमितिरूपेणातिष्ठतीतिधारयन्नुस्थिरीकृ
वसर्वथमतीतिब्रह्मणिब्रह्मणिकर्माणिदर्शनश्रवणादीनिआधायआरोप्यस
ङ्गंकर्तृत्वाभिमानंत्यक्त्वायःकरोतिसपापेनबंधहेतुनानलिप्यतेश्रुतिर
पिअतएवपरोवदन्त्वाकर्पयंत्यतःसएवनूनंअमन्त्वानोमनस्तान्मसैवेता
निकर्मनाप्नोतीति तथाआत्मैवास्येकर्मातत्त्वतोहिकर्मकरोमीतिसहेतु न
यातस्माथकोपिकोपमात्मेतिवयमपास्मदेकतरः सजातमायेनवापश्यति
येनैवागोपानातिजिघ्रतियेनवाचंव्याकरोतियेनवास्वादुचास्वादु चविजानातिय
देतेत्तमस्मतस्यैतत्संज्ञानमाज्ञानंविज्ञानंप्रज्ञानंमेधाधृतिर्मतिर्मनीषाजूतिः स्म
तिःसंकल्पःक्रतुरसुःकामोवशइतिसर्वाण्येतानिप्रज्ञानस्यनामधेयानि
भवंतीत्यादिस्पष्टार्थंपश्रुतिः अनैनेतकर्मभवतिःपश्यन्नशृण्वन्नित्यादिषु
बुद्धिप्राणकर्माणिकर्तृत्वाभिमानशून्यतेदृष्टान्तनेवनपोस्तिताहितस्याहि।
स्वप्ननृत्वापंतिशेजर्वनितयज्ञनिद्रातमनसोनिरिंद्रियप्रदेशावस्थानेनतद्दृक
स्मादसंकल्पितमेवभवतितथैवस्वासोच्छासनिमेषोन्मेषाअपिभवंतितद्
नस्पर्श दर्शनादिकर्माण्येवंतत्त्वात्वथाऽस्यनतत्तथैवतत्त्वविदितिशेषः एवंकर्मा
णिवर्तमानोपिकर्मभिर्नलिप्यतइत्यत्रदृष्टान्तमाहपद्मपत्रमिवेतिस्वच्छोप
तडर्कोस्फटिकःप्रतिबिंबेनयथानोपाधिरंजनंतद्वतःकर्मफलंनातस्तथा
नोपाधिरंजनं १०।।

वनमालीटीका

ननुदेहोत्पन्नंतदेहेनसंयोगेनकृहषसवाखवइतित्वेयथातथोदेहाद्यह
मित्यभिमानवतोमुमुक्षोर्वास्वकर्मोदष्ट[illegible]दुःखादिसंबंधितानकथं।
स्वस्याकर्तृत्वभावनामात्रेणतन्निवृत्तिः नहियज्ञोनूष्यवकर्मकर्तृत्वादि
कमात्मन्यारोपितंयेनशुक्तिरजतन्नायमतमिवस्वस्याकर्तृत्वज्ञानान्निव
र्ततेतितत्राह ब्रह्मणीति ब्रह्मणिसर्वेश्वरेतत्परमितिमतिआधायसमर्प्य
संगंफलाभिलाषंत्यक्त्वाइश्वराराधनमेवेश्वरार्थंस्वफलनिरपेक्षंतततपाक
रोमीत्यभिप्रायेणकर्माणिलौकिकानिवातिविधानिपरकरोतिसपापेनसं

सारहेतुसहानतः कर्तात्मकेन कर्ममात्रेण न लिप्यते पद्मपत्रमुपरि स्थि
तिमेनांभसा न लिप्यते एतादृशेन कर्मोद्धशानेन भगवज्ज्ञानं तेन सत्त्वं दर्श
नेन सत्त्वाया ब्रह्महत्यादयाद्यानि हन्निरस्तयासत्यविद्याभिमानादेर्न तु तिमि
तिभावः १०॥

कृतमवैजयन्ती टीका

[illegible] उक्रमर्थं विशदयति ब्रह्मण्णीति ब्रह्मणि
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते इति श्रुतेः मम योनिर्महद्ब्रह्मेति वक्ष्यमा
णाच्च ब्रह्मशब्दनिर्दिष्टे त्रिगुणात्मके देहेंद्रियादिरूपेण परिणामप्राप्ते प्रधाने क
र्माणि दर्शनश्रवणादीनि आधाय सर्वाण्येतानि इंद्रियकर्माणि प्रधानाभिधेय
स्य ब्रह्मण एव भवंति न तु मम तदतिरिक्तस्य ममेति निश्चित्येत्यर्थः संगं कर्मफला
नुसंधानं तत्कर्तृत्वाभिनिवेशं च त्यक्त्वा परित्यज्य यो मनसा तानि सर्वाणि कर्मा
णि करोति स्थावरजंगमात्मकदेहेंद्रियादिरूपकः सन्नपि पापेन देहेंद्रियादिष्वात्मता
भिमानरूपेण न लिप्यते लिप्तो न भवेत् तत्र दृष्टांतः यथाम्भसा जलेनोपरिस्थि
तिमेन पद्मपत्रं कमलदलं न लिप्यते तद्वल्लिप्यते नैवेति लिप्यते नेत्यर्थः १०

मधुसूदनी टीका

नहि विद्वान्कर्तृत्वाभिमानाल्लिप्यतैव तथा च कथं तस्य सन्यासपूर्विका ज्ञा
ननिष्ठा स्यादिति तत्राह ॥ ब्रह्मणि परमेश्वरे आधाय समर्प्य संगं फलाभिला
षं त्यक्त्वा ईश्वरार्थं भृत्य इव स्वाम्यर्थं स्वफलनिरपेक्षतया करोमीति भिप्रायेण
कर्माणि लौकिकानि वैदिकानि च करोति यः लिप्यते न स पापेन पापपुण्या
त्मकेन कर्मणेति यावत् यथा पद्मपत्रमुपरि प्रक्षिप्तेनांभसा न लिप्यते तद्वत् ।
भगवदर्पणबुद्ध्यानुष्ठितं कर्म बुद्धिशुद्धिफलमेव स्यात् ॥ [illegible] ॥

सदानंदी टीका

नसंन्यासी लिप्यते तत्कर्तृत्वाभिनिवेशवतः ज्ञाननिष्ठा संन्यासो कथं तस्येति चे
न्नाह १ फलासंगं परित्यज्य समर्प्य परमेश्वरे कर्माणि वैदिकान्यथ लौकिका
नि करोति यः २ पापपुण्यात्मकेनासौ कर्मणा नैव लिप्यते यथोपरि प्रक्षिप्तेन प
द्मपत्रं न चांभसा ३ लिप्यते तद्वदीशार्पितकर्मार्पितमलेपकं सत्त्वशुद्ध्या मादेन धी
शुद्धिर्ज्ञानस्य जायते ४ १०॥

नीलकंठी टीका

ब्रह्मणीति यतो विद्वान्ब्रह्मसंगत्वात्कुर्वन्नपि न लिप्यते तस्माद्विद्वानपि ब्रह्म

णि सर्वाणि तयोमिणि कर्माणि कश्चायायमेव कारयिता न त्वहं करोमीति सम
र्प्य यः कर्माणि करोति सः पापेन न लिप्यते अम्भसा पद्मपत्रमिव १० ॥

ज्ञानेश्वरी टीका

एतदेवोपपादयति ब्रह्मार्पणप्रकारेण ब्रह्मण्याधाय समर्प्य कर्माणि संग
त्यक्त्वाकांक्षांति चोदिताः क्रियाः फलस्पृहां त्यक्त्वा यः करोति स पापेन न
लिप्यते अथ च यो जितेंद्रियो योगी सर्वं एवैतत्पुरुषोपभोगप्रयोजनार्
त्पर्थं वर्त्वे संयमात्कर्माणि बाह्यांतःकरणकार्याणि श्रवणदर्शनादीनि
ब्रह्मणि समर्प्य तदनन्तरं संगं त्यक्त्वा ज्ञानेंद्रियविषयीकृतं सर्पस्वरणत्व
णादिकं हि ग्राह्य हेयोपादेयोपेक्षणीयत्वेनाध्यवसितं मनसाप्येवमे
वं संकल्पितम् अत्राहमधिकृत इत्यहंकारेणाभिमतं पुरुषोहाना
दानोपेक्षालक्षणक्रियाविषयी करोति ततः क्रियाफलं रसादिकं भु
पं॰ क्ते इत्येवं खलाबन्धरूपो हि संगः प्रादुर्भूतेंद्रियजयो हि संगं परस्य
राभिप्रायहेतुकं सर्वं पुरुषोपभोगार्थमेव प्रवर्तयन्नित्यर्थः प्रोक्तम्

रामकंठी टीका

इदानीमेतदेव प्रकटयितुमाह ॥

ब्रह्मणि परमात्मनि सर्वाणि क्रियमाणानि कर्माण्याधाय तत्स्वीकृते
न विनिवेश्यात एव संगं स्वरूपव्यतिरिक्तत्वेनावभासमाने भवविषये भ्रा
तिमग्नचित्तत्वे लौकिकं त्यक्त्वा यथोक्तया ज्ञानदृष्टा परमेश्वरभावा
नुप्रतिष्ठो यः करोति सर्वाः क्रियाः समाचरति स लौकिकवत्
पापेन कर्मफलरूपेणात्मा स्वात्मना न लिप्यते न कलुषीक्रि
यते कथम् अम्भसा सलिलेन निर्वथा न तया स्वसंश्लिष्टमपि
कमलदलमिव [illegible] १० ॥

+ नन्वेवंविधस्य ज्ञानाधारादि
वात्कर्मलोपो मा स्त्वयत्तन्य
एव अभिमानस्य सर्वथा वि
लानादित्याशं
गाह +

लाक्षिकी [illegible]री टीका

तत्त्वस्य ब्रह्मभावमापन्नस्याभिमानाभा
वबाधमात्रः कर्मयोगाधिकृतः स लिप्य

यत उत्पन्नबोधो ब्रह्मणि परमेश्वरे कर्माण्यादाय उक्तप्रकारा
समर्प्य संगं तत्त्रिमन्यविन्नतां त्यक्त्वा नतिष्ठति अतो पापेन बन्धहेतुना
पापादिष्टेन अशुभपापात्मकेन कर्मणा न लिप्यते न कलुषीक्रियते

गी॰ णि सर्वाणि तथा मिणि कर्माणि कआयायमेव काश्यिता न त्वहं करोमीति सम
टी॰ र्प्य यः कर्माणि करोति सः पापेन न लिप्यते भसाप स्मपत्रमिव १०॥
पं॰

50

ज्ञानेश्वरी टीका

एतदेवोपपादयति ब्रह्मार्पणप्रकारेण ब्रह्मण्याय समर्प्य कर्माणि संग त्यक्त्वा श्रुतिचोदिताः क्रियाः फलस्पृहां त्यक्त्वा यः करोति स पापेन न लिप्यते अथच यो जितेंद्रियो योगी सर्वप्रवृत्तेः पुरुषोपभोगप्रयोजनाय त्यर्थं वर्त्तसे यमात्कर्माणि वाह्यांतः कारणकार्याणि श्रवणदर्शनादीनि ब्रह्मणि समर्प्य तदनन्तरं संगं त्यक्त्वा ज्ञानेंद्रियविषयीकृतं स्पर्शस्वर्णत्व णादिकं हि वद्गाहेयोपादेयोपेक्षणीयत्वेनाध्यवसितं मनसाप्येव पं॰ वसंकल्पितम् अत्राहमधिकृत इत्यहंकारेणाभिमतं पुरुषोहाना दानोपेक्षालक्षणक्रियाविषयीकरोति ततः क्रियाफलं त्वमादिकं भु क्ते इत्येवं सुखलाबन्धरूपो हि संगः प्रादुर्भूतेंद्रियजयो हि संगपरस्प राभिप्रायहेतुकं सर्वे पुरुषोपभोगार्थमेव प्रवर्तयन्त इति प्रोक्तम्

रामकंठी टीका

इदानीमेतदेव प्रकटयितुमाह ॥

ब्रह्मणि परमात्मनि सर्वाणि क्रियमाणानि कर्माण्याधाय तच्छक्तिते न विनिवेशयन् एव संगं स्वरूपव्यतिरिक्तत्वेनावभासमाने भविषये भा निमग्नचित्तत्वं लौकिकं त्यक्त्वा यथोक्तया ज्ञाननिष्ठया परमेश्वरभावा नुप्रविष्टो यः करोति सर्वाः क्रियाः समाचरति स लोकिकवत् पापेन कर्मफलरूपेणात्मना न लिप्यते न कलुषीक्रि यते कथम् अम्भसा सलिलेन निर्मलवथा न तथाप्स संश्लिष्टमपि कमलदलमिव [illegible] १० ॥

+ नन्वेवंविधस्य ज्ञानाधारावि वालकर्मलोपो मा स्तु यस्तत्त्व लाभिनी [illegible] टीका हृत्स्य ब्रह्मभावमापन्नस्याभिमानाभा वबोधमात्रः कर्मयोगाभिहितः सलिप्य
एव अभिमानस्य सर्वथा वि लानादित्याशं गाह +

यत उत्पन्नबोधो ब्रह्मणि परमेश्वरे कर्माण्यादाय उक्तप्रकारा समर्प्य संगं तत्र मग्नचित्तत्वं त्यक्त्वा तिष्ठति असौ पापेन बन्धहेतुना यापापिष्ठेन शरणपापात्मकेन कर्मणा न लिप्यते न कलुषीक्रियते

कारस्तु खलाबंधेत्यक्त्वा यः करोति नासौ पापेन लिप्यते
पद्मपत्रमिवांभसेति दृष्टान्तः तथा चोक्तमिदं कैवल्य
पादे कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामि
ति सूत्रे च तस्मात् खल्वियं कर्मजातिः कृष्णाशुक्ला
शुक्लाकृष्णाशुक्लाकृष्णा चेति तत्र कृष्णा दुरात्म
नां परान्पीडयित्वा भवति शुक्ला तपःस्वाध्यायवतां
मनसश्चायत्तत्वान्न बहिःसाधनाधीना परान्पीडयि
त्वा न भवति शुक्लकृष्णा बहिर्ध्यानसाध्या परपीडानु
ग्रहद्वारेण कर्माशयप्रचयात् अशुक्लाकृष्णा सं
न्यासिनां क्षीणक्लेशानां चरमदेहानामिति अशुक्लं
कर्मसंन्यासादकृष्णं चानुपादनात् इतरेषां तु भूता
नां पूर्वमेव त्रिविधमिति १० ॥ इति आनंदीटीकायां श्रुतिः ॥

51

प्रसूत उक्तोपपत्त्यादेहाभिमानस्यक्रमापचीयमानत्वतयाविशुद्धीक्रियते
यथापद्मपत्रमंभसिस्थितमप्यंभसानलिप्यते तद्वत् [illegible]
[illegible] १० ॥

पंचोलीटीका

यस्तुपुनः अतत्त्ववित्कर्मयोगप्रवृत्तः तस्यकर्मयथाबंधनेनभ
वतितंप्रकारमाह ब्रह्मणीति यःकर्माणिब्रह्मणिईश्वरेआधा
यतदर्थंकर्मकरोमीतिबुध्वाकर्मफलेमोक्षेपिसंगंत्यक्त्वाकरोति।
सपापेनलिप्यतेनसततस्यांतःकरणस्यशुद्धिरेवतेषांफलमित्यभि
प्रायः १० ॥

मणिवीरसमिद्बोधिनी॥

ब्रह्मण्याधायेति ब्रह्मणीइतिद्वितीयाद्विवचनांतस्यछेदः सं
धिस्त्वार्षः यःपुमान् ब्रह्मणी वेदस्तवं तपोब्रह्मेत्यनुशासनाद्
नुवेदपरमेश्वरौ आधाय आसमंतात्धारयित्वायत्नुवेदोक्तप्रकारं
सर्वांगंयथास्यात्तथास्वीकृत्यपरमेश्वरंचस्वामित्वेनधारणीकृ
त्यसंगं पूर्वोक्तलक्षणंपुत्रमित्रादिस्नेहंचत्यक्त्वाकर्माणिस्वाचा
रोचितानिपुत्रेष्ट्यादीनिकरोति सपापेनगुरुवधादिलक्षणेननलि
प्यतेनकलुषीक्रियते अंभसाजलेननिर्व्यवधानतयासंश्लि
ष्टमपिकमलदलमिवेत्यर्थः यद्वाब्रह्मणीति सप्तम्यंतमेव ब्र
ह्मणिपरमेश्वरे आधायसमर्प्य अनेनतदनुष्ठितेनस्वोचितेना
नुष्ठीयमानेनकर्मणापरमेश्वरोमेप्रीयतामितिसंकल्पेत्यर्थः
१०॥

मधुभाष्य

ब्रह्मणीति साधननियम स्योपचारवनिवृत्त्यर्थंपुनःपुनःफ
लकथनं एवंचाचार इत्याह १० ॥

52

भाषा अनुवाद

और जो मनुष्य हम कर्म करते हैं ऐसा अभिमान राखते हैं ते
ई कर्ममे लिप्त होते औ उन्ही को कर्मबन्ध होता हैं फेरि चि
त्तकी अशुद्धता से उनको संन्यास भी दुर्घट है इस से उनको
सब तरह शङ्कट है जो ऐसी शङ्काकरो तो यह उत्तर सुनो।
कि अन्तर्यामी ईश्वर की प्रेरणा से हम सब कर्म करते हैं
ऐसे विचार कारि सकल कर्म ईश्वर मे समर्पण करके औ
कर्म कालमे आशक्ति रहित कर्म करते हैं तो उनको कर्मप्र
तिबन्धक नहीं होते और वे कर्म से लिप्त नहीं हैं जैसे जै
से पद्मपत्र जलमे निरन्तर रहते भी जलसे अलग है सोई
कहा कि ब्रह्मे कर्म अर्पण करि सङ्ग कहे आशक्ति छोडि
जो कर्म करैं हैं सो पाप से नहीं लिप्त होता जैसे कमलका
पत्ता जलमे रहि जलसे भिन्न है १०॥

दोहा

ब्रह्मसमर्पण कर्मकरी त्यागसंगको सोय कमल भिन्न ज
लसें यथा लिपें न पापहि सोय १०॥

53

कायेनमनसाबुद्ध्या केवलैरिन्द्रियैरपि योगिनःक र्मकुर्वंति संगंत्यक्त्वात्मशुद्धये ॥११॥

शांकरभाष्य

केवलसत्त्वशुद्धिमात्रफलमेव तस्य कर्मणः स्यात् यस्मात्कायेने ति कायेनदेहेनमनसाबुद्ध्याच केवलैरिन्द्रियैर्ममत्ववर्जितैरपि ईश्वरायैवक र्मकरोमीति नफलायेति ममत्वबुद्धिशून्यैरिन्द्रियैरपि केवलशब्दः कायादिभिर पि प्रत्येकंसंबध्यते सर्वव्यापारेषुममतावर्जनाय योगिनः कर्मिणः कर्मकुर्वंति संगंत्यक्त्वाफलविषयमात्मशुद्धये सत्त्वशुद्धयइत्यर्थः ॥११॥

आनंदगिरिकृतटीका

अविशुद्धसत्त्वेहि कृतेनकर्मणा किंस्यादित्याशंक्याह केवलमिति अतस्येश्वरा र्पणबुद्ध्यानुष्ठिते कर्मणि बुद्धिशुद्धिफलमित्यत्रैव हेतुमाह यस्मादिति केवलश ब्दस्य प्रत्येकंसंबन्धे प्रयोजनमाह सर्वव्यापारेष्विति ॥११॥

स्वामिकृतटीका

बंधकत्वाभावमुक्त्वामोक्षहेतुत्वं सदाचारेण दर्शयति कायेनेति कायेन स्नानादि मनसाध्यानादि बुद्ध्या तत्त्वनिश्चयादि केवलैः कर्माभिनिवेशरहि तैरिंद्रियैः श्रवणकीर्तनादिलक्षणंकर्मफलसंगंत्यक्त्वाचित्तशुद्धये कर्मयोगि नःकर्मकुर्वंति ॥११॥

पिशाचभाष्य

बुद्धिशून्यैःइंद्रियैःकेवलशब्दःकायादिभिरपिप्रत्येकं सं [illegible] [illegible] ॥११॥

बध्यते सर्वव्यापारादिषु ममतावर्जि कर्माणिकुर्वन्ति फलविषयं सत्त्वशुद्धये

रामानुजभाष्य

कायेनेति कायमनोबुद्धीन्द्रियसाध्यं कर्मस्वर्गादिफलसंगंत्यक्त्वा योगिन आत्म शुद्धये कुर्वंति आत्मगतप्राचीनकर्मबंधनविनाशाय कुर्वंतीत्यर्थः ॥११॥

अभिनवगुप्तकृतटीका

सर्वभूतानामात्मभूतआत्मायस्य ससर्वंसपि कुर्वाणो नलिप्यते कस्मात्प्र तिषेधाद्रूढत्वात् अतएवदर्शनादीनिकुर्वन्नपि अमावेवं भावयति प्रतिपत्ति दार्ढ्येन तिष्ठति चक्षुरादीनामिंद्रियाणां यदि स्वविषयेषु प्रवृत्तिर्ममात्रकि मायातं नह्यन्यकृतेन परस्य लेपः इति तदेव ब्रह्मणि कर्मणां समर्पणं अत्र विकल्पस्य गतसंगत्वात् अतो न लिप्यते योगिनश्च केवलैः संगरहितैः परस्परा

नयेदितिभि स्वकायादिभिः कुर्वंति कर्माणि संगाभावात् ॥ ११ ॥

परमार्थप्रपा

एवं बंधकत्वाभावमुक्त्वा मोक्षहेतुत्वं तदाचारेण दर्शयति कायेनेति कायेन स्ना
नोपवासादि मनसा ध्यानादि बुद्ध्या तत्वनिश्चयादि केवलैः कर्माभिनिवेशरहितैरिं
द्रियैः श्रवणकीर्तनादिलक्षणं कर्मफलसंगं त्यक्त्वा चित्तशुद्धये योगिनः कुर्वंति ॥ ११

वनमालीटीका

तदेव विवृणोति कायेनेति कायेन मनसा बुद्ध्येंद्रियैरपि योगिनः कर्मफलासक्तिं
त्यक्त्वा कर्म कुर्वंति कायादीनां सर्वेषां केवलैरिति विशेषणमीश्वरप्रीत्यैव करोमि
न तत्फलाय नेदं मदीयं कर्मेत्यादि ममताशून्यैरित्यर्थः आत्मशुद्धये चित्तशुद्ध्यर्थं ॥

कुलमवैजयन्ती

उक्तमर्थं विवृण्वन् सदाचारं प्रमाणयति कायेनेति कायेन देहेन मनसा बुद्ध्या च
केवलैर्ममत्वबुद्धिरहितैरिंद्रियैरपि देहाद्यभिमानरहिता योगिनो मुमुक्षव आत्म
शुद्धये आत्मगतानादिशुभाशुभरूपकर्मबंधनप्रध्वंसाय संगं त्यक्त्वा स्वर्गादिफल
कामं परित्यज्य देहादिभिः साध्यं कर्म कुर्वंति तस्मात्त्वमप्येवं बुद्ध्वैव कर्म कु
र्वित्यर्थः ॥ ११ ॥

तदेव विवृणोति ॥

मधुसूदनी टीका

कायेन मनसा बुद्ध्येंद्रियैरपि योगिनः कर्मिणः फलसंगं त्यक्त्वा कर्म कुर्वंति काया
दीनां सर्वेषां विशेषणं केवलैरिति ईश्वरायैव करोमि न मम फलायेति ममताशून्यै
रित्यर्थः आत्मशुद्धये चित्तशुद्ध्यर्थं ॥ ११ ॥

सदानंदी टीका

त्यक्त्वा फलाभिलाषं तु कर्म कुर्वंति कर्मिणः चित्तशुद्ध्यभिधया सर्वैवेव कायेन मन
सेंद्रियैः १ केवलैरिति सर्वेषां कायादीनां विशेषणं ईश्वरार्थं करोमीदं नैतन्मम फ
लाय च २ स्वाम्यर्थं भृत्यवच्च ममतामलवर्जितैः ३ ॥ ११ ॥

नीलकंठी टीका

कायेनेति केवलैरिति विपरिणामेन सर्वत्र संबंधनीयं केवलेन कायेन अहमयं
आत्मगोप्ता वेत्यात्माध्यासशून्येन एवमन्यत्रापि संगं त्यक्त्वा देहादिभ्यो विविक्तोपि ऽ
आत्मनि तार्किकादिवदहं करोमीत्यभिनिवेशं त्यक्त्वा योगिनः कर्म कुर्वंति आत्मशु
द्धये चित्तशुद्ध्यर्थं तस्मात्त्वयापि तत्रैवाधिकारोस्तीति तदेव त्वं कुरु ॥ ११ ॥

आनन्दीटीका

इदमेव लक्षयति तत्रतत्र संयमेन भूयसीनां भूमीनां जये विदेहाधारणाभ्यासाः इन्द्रियजयश्चाऽऽविर्भावान्मनोजवित्वविकारैश्वर्यभावः प्रधानजयश्चेति सिद्धित्रयं प्राणकायिकस्य तत्रतत्र देशे काले च हस्तपादहृगादि भोग्यस्य कर्मणः क्षपणार्थं केवलेन कायेनेन्द्रियबुद्धिमनोहंकारनिरपेक्षेणैव संगं परस्पराभिप्रायेण स्वबलाबंधरूपं प्रवर्तनं कामसिद्धये भूतेन्द्रियसंघातात्मकानि स्व एष धर्मेण स्वरूपेव स्थानार्थं

५ योगारूढाः कर्म कुर्वन्ति एवं मानसिकस्य कर्मणः भोगक्षपनार्थं केवलेन मनसेत्यादि योज्यम् ॥ ११ ॥

रामकंठीटीका

यत एवमतः ॥

कायग्रहणेन कर्मेन्द्रियाणि मनोबुद्धिग्रहणेनान्तःकरणम् इन्द्रियग्रहणेन बुद्धीन्द्रियाण्यत्र गृह्यन्ते एतैः केवलैस्त्रिविधैर्याहंकाराद्यपरिग्रहाद्विशुद्धैः पृथग्भूतैर्वा कर्म यथास्वं व्यापारैर्यावद्विचोदनया शारीरमपव्याभिचारितया च तस्य जेयोगिनः कर्मयोगसमाहिताः कुर्वन्त्यनुतिष्ठन्त्येव किन्तु यथोक्तस्य सत्त्वस्यात्मनः सिद्धये हंतयाप्रतीतिनिष्पत्तये संगं त्यक्त्वा कुर्वन्तीति किमुक्तं भवति संगत्याग एव संन्यासः न कर्मत्यागः [illegible] ॥ ११ ॥

तदेव विशुद्धिहेतुत्वं विवृणोति ॥ लासिकी [illegible] टीका

योगिन आत्मतत्त्वे समाहिताः संगं कर्मणि लीनवित्तत्वं त्यक्त्वा देहेन मनसा बुद्ध्या बुद्धिकर्मेन्द्रियैरपि केवलैरहन्तयाऽऽविद्धाः ममतया सहैः कर्म कुर्वन्त्येव किमर्थमित्याह आत्मशुद्धये आत्मनः स्वस्वभावस्य शुद्धये केवलाय देहाभिमानमलशोधनाय तदुक्तं कुलार्णवे कर्मणोदीरितं

४ ज्ञानं ज्ञानेन शिवतां व्रजेत् शिवैकात्मेन मुक्तिः स्यात्तस्मात्कर्म समाचरेदिति संगत्यागलक्षणं योगवासिष्ठे अन्तास्थयेति भावानां यद्भावनमान्तरमनाहं कर्ता न भोक्तेति सामान्यो भावसंगमः इति [illegible]

॥

पंचोलीटीका

कर्मणांबंधकत्वाभावप्रकारमुक्त्वातस्यचित्तस्यशुद्धिफलत्वंस
दाचारेणदर्शयति कायेनेति योगिनःकर्मिणःआत्मशुद्धयेअंतः
करणशुद्ध्यर्थंकायेन मनसाबुद्ध्याकेवलैरिंद्रियैःकायमनोबु
द्धिभिःसंगंत्यक्त्वाफलविषयसंगंत्यक्त्वाकर्मनित्यनैमित्तिकंकुर्वंति ॥

रणवीरसमिद्धोधिनी ॥

उक्तमेवार्थंस्पष्टयति कायेनेति अकेवलैरितिच्छेदः कायेनेतिक
र्मेंद्रियाणि मनसाबुद्ध्येत्यंतःकरणद्वयं इंद्रियैरिति ज्ञानेंद्रियाणि
दृश्यंते पाठक्रमादर्थक्रमोबलीयानितिन्यायेन व्युत्क्रमोपिक्रमेणै
वव्याख्येयः आदौकायग्रहणंचकर्मेंद्रियव्यापारस्यैवप्राधान्येनप्र
भासार्थं तथाच योगिनःकर्मयोगिनः इंद्रियैर्ज्ञानेंद्रियैः प्राग्गुत्तरूपी
कृत्य तदुक्ताश्चापवादरूपश्रुतिगोचरीकृत्य तन्मुक्तशास्त्राणिवाग
संलग्नानिस्पर्शेनसंभाव्यबुद्ध्याचतत्त्यतिकारोपायंनिश्चित्यमनसा
चास्त्राणिसमस्य कर्मेंद्रियैश्चतत्तद्योगादिकंविधायेत्यैतैरकेवलैः
सच्छदितैरेवकर्मसमरचयालक्षणंकुर्वंति प्रतिपादयंति किमर्थं
आत्मनःस्वस्यशुद्धिः पापास्पर्शोकीर्तिमलदूरीकरणंवातदर्थं प
तादृशाकर्माचरणेनाकीर्त्यादिकर्मेदिकंनरकादिलक्षणंपापरि
कंचमलमपसरतीतिभावः कथंकुर्वंति संगंत्यक्त्वा अहंकर्तेदं
तव्यइतिगर्वत्वागुपाधिमहत्तिनिरोधकंविहायेत्यर्थः ११॥

मथभाष्य

कायेनेति पुनरुक्तमादिनियमनार्थंमुक्तमुक्तफलमाह ११॥

भाषा अनुवाद

निष्काम कर्म बन्धक नहीं है इस कहनेके बाद अब उत्तम मनुष्यों को कर्म के द्वारा मुक्ति दिखावते हैं कि शरीर से स्नानादि मनसे ध्यानादि औ बुद्धिसे तत्त्व निश्चयादि तथा कर्म मे आशक्ति रहित औ फलाभिलाष शून्य होकर इन्द्रियों के द्वारा श्रवण कीर्तन आदि चित्तशुद्धिके अर्थ कर्मानुष्ठाई योगी कर्म करते हैं सोई कहा कि कायमन बुद्धिसे औ केवल इन्द्रियों से आत्मशुद्धिके हेतु सङ्ग छोडि योगीजन कर्म करते हैं ११ ॥

दोहा

देह मन अरु बुद्धिसें केवल इंद्रियसें नांहि योगीकर्मनिजशुद्धि हितकरैं सो संग विहांहि ११॥

56

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् अयु
क्तः कामकारेण फले सक्तो निबध्यते ॥१२॥

शांकरभाष्यं

तस्मात्तैव न वाधिकार इति ऊक्तकर्मैव यस्माच्च युक्त इति युक्त ईश्वराय कर्माणि
करोमि न मम फलायेति एवं समाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शांतिं
मोक्षाख्यामाप्नोति नैष्ठिकीं निष्ठायां भवां सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसन्यास
ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः यस्तु पुनरयुक्तोऽसमाहितः कामकारेण कर
णं कारः कामस्य कारः कामकारस्तेन कामकारेण कामप्रेरिततयेत्यर्थः मम
लाभायेदं करोमि कर्मेत्येवं फले सक्तो निबध्यते अतस्त्वं युक्तो भवेत्यर्थः १२

आनन्दगिरिकृतटीका

कर्मणश्चित्तशुद्धिफलत्वे तादर्थ्येन कर्मानुष्ठानमेव न तु कर्तव्यमिति यस्मादित्य
स्यापेक्षितं वदन् फलितमाह तस्मादिति न अत्र संगं त्यक्त्वा कर्मानुष्ठाने तथा क
र्तव्यमित्याह यस्माच्चेति युक्तः सन् फलं त्यक्त्वा कर्म कुर्वन् मोक्षाख्यां शांतिं यस्मा
दाप्नोति तस्मात्त्वया सङ्गं त्यक्त्वा कर्म कर्तव्यमिति योजना विपक्षे दोषमाह अयुक्त
इति युक्तत्वं व्याकरोति ईश्वरायेति फलं परित्यज्य कर्म कुर्वन्निति शेषः नैष्ठिकीं
शांतिमित्येतदेव विशदयति सत्वेति द्वितीयमर्द्धं विभजते यस्त्विति असमाधाने
दोषमर्जं तस्यानियोगं दर्शयति अतस्त्वमिति १२॥

स्वामिकृतटीका

ननु तेनैव कर्मणा कश्चिन्मुच्यते कश्चिद्बध्यत इति व्यवस्था कथमत आह युक्त
इति युक्तः परमेश्वरैकनिष्ठः सन् कर्मणां फलं त्यक्त्वा कर्माणि कुर्वन्नात्यन्तिकीं शां
तिं मोक्षं प्राप्नोति अयुक्तस्तु बहिर्मुखः कामकारेण कामतः प्रवृत्त्या फले आस
क्तो नितरां बंधं प्राप्नोति १२॥

पिशाचभाष्यं

युक्त इति तस्माद्युक्तः कर्मफलं त्यक्त्वा युक्त ईश्वराय कर्माणि न कर्मफलायेति
एवं समाहितः सन् कर्मफलं त्यक्त्वा शांतिं मोक्षाख्यामाप्नोति नैष्ठिकीं निष्ठायां
भावां सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः
यस्तु पुनरयुक्तः असमाहितः कामेन कारणं कामकारस्तेन कामकारेण का
मप्रेरिततयेत्यर्थः मम फलायेदं करोमि कर्मेत्येवं फले सक्तो निबध्यते न मुक्तो भ

गी॰ टी॰ पं॰

51

वेदित्यर्थः १२॥

रामानुजभाष्यं

युक्त इति युक्तः आत्मव्यतिरिक्तफलेष्वचपलः आत्मैकप्रवणः कर्मफलं त्यक्त्वा केवलात्मशुद्धये कर्मानुष्ठाना नैष्ठिकीं शान्तिमाप्नोति स्थिरामात्मानुभवरूपां निर्वृतिं प्राप्नोति अयुक्तः आत्मव्यतिरिक्तफलेषु चपलः आत्मावलोकनविमुखः कामकारेण फले सक्तः कर्माणि कुर्वन्नित्यं कर्मभिर्बध्यते नित्यसंसारी भवति अतः फलसंगरहित इन्द्रियाकारेण परिणतानां प्रकृतेः कर्माणि संन्यस्यात्मनो बंधमोचनायैव कर्माणि कुर्वीतेत्युक्तं भवति १२॥

अभिनवगुप्तकृतटीका

[illegible] १२ नैष्ठिकीमपुनरावर्तिनीम्

तस्मात्तवैव तत्राधिकारः इति कर्मैव कुरु

परमार्थप्रपा टीका

अथ विद्वदविदुषोः फलमाह युक्त इति कर्मफलं त्यक्त्वा युक्तः शुद्धचित्तः प्रमाता नैष्ठिकीं [illegible] आत्यन्तिकीं शान्तिं मोक्षं प्राप्नोति अथायुक्तस्य गतिमाह अयुक्त इति अयुक्तो बहिर्मुखः कामकारेण कामतः प्रवृत्त्या फले सक्तः सन्निबध्यते एवं तावदिह प्रवृत्तस्य कर्मसंन्यासापेक्षया कर्मयोगो विशिष्यते इति सर्वमनवद्यं १२॥

वनमालीटीका

ननु कर्मकर्तृत्वाविशेषेऽपि कथमेकस्य मोक्षोऽपरस्य बंधः कर्मणेत्यत आह युक्त इति युक्तो जितेन्द्रियो विषयभोगालंपटो भगवत्प्रीत्यर्थमिदं कर्म न मम फलायेत्येवमभिप्रायवान् कर्मफलं त्यक्त्वा कर्माणि कुर्वन् शान्तिं मोक्षाख्यां नैष्ठिकीं सत्त्वशुद्धिश्रवणमनननिदिध्यासनापरोक्षप्रमाणनिष्ठाक्रमेण जातां अयुक्तस्त्वयुक्तो जितेन्द्रियत्वाभिप्रायशून्यः सकामः कारेण कामतः प्रवृत्त्या मम फलायैवेदं कर्म करोमीति फले सक्तो निबध्यते तत्र कर्मफलभो-

पु॰ गाय नीचोच्चयोनिषु नितरां गच्छतीत्यर्थः १२॥

[illegible]वैजयन्ती टीका

ननु तस्यैव कर्मणोऽनुष्ठानेनैकोऽमुच्यते परो बध्यत इति कथं स्यादित्याशंक्य व्यवस्थामाह युक्त इति युक्तः स्वात्मस्वरूपे नतरां स्थिरमनाः आत्मैकमनारस्यार्थः कर्मफलमैहिकामुष्मिकभोगरूपं त्यक्त्वा परित्यज्य केवलात्मप्राप्ये कर्माचरणान्नैष्ठिकीं निश्चलां शान्तिमात्मावलोकरूपां निर्वृतिं प्राप्नोति मा॰

मोतिप्राप्नोति अयुक्तस्त्वात्मेतरः स्थिरमनात्मकामकारेण कामतः फलेस
क्तस्सन्लिप्तस्सन्निबध्यतेनित्यमेवजन्ममरणलक्षणेसंसारेपरिभ्रमती
त्यर्थः इत्येवंव्यवस्थायांवंधमोक्षोस्मात्तंतस्मात्फलानुसंधानरहितेका
र्मकृतात्मप्रवणोभवेदितिभावः १२॥

मधुसूदनी टीका

कर्तृत्वाभिमानसाम्येपितेनैवकर्मणाकश्चिन्मुच्यते कश्चित्तुबध्यत इतिवै
षम्येकोहेतुरितितत्राह। युक्तः ईश्वरायैवेतानिकर्माणिनममफलायेत्ये
वमभिप्रायवान्कर्मफलंत्यक्त्वाकर्माणिकुर्वन्शांतिंमोक्षाख्यामाप्नोतिनैष्ठि
कीम् सत्वशुद्धिनित्यानित्यवस्तुविवेकसंन्यासज्ञाननिष्ठाक्रमेणजाता मि
तियावत् यस्त्वयुक्तः ईश्वरायैवेतानिकर्माणिनममफलायैवेदंकर्म
करोमीतिफलेसक्तोनिबध्यतेकर्मभिर्नितरांसंसारबंधंप्राप्नोति यस्मादेवंत
स्मात्वमपियुक्तः सन्कर्माणिकुर्विति वाक्यशेषः १२ [illegible]
[illegible]
[illegible] ॥

सदानंदी टीका

कर्तृत्वाध्यासस्साम्येपिकश्चित्तेनैवकर्मणा मुच्यतेबध्यतेकश्चिद्वैषम्येहेतुरयु
क्तः १ भगवीश्वरायैवकर्माणिनैतानिवफलायमे इत्यभिप्रायवान्युक्तस्त्यक्त्वाक
र्मफलंसुधीः २ कुर्वन्कर्माणिमोक्षाख्यांशांतिमाप्नोतिनैष्ठिकीं शुद्धिविवेकसं
न्यासज्ञाननिष्ठाक्रमेणया ३ जातास्यानैष्ठिकीशांतिर्मोक्षइत्यासतामियात्
यस्त्वयुक्तोस्तिएतस्माद्विपरीतः सकामतः ४ मह्यमेवफलायेदंकरोमीति
फलेसक्तः कर्मभिर्नितरांबंधंसंसाराख्यंप्रयात्यसौ ५ देहाभिमानसाम्येपि
कृतेभगवदर्पणं कर्मश्रौतंतथास्मार्तंलौकिकंचसमस्तकैः ६ चित्तशुद्ध्या
सवैराग्यज्ञानद्वारविमुक्तिदं तदेवकामकारेणकृतंसत्फलकामिभिः ७ बंध
वंधायमूढानांभवतीत्याशयोहरेः यस्मादेवंततस्त्वंभोविहायासक्तिमोध्य
जं ८ सर्वकर्मफलेषीशप्रतोषार्थंकुरुक्रियां वैदिकींलौकिकींवापिवंधान्मु
क्तोभविष्यसि ९ १२॥

नीलकंठीटीका

किंचयुक्तइति युक्तोब्रह्मण्याधायकर्माणीत्यादिनाउक्तलक्षणः कर्मणांफलंत्य
क्त्वाईश्वरेसमर्प्यशांतिंकैवल्यं नैष्ठिकींसत्वशुद्ध्यादिक्रमप्राप्तब्रह्मनिष्ठाफलभूतां

ममफलायेत्यभिप्रायपू
तकामकारेणकामतः
ममफलाय

गी॰ प्राप्नोति अयुक्तस्तद्विपरीतःकामकारेणस्वैरवृत्त्याफलेसक्तःसन्
टी॰ नितरांबध्यते १२ ॥
५

आनंदगीटीका

एतद्देवाभ्यासार्थंपुनराह युक्तःप्रोक्तेनक्रमेणाभ्यस्तयोगधारणः
कर्मणःकायिकादेःफलंब्रह्मण्याधायकर्माणीतिआख्यातात्यान्त
58 सारंपरस्याभिप्रायप्रवृत्तिजनितसत्त्वशुद्ध्यादिकंत्यक्त्वानैष्ठिकींप
रमांकाष्ठांप्राप्तःशांतिमाप्नोति अयुक्तोनभ्यस्तयोगोयुगपक्षस्तदृष्टय
स्यवृत्तिःक्रमस्तस्यनिर्दिष्टःक्रोष्टे तथापिदृष्टेत्रयस्यतत्स्वविकावृत्तिः
स्वांस्वांप्रतिपद्यन्तेपरस्पराक्षतहेत्वकीवृत्तिमित्युक्तिक्रमात्ताभिनका
मकारेणफलेसक्तःस्वलाबंधप्राप्तेफलेसक्तोनिबध्यते १२ ॥

सचसंगत्यागःकर्मफलत्यागात्प्रबंध रामकंठीटीका प्रतिपादितान्नद्भवतीत्याह ॥

योज्ञाननिष्ठतयाकर्मणियुक्तःसन्ननभिसंध्यानेनकर्मफलंत्यक्त्वानैष्ठिकी
निष्ठायांपरस्यांकष्ठायांस्थितांम् शांतिंद्वैतप्रपंचलयात्सोभवति तस्या
त्मस्वरूपविश्रमात्मकंप्रशमंसमधिगच्छति यस्तुनिसर्गदुष्टस्तेनकर्मणि
सर्वदाप्रवृत्तःसन्युक्तोनभवति यथोक्तेनक्रमेणसमाहितोनभवति सोव
श्यमेवफलसंगित्वाद्बध्यते संसारेनियम्यते [illegible]
[illegible] १२ ॥

संगत्यागएवसंन्यासोनकर्मत्यागः लाभ्सकी वनमालीटीका तस्मात्कर्मफ॰ परसां॰ लत्यागादेव संन्यासः
संभावतीत्याह युक्तआत्मनिष्ठःकर्मफलमननभिसंधानेनत्यक्त्वा निष्ठायांकाष्ठायांस्थितां
नैष्ठिकीमपुनरावर्तिनींशांतिंद्वैतप्रपंचदेभोपरतिंमोक्षाख्यांक्रमेणा
प्नोति अयुक्तोबाह्यप्रवृत्तोवहिर्मुखःकामकारेणकामतोभिलाषेणप्र
वृत्त्याफलेसक्तोलीनचित्तोनिबध्यते संसारबंधंप्राप्नोति [illegible]
[illegible]) १२ ॥

पंचोलीटीका

ननुकथंतेनैवकर्मणाकश्चिन्मुच्यतेकश्चिद्बध्यतेइतिव्यवस्थि
ताइत्यत आह युक्तइति युक्तःफलनिःस्पृहःईश्वरार्थंकर्मकुर्वन्॰ २१
शान्तिंमोक्षाख्यांनैष्ठिकींसत्त्वशुद्धिक्रमेणैवप्रत्यगात्मज्ञाननिष्ठा॰
प्राप्नोति यस्त्वयुक्तःकर्मकामीसकामप्रेरणेनफलेसक्तोनिबध्यते १२

रणावीरसमिद्धोधिनी॥

नचसन्न्यसनादेवेत्यत्रसूचितमर्थंविवृणोति युक्तइति युक्तःक
र्मसुप्रवृत्तःकर्मफलंकर्मणः प्रक्रान्तस्ययुद्धस्यफलंपरवध॰
स्वमरणान्यतरलक्षणंत्यक्त्वाईश्वरेसमर्प्य परमेश्वरएवजय
पराजयविषयेस्वतंत्रःकर्तायस्यतदिच्छाविषयंस्यात्तदेवभवि
ष्यति परमहंस्वधर्ममनुतिष्ठेयंयेनसएवेश्वरः प्रीतःस्यादिति
निश्चित्य नैष्ठिकींशान्तिंब्रह्मसायुज्यलक्षणंमोक्षसुखमाप्नोति
कामकारेण कामःपुत्रादिजीवितविषयेच्छातस्यकारेणकरणे
न प्रयुक्तःविहितकर्माननुतिष्ठन् निबध्यतेपापेनाभिभूयते
शत्रुभिर्बहुधानीयतेच यतोयंफलेप्रोक्तलक्षणेसक्तःकृतासंगः
पुनःपुनस्तदेवसंस्मरन्नित्यर्थः तथाचश्रुतिः नकर्मणानप्रज
यायधनेनत्यागेनैकेनामृतत्वमानशुरिति यथाचतृतीयाध्या
येनकर्मणामित्यत्रव्याख्याता १२॥

अथभाष्य

युक्तइति युक्तोयोगयुक्तः पुनःसन्न्यासपराङ्गार्थस्यष्ट
यति १२॥

59

भाषा अनुवाद

जो ऐसी शङ्का करो कि वही एक कर्मसे कोईतो मु
क्त औ कोइका बन्ध यह कैसी व्यवस्था है तो इसका
निवारण करते कहते हैं कि योगी कहे कर्मकारी पुरु
ष ईश्वरमे एक निष्ठ हो कर्म फल को त्यागि कर्म अनुष्ठा
न करिके अत्यन्त शान्ति स्वरूप जो मुक्ति तिसको प्राप्त
होते हैं परन्तु अयुक्त कहे कामना विशिष्ट कर्म फ
लाशक्त वहिर्मुख लोग काम्यकर्म से अवश्य ही बद्ध
होतेहैं युक्त कहे ईश्वरार्थ कर्म करने वाले १२ ॥

दोहा

कर्मादिके फलत्याग दृढ शांति प्राप्त होय योगि पुत्रादिक के
स्नेहसें बधयो हि सक्त अयोगि १२॥

60

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही नैव कुर्वन्न कारयन् १३ ॥

शांकरभाष्यं

यस्तु परमार्थदर्शी स इति सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य । नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं च तानि सर्वाणि कर्माणि मनसा विवेकबुद्ध्या कर्मादौ अकर्मसंदर्शनेन संत्यज्येत्यर्थः आस्ते तिष्ठति सुखं त्यक्तवाङ्मनःकायचेष्टो यतिः निरायासः प्रसन्नचित्तः आत्मनोऽन्यत्र निवृत्तबाह्यसर्वप्रयोजन इति सुखमास्त इत्युच्यते वशी जितेन्द्रिय इत्यर्थः क्वास्त इत्याह नवद्वारे पुरे सप्त शीर्षण्यात्मन उपलब्धिद्वाराण्यर्वाग् द्वे मूत्रपुरीषविसर्गार्थे तैर्द्वारैर्नवद्वारं पुरमुच्यते शरीरं पुरमिव पुरमात्मैकस्वामिकं तदर्थप्रयोजनैश्चेन्द्रियमनोबुद्धिविषयैरनेकफलविज्ञानस्योत्पादकैः पौरैरिवाधिष्ठितं तस्मिन् नवद्वारे पुरे देही सर्वं कर्म संन्यस्यास्ते इति किं विशेषणेन सर्वो हि देही संन्यास्यसंन्यासी वा देह एवास्ते तत्रानर्थकं विशेषणमित्युच्यते यस्त्वज्ञो देही देहेन्द्रियसंघातमात्रात्मदर्शी स सर्वोऽपि गेहे भूमावासने वासे इति मन्यते न हि देहमात्रात्मदर्शिनो देह इव देहे आसे इति प्रत्ययः संभवति देहादिसंघातव्यतिरिक्तात्मदर्शिनस्तु देहे आसे इति प्रत्यय उपपद्यते परकर्मणां च परस्मिन्नात्मन्यविद्ययाध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते उत्पन्नविवेकविज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेहे इव देह एव नवद्वारे पुरे आसनं प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या देह एव विशेषविज्ञानोत्पत्तेर्देह एवास्त इत्यस्त्येव विशेषणफलं विद्वदविद्वत्प्रत्ययभेदापेक्षत्वात् यद्यपि कार्यकरणकर्माण्यविद्ययात्मन्यध्यारोपितानि संन्यस्यास्ते इत्युक्तं तथाप्यात्मसमवायि तु कर्तृत्वं कारयितृत्वं च स्यादित्याशंक्याह नैव कुर्वन् स्वयं न च कार्यकरणानि कारयन् क्रियासु प्रवर्तयन् किं यत्तत्कर्तृत्वं कारयितृत्वं च देहिनः स्वात्मसमवायि सत् संन्यासान्न संभवति यथा गच्छतो गतिः गमनव्यापारपरित्यागे न स्यात्तद्वत् किं वा स्वत एवात्मनो नास्तीत्युच्यते नास्त्यात्मनः स्वतः कर्तृत्वं कारयितृत्वं चोक्तं ह्यविकार्योऽयमुच्यते शरीरस्थोऽपि कौन्तेय न करोति न लिप्यत इति ध्यायतीव लेलायतीवेति श्रुतेः १३

तर्हि फलेसक्तिं त्यक्त्वा सर्वैरपि कर्म कर्तव्यमिति कर्मसंन्यासस्य निरवकाशत
मित्याशंक्याविदुषः सकाशाद्विदुषो विशेषं दर्शयति यस्त्विति सर्वकर्मपरि
त्यागे शास्त्रं संमतं व्यावर्तयति शास्त्रइति हृन्निलभमानोपि शरीरसंतापेनाध्या
त्मिकादिना तप्यमानस्तिष्ठतीति चेन्नेत्याह सुखमिति कार्यकरणसंघा
तपारवश्यं पर्युदस्यति वशीति आसनस्यापेक्षितमधिकरणं निर्दिशति
नवेति देहसम्बन्धाभिमानाभासवत्वमाह देहीति मनसा सर्वकर्म
संन्यासेपि लोकसंग्रहार्थं बहिः सर्वकर्मकर्तव्यमिति शास्त्रं प्रस्याह नै
वेति तान्येव सर्वाणि कर्माणि परित्यज्याति विशिनष्टि नित्यमिति नै
शेषपरित्यागे हेतुमाह तानीति यदुक्तं सुखमास्तइति तदुपपादय-
तित्यक्तेति जितेंद्रियत्वं कायवशीकारस्याप्युपलक्षणं द्वेश्रोत्रे द्वेचक्षु
षी द्वेनासिके वागेकेति सप्तशीर्षण्यानि शिरोगतानि शाह्यापुपा-
लक्षिहाराणि तथापि कथं नवद्वारत्वमधोगताभ्यां पायूपस्थाभ्यां ।
सहेत्याह सर्वाणीति शरीरस्य पुरसाम्यं स्वामिना पौरैश्चाधिष्ठितत्वेन
दर्शयति आत्मेत्यादिना यद्यपि देहे जीवनत्वाद्देहसंबन्धाभिमानाभा
समानवतिष्ठते तथापि प्रवासीव परगेहे तत्पूजापरिभवादिभिरप्र
हृष्टो न विषीदन्व्यामोहादिरहितस्तिष्ठतीति मत्वाहतस्मिंनिति ।
विशेषणमाक्षिपति किमिति तदनुपपत्तिमेवादर्शयति सर्वो हीति
सर्वसाधारणो देहावस्थाने संन्यस्य देहे तिष्ठति विद्वानिति विशेषणम
किंचित्करमिति फलितमाह तत्रेति विशेषणफलं दर्शयन्नुत्तरमाह उ
च्यतइति किमविवेकिनं प्रति विशेषणानर्थक्यं चोद्यते किंवा विवेकिनं
प्रतीति विकल्पाद्यमङ्गीकरोति यस्त्विति अज्ञत्वदेहित्वे हेतुः तदेव देहि
त्वं स्फुटयति देहेति संघातात्मदर्शिनोपि देहे स्थितिप्रतिभासः स्यादिति
चेन्नेत्याह नहीति द्वितीयं दूषयति देहादीति शङ्कादिष्व देहस्यावस्थानेना
त्मावस्थानभ्रमव्याहत्यर्थं देहे विद्वानास्तइति विशेषणमुपपद्यते वि
वेकवतो देहेवस्थानप्रतिभाससंभवादित्यर्थः ननु विवेकिनो देहावस्थ

नप्रतिभानेपि बाह्यतो देहव्यापारात्मनो कर्मणां तस्मिन् प्रसंगा
भावात् तत्त्यागेन कृतत्वस्य देहेवस्थानमयुक्ततेतत्राह सर्वकर्मणां चेति
ननु विवेकिनो दिगम्बरवद्धिं न बाह्याभ्यंतराविक्रियप्रत्यगात्मनो मन्य
मानस्य कुतो देहेवस्थानमास्थातुं शक्यते तत्राह उत्पन्नेति तत्र हेतुमाह
प्रारब्धेति यद्धि प्रारब्धफलं धर्माधर्मात्मकं कर्म तस्योपभक्तस्य क्षी
णत्वेनुपभुक्ताद्देहादिसंस्कारोनुवर्तते तदनुवृत्त्या च तत्रैव देहे विशेष
विज्ञानमवस्थानविषयमुपपद्यते अतो विवेकवतः संन्यासिनो देहेव
स्थानव्यपदेशः संभवतीत्यर्थः अविद्वत्तत्त्वयापेक्षया विशेषणासंभ
वेपि विद्वत्त्वयापेक्षया विशेषणमर्थवदित्युपसंहरति देहएवेति
देहेस्वावस्थानविषयो विद्वत्त्वप्रत्ययस्तद्विषयस्त्वविद्वत्त्वप्रत्ययो
रेवं भेदे विद्वत्त्वप्रत्ययापेक्षया विशेषणमर्थवदित्युपसंहरन्नेव देहे वि
शदयति विद्वदिति आरोपितकर्तृत्वाद्यभावेपि स्वगतकर्तृत्वादि कु
र्वीरन्नित्याशंकामनूद्य दूषयति यद्यपीत्यादिना क्रियास्वप्रवर्तयन्ना
त्मेति पूर्वेण संबंधः पूर्वस्यापि नास्तीत्यनेन संबंधः कर्तृत्वं कारयितृत्व
ञ्चात्मनो नेत्येवं विचारयति किमिति यत्कर्तृत्वं कारयितृत्वं च तत्किं दे
हिनं स्वात्मसमवायि सदेव संन्यासमात्रं भवतीत्युच्यते यथा गच्छतो देव
दत्तस्य स्वगतैव गतिं तत्स्थित्या त्यागं भवति अथवा स्वाश्रयेन कर्तृ
त्वं कारयितृत्वं चात्मनो नास्तीति वक्तव्यमाद्ये सक्तिं त्वं द्वितीये कृतं स्यात
मित्यर्थः द्वितीयपक्षमाश्रित्योत्तरमाह अत्रेति उक्तेर्थे वाक्योपक्रम
मनुकूलयति उक्तं हीति तत्रैव वाक्यशेषमपि सम्पादयति शरीरस्थो
पीति स्मृत्युक्तेर्थे श्रुतिमपि दर्शयति ध्यायतीवेति उपाधिगतैव सर्वा
विक्रियानात्मनि स्वतोस्तीत्यर्थः १३ ॥

स्वामिकृतटीका

एवं तावच्चित्तशुद्धिशून्यस्य संन्यासात्कर्मयोगो विशिष्यते इत्येतन्नयंवि
ते इदानीं शुद्धचित्तस्य संन्यासः श्रेष्ठ इत्याह सर्वकर्माणीति वशी जि
तचित्तः सर्वाणि कर्माणि विक्षेपकाणि मनसा विवेकयुक्तेन संन्यस्य

सुखंयथाभवतिएवंज्ञाननिष्ठः सन्नास्तेकुत्रास्तइत्यतआह नवद्वारेनेत्रे
नासिकेकर्णौमुखंचेतिसप्तशिरोगतानिअधोद्वेपायूपस्थरूपेइत्येवंन
वद्वाराणियस्मिन्पुरेपुरवद्देहेभावमन्येदेहेऽवतिष्ठति अहंकाराभा
वादेवस्वयंतेनदेहेननैवकुर्वन् ममकाराभावाच्चनकारयन्नित्याविशु
द्धविज्ञानाद्याह निरूक्ता अशुद्धविज्ञोहिसंन्यस्यपुनःकरोतिकारयतिच ।
नत्वयंतथाअतः सुखमास्तइत्यर्थः १३ ॥

पिशाचभाष्यं

यस्तुपरमार्थदर्शी सर्वकर्माणीति सनित्यंनैमित्तिकंकाम्यंप्रतिषि
द्धंचतंसर्वाणिकर्माणितानिमनसाविवेकबुध्याअकर्मदर्शनेनसं
त्यज्येदित्यर्थः आस्तेतिष्ठतिसुखमित्यर्थः वाङ्मनःकायचेष्टानिरायां
सः प्रसन्नचित्तः आत्मनोन्यत्रनिवृत्तान्यबाह्यसर्वप्रयोजनइतिसुख
मास्तेइत्युच्यते वशीजितेंद्रियइत्यर्थः क्वास्तइत्यत्राह नवद्वारेसप्तशी
र्षाणीत्यात्मनउपलब्धिद्वाराणि अधोद्वेमूत्रपुरीषविसर्गार्थेइतिते
द्वारैर्नवद्वारंपुरमुच्यते शरीरंपुरमिवपुरमात्मैकस्वामिकंतदर्थप्रयो
जनैश्चेंद्रियमनोबुद्धिविषयैः अनेकफलविज्ञानोत्पादकैः पौरैरिवा
धिष्ठितेदेहेदेहीसर्वाणिसंन्यस्यास्तेकिंविशेषणेन सर्वोपिदेहीसं
न्यस्यसंन्यासीवदेहएवास्तेइतिचेदुच्यते यस्त्वज्ञोदेहेंद्रियसंघातमा
त्रात्मदर्शीसः सर्वोपिदेहेभूमावासनेवाआसइतिमन्यते नहिदेह
मात्रात्मदर्शिनोगेहइवदेहेआसइतिप्रत्ययउपपद्यते परकर्माणांच
परस्मिन्नात्मन्यविद्ययाध्यारोपितानांविद्ययाविवेकज्ञानेनमन
सासंन्यासउपपद्यते उत्पन्नविवेकज्ञानस्यसर्वकर्मसंन्यासिनोपिदे
हएवनवद्वारआसनंप्रहत्तंआरब्धकर्मादिसंस्कारशेषानुवृत्यादेह
एवविशेषज्ञानोत्पत्तेः देहएवास्तेइत्यस्त्येवविशेषणफलंविद्वदवि
द्वत्प्रत्ययभेदापेक्षत्वात् यद्यपिकर्माण्यविद्ययाध्यारोपितानिसंन्यस्यास्तेइ
त्युक्तं तथापिआत्मसमवायिकर्तृत्वंकारयितृत्वंचदेहिनःस्वात्म
समवायिसन्नसंन्यासोभवति यथागच्छतोगतिः किंवास्वतएवात्मनो।

नास्य व्रोच्यते नाप्यस्यात्मनः कर्तृत्वं कारयितृत्वं वा उक्तं हि अविका
र्योयमुच्यत इति शरीरस्थोपि कौंतेय न करोति न लिप्यत इति ध्यायती
व लेलायतीवेति श्रुतेः १३ ॥

रामानुजभाष्य

अतो देहाकारपरिणतायां प्रकृतौ कर्तृत्वसंन्यास उच्यते सर्वेति आत्म
नः प्राचीनकर्ममूलदेहसंबंधप्रयुक्तमिदं कर्मणां कर्तृत्वं न स्वरूपप्र
युक्तमिति विवेकविषयेण मनसा सर्वाणि कर्माणि नवद्वारे पुरे संन्यस्य
वशी देही स्वयं देहाधिष्ठानमकुर्वन् देहं नैव कारयन् सुखमास्ते १३ ॥

अभिनवगुप्तकृतटीका

नैष्किंचनलक्षणवर्णितं यथा वेश्मांतर्गतस्य पुंसो न गृहगतैर्जीर्णता
दिभिर्योगः एवं ब्रह्मवत्तयादिभिः भगवान् नवकाले कृतदेहगेह
गतस्यानन तद्धर्मयोगः १३ ॥

परमार्थप्रपा टीका

इदानीं शुद्धचित्तस्य संन्यास एव श्रेयानित्याह सर्वकर्माणीति वशी जित
चित्तः सर्वकर्माणि विक्षेपकाणि विवेकयुक्तेन मनसा संन्यस्य सुखं पवो
परतानिकृतायासं यथा भवति तथास्ते वर्तते कुत्रास्त इत्याह नव
द्वारेति नेत्रकर्णनासाद्वाराणि सप्त मुखमेकं चेति सप्त पायूपस्थं चेति द्वे ए
वं नवद्वारे पुरे देहे भावप्रधाने देही अवतिष्ठति यथा कश्चिन्नवद्वारे न
गरे तिष्ठन्नपि नागरधर्मान्न स्पृशति तद्वदहंकाराभावाच्छुद्धचित्तो न कुर्व
न्ममाकाराभावाच्च न कारयन् अशुद्धचित्तस्तु करोति कारयति च ननु
ज्ञानाविषयत्वेन च मे प्रकृतिरित्यादिना कैवल्यं तत्र स्रष्टृत्वं प्रकृतेरेव च
कारयन्नित्यादिना स्वतंत्रतैकपुरुषस्य अथास्तामीश्वरस्यैव प्रयोज
कत्वमिति चेन्न हि संस्कारकार्यप्रवर्तकत्वेनास्मदादिवत्तस्यापि विषमत्वं
स्यादित्याह १३ ॥

वनमाली टीका

अपक्वकषायस्याथिरचित्तस्य कर्मयोगः श्रेयानिति पूर्वं प्रपंच्याधुनाप
क्वकषायस्य शुद्धचित्तस्य संन्यास एव श्रेयानित्याह सर्वेति अतो देही देहं दि

गी॰
टी॰
पं॰
63

याद्दवदेहमेत्यभिमानशून्यः नित्यंनैमित्तिकंकाम्यं निषिद्धंचेतिसर्वा-
णिमनसास्वस्यस्वतोकर्तृत्वेतिष्ठिन्नवनीश्वरकारिता नीमानिनवद्वारे
मेंद्रियेदेहेन्तायंतेनमयीतिदेहेमेन्यस्यनकर्तृत्वंनकारयितृत्वं किंतस्वस्यदे-
हादितोभिन्नत्वपानंदत्वनाकर्तृत्वादिनाज्ञानेनस्वस्वमात्मजकृतोयतोवशी
नियमितवाह्यांतरिंद्रियः कर्मकर्तृत्वकारयितृत्वंचजीवस्यदेहाद्यभिन्ना
त्मताभिमानात् भवतितन्निहतोशर्माणिनदस्यस्वतोनिर्विकारस्यतदुभयो-
र्नसंभवतीतिभावः १३ ॥

ज्ञगमवैजयतीटीका

एवंयुक्तायुक्तयोर्मोक्षबंधव्यवस्थामुक्त्वेदानींप्रकृतोसर्वकर्मापरित्य-
ज्याकर्मकरोत्यपिसनैवकरोतीत्याह सर्वकर्माणीति वशीविजितेन्द्रि-
द्रियोमुमुक्षुः उक्तप्रकारेकत्वज्ञानाग्निप्रधानेविवेकयुक्तेनमनसास-
र्वकर्माणिसर्वाणिवर्णाश्रमोचितानि नित्यनैमित्तिकानिसर्वेंद्रिय-
कृतानिश्रवणादीनिवाकर्माणिसंन्यस्यसंस्थाप्यापरित्यज्येत्यर्थः नवद्वा-
रेश्रोत्रेदेहेनेत्रेदेहेनासिकेदेहेमुखंचैकमितिसप्तद्वाराणिशिरसि पायूप-
स्थाख्येद्वेचाधोदेशइतिनवद्वाराणियस्मिन्सतस्मिन् पुरेपुरवद्देहेभा-
ववर्जितेदेहेसुखंसुखेनास्तेतिष्ठति किंकुर्वन् देहोऽहमात्मप्रत्ययान्म-
क्तानः स्वतःदेहेंद्रियादिभिस्तानिकर्माणिबहिःकुर्वन्नपिसनैवकुर्वन्क-
र्तानभवति नकारयन्सनैवकारयिताचैवंविजानन्सन्नित्यर्थः १३

अशुद्धचित्तस्यकेवलात्संन्यासात् मधुसूदनीटीका कर्मयोगःश्रेयानितिपूर्वोक्तंप्रपंच्याधुनाशुद्ध-
त्तस्यसर्वकर्मसंन्यासः श्रेयानित्याह ॥
नित्यंनैमित्तिकंकाम्यंप्रतिषिद्धंचेतिसर्वाणिकर्माणिमनसाकर्मण्य-
कर्मयःपश्येदित्यत्रोक्तेनाकर्त्रात्मस्वरूपसम्यग्दर्शनेनसंन्यस्यपरित्यज्य
प्रारब्धकर्मवशाद्रास्तेतिष्ठत्येवकिंदुःखेनेत्याह सुखमनायासेन-
आयासहेतुकायवाङ्मनोव्यापारशून्यत्वात् कायवाङ्मनोसिस्वच्छेदा
तिकृतोनव्याप्रियंतेतत्राह वशीस्ववशीकृतकार्यकारणसंघातः क्वा-
स्तेनवद्वारेपुरे द्वेश्रोत्रेद्वेचक्षुषीद्वेनासिकेवागेकेतिशिरसिसप्तद्वा-
राणिपायूपस्थे अधउतिनवद्वारविशिष्टेदेहेदेहीदेहाभिमानात्मदर्शी प्रवासीव

शि॰

परगेहीनत्वस्वज्ञापरिभवादिभिरप्रहृष्यन्नविषीदन्नहंकारममकाररहि
तस्तिष्ठति अतो हि देहतादात्म्याभिमानाद्देहएव ननुदेहीसर्वदे
हाधिकरणमेवात्मनोधिकरणंमन्यमानोऽहंदेहेममावासनेवाऽहमा
स इत्यभिमन्यते नतु देहेऽहमासइति भेददर्शनाभावात् संघातव्यति
रिक्तात्मदर्शीतु सर्वकर्मसंन्यासी भेददर्शनाद्देहेऽहमासइतिप्रतिपद्य
ते अतएव देहादिव्यापाराणामविद्ययात्मन्यक्रियेसमारोपितानां
विद्ययाबाधएव सर्वकर्मसंन्यासइत्युच्यते एतस्मादेवाज्ञवैलक्षण्या
त्फलंविशेषणं नवद्वारेपुरेआस्तइति ननुदेहादिव्यापाराणामा
त्मन्यारोपितानांनौव्यापाराणांतीरस्थवृक्षइवविद्ययाबाधेपिस्वव्यापारे १४
णात्मनः कर्तृत्वंदेहादिव्यापारेषुकारयितृत्वंचस्यादितिनेत्याह नैव
कुर्वन्नकारयन्नास्तइतिसंबंधः १३ [illegible]
[illegible]
[illegible]
[illegible] ॥

सदानंदीटीका

संन्यासात्केवलात्कर्मयोगोमुख्योपियोवरः इत्युक्ताहाथनाशुद्धबुद्धेःसं
न्यसनंवदे १ नित्यंनैमित्तिकंकाम्यंनिषिद्धंचेतिसर्वशः कर्मणएकर्म
यःप्रक्षेपेदित्युक्तोक्तविवेकतः २ अकर्त्रात्मस्वरूपस्यविचारात्चित्तचेतसा
तत्क्षणाप्यपरव्यापृतोनायासेनैवतिष्ठति ३ आयासहेतवकायवाङ्मनो
व्यापारवर्जितः कार्यकारणसंघातोयेनात्मस्ववशीकृतः ४ कालत्र
याहभगवान्देहभिन्नात्मनत्वतः नवद्वारविशिष्टेस्मिंदेहेतिष्ठत्यसौपु
रे ५ परगेहप्रवासीवनिर्ममोनिरहंकृतिः देहमात्रात्मदर्शीतुदेहा
धिकरणोनरः ६ स्वस्याधिकरणंमत्वाऽहंदेहेमेनयासने अहमासमभि
मानीतिनत्वासेदेहइत्यपि ७ संघातव्यतिरिक्तात्मदर्शिनस्तुप्रपद्यते दे
हेआसइतिज्ञानेविद्ययाभ्रांतिबाधनात् ८ ननुदेहादिव्यापाराआत्म
न्यारोपिताभ्रमात् विद्ययाभ्रांतिबाधेपितेषांबाधोभवत्विति ९ किंत्वा
त्मनःस्वकीयेनव्यापारेणास्यकर्तृता तथाकारयितृत्वंस्याद्देहादिव्याप

गी॰ ताविति १ नैवमात्माक्रियो ह्यास्ते नैव कुर्वन्न कारयन् यथाकाशस्य नीलि
टी॰ म्नासंबंधो नास्ति सर्वथा ॥ तथात्मनो न संबंधः कर्तृत्वादिभिरण्वपि अक्रिय
पं॰ द्वयस्या स्याऽस्य कर्तृत्वाद्यैरसंगिनः २ कर्तृत्वाद्याः कृतो धर्मा भवंत्याविद्यकाः जडाः ।
आकाशे वर्णवन्नास्ति कर्तृत्वादिस्ततोऽमले ३ अविद्यकं तु विध्वस्तं न तयो
64 जन्ममात्रतः तस्मात्स्वात्मककर्मास्ते नैव कुर्वन्न कारयन् ४ वसन्देहागारे पु
रमयदनिष्टो विजयते न कर्ता नो भोक्ता क्वचिदपि कदाचिद्विहरणे निजानं
दारामो विषयविरतिर्नात्मशरणः परब्रह्मोऽहं ते परिमितवपुः संविहरति ५ १३

नीलकंठी टीका

एवमविद्वान्फलासक्त्या नामसक्तिवशात्कर्मभिर्बध्यते न बध्यते न बध्यते
चेत्युक्तं विद्वांस्तु तद्विपरीत इत्याह सर्वकर्माणीति वशी जितचित्तः समा
धिस्थो योगी नवद्वारे नवे वपुषि ज्ञानेंद्रियाणि षट् प्राणास्ते नैव तत्सवर्त्म
नां कर्मेंद्रियाणां संग्रहः बुद्ध्यहंकारचित्तानीति नव पुराणि द्वाराणि वपु
रूपते जीवस्य भोगार्थं विषयप्रवेशस्थानानि यस्मिन्नवद्वारे शरीराख्ये पुरे वि
चित्रवासनाकल्पितानेन विषयवति अनेकैः कर्मसचिवैरधिष्ठिते सुख
दुःखवेदिनानापण्यवति मनसा सर्वद्वारोद्घाटनं कुंचिकया सह सर्वाणि
कर्माणि पुरपतिरिव राजकार्याणि संन्यस्य सुखं निर्विकल्पं चिन्मात्ररू
पेणास्ते कर्माणि तेत्रस्यैव धर्मो न त्वात्मन इति देहेत्र्यक्त्वा शकानेव तथा
च श्रुतिः शरीरेपाप्मनो हितेति यत्र महादेः स्वकृतो मदेते विद्यायुरोगत
न्वाऽऽस्वायामिति च देही सन्देहाभिमानकाले कृत्याने पीत्यर्थः तद
पि नैव कुर्वन्नास्ते नापि कारयन्नास्ते राजेवामात्येषु निहितभारः समाधौ
तेत्रेणास्य महात्मनः संबंधाभावदर्शनात् यद्वा नवद्वाराणि चक्षुः श्रोत्रना
साबिलद्वैद्वानि षट् सप्तमं मस्तविश्वरंधस्तनेद्वे इति अस्मिन्पक्षे इंद्रियाणि प
रिचारका बुद्धिरमात्यो ऽहंकारो युवराज इत्यादिकमूह्यं विदुषः कर्मसंबं
ध एव नास्ति हेतेन फलासक्त्या नामसक्तीरिति भावः १३ ॥

आनंदी टीका

वशी स्वतंत्रो गुणसमुदायात्मिकायाः प्रकृत्यायोगाभ्यासवशात्स्वाधीनू
भूतः सर्वेषां महदादीनां प्रकृतिविकृतीनां कर्माणि पृथक्साद्यादीनि

मनसासङ्कल्पमननाभावोदेवोपहतेन्द्रियजयप्रादुर्भावेहङ्कारसं
यमान्नैवकुर्वन्नर्थवत्वसंयमान्नैवकारयन् प्रकृतिजयंशमः न
वद्वारेपुरेशरीरएवगृहेस्तएवमास्तेजीवन्मुक्तयाविश्रामःभजति
यथा चक्रवर्तीराजाविजितसकलभूमिरप्रागमप्रेक्षायाप्रभावा
न्नकृतकृत्योनैवकुर्वन्नकारयन्नवद्वारेपुरेस्तएवमस्तेनतथेत्य
र्थः ॥ १३ ॥

+ अथैवंविधयोःकर्मयोगसंन्यासयोरथा येसिन्प्रवंधपादितयोरुपसंहारावसरेसहूपान्नुवा
पूर्वंतदनुष्ठा तृनैरपेक्षीकीफलसिद्धिस्फु
कटमाह+

+हमतःशाङ्केनबुद्धिरेवविवर्तिता नबुद्धिविधमनोलौकिकंयोगिभि
वान्त्यिच तत्राविंत्यस्वरमायाशक्तिवशाउद्भूतदैतप्रपञ्चपतितामिरमयैर्लौ
किकैर्येनलोकएकमेवपरमार्थसतत्वंनानात्वेनमन्यतेयोगिभिस्तुवद्धितं
येनभगवदनुग्रहाविर्भावितविद्याशक्तिविमलीकृतेनयोगिनः सर्वम
वात्मयोगपरमात्मैकरूपतयामन्यंते तदेवंविधमभयात्मकतत्वमनस्तु
मृति नैवानुगीतास्वभगवद्वचसैवार्जुनवोधायेवेतिभूत्रविरचनक्रमेस
गामदर्शितं यदाहत्वमेवांमनसीगत्वाभूतात्मानमहंकृताम् प्रावयोः
श्रेष्ठमाचक्ष्वहिनौसंशयंविभो मनइत्येवभगवांस्तदाप्राहसरस्वती
मांहंकामदुघात्वभ्यामितितेप्राहवागथ सतामाहस्थावरंजंगमंचैवा
विद्धिमेमनसीमम स्थावरंमत्सकाशेवैजंगमंविषयेतवेत्येवंविधेनस
स्थिरपरमात्मस्वरूपमननैकनिष्ठत्वात् स्थिरतयास्थावरशब्दोक्तेनपर
मेश्वराभ्याशवर्तिनामनसांतःकरणेनसर्वकर्माणि चित्तवाक्कायप्र
वर्त्याःसर्वाःक्रियाश्शास्त्रचोदिताः शरीराव्यभिचारिणीश्च संन्यस्यवन्ध
हेतुनानाफलाभिसंधित्यागाद्भुतत्यैवविविक्तिप्य तेनैवक्रमेणावशीकृ
तात्मावशीकृतस्वभावः सत्कर्मयोगीस्वस्वमास्तेनोपशमवतिदेहे निमर्ग
निह्नुतनिरविल्वक्लेशसंपर्केनिजनगनेदमयेस्वात्मतिविश्राम्यतीत्यर्थः
व^ कीदृशःसन्नास्ते प्रख्येतिनेपुरेदेहएवाधिष्ठानमात्मात्वाद्देहत्वेनतिश्रुति
ते प्रतएवकीदृशेनवद्वारे वत्तः श्रोत्रञ्चात्वाक्षिद्वाणिवद्गुदावाणी २

गी॰
टी॰ पं॰
65

र्शनश्रवणघ्राणक्रियाप्रवृत्तिवर्त्मानि तथा वाक्पायूपस्थाख्यानि त्री
णि वचनविसर्गक्रियाप्रवृत्तिवर्त्मानीति नवद्वाराणि यस्मिन्
तत्राहं यच्चिन्मात्रपरमात्मस्वभावविश्रान्तत्वात्सर्वाः क्रियाः सर्वा
णि कार्याणि स्वरूपमात्रत्वेन प्रतिपाद्यमानो न कुर्वन् इतरशारीरवत्
कर्माभिमानमनत्र भवन् केचित्किल प्रतिशरीरं भिन्नास्तु ईश्वराः
स्वाभाविकेन प्रतिनियतेन कर्तृत्वेन युक्तान्मन्यन्ते तथा न कारयन्।
अन्यान प्रयोजयन् अपरे हि केचन सन्निधिमात्रेणाजडायाः प्रकृतेः।
क्रियाप्रवृत्तौ प्रयोजकमात्मानं मन्यन्ते अस्य तु उभयथापि कर्तृत्वं प्रति
षिध्यते अयं हि परमात्मसमापन्नत्वान्न करोति न कारयतीति [illegible]
[illegible] ॥१३॥

+ एवं ऋजुरूप्यानुशीलमानः कर्मयोगे लाभिवो [illegible] टीका न केवलं देहाद्यहंभावमेव प्रजन्न करोति याव
देहममतामपीत्याह +
वशी स्वीकृतस्वभावः सर्वाणि कायवाङ्मनसनिर्वर्त्यानि स्वाभाविका
नि वैदिकानि च कर्माणि मनसा ममतानात्मकेनान्तःकरणेन संन्यस्य
परायसमर्प्य सुखं यथा भवत्येवमास्ते क्वास्ते इत्यत आह नवद्वारे नेत्र
नासिकाकर्णमुखं च सप्त शिरोरन्ध्राणि अधः पायूपस्थरूपे द्वे एवं न
वद्वाराणि यस्मिंस्तस्मिन् छिद्रगवाक्षनवकालंकृते पुरे देहगेहे
देही देहाभिमानादर्शी अतो हि देहतादात्म्यादेहमेव तथा देहेऽहंकारा
भावान्नैव कुर्वन् ममकाराभावाश्च न कारयन् अतः सुखमास्ते इत्या
र्थः यथा वेश्मान्तर्गतस्य पुंसो न गृहगतैर्जीर्णत्वादिभिर्योगः एवं दे
हगेहगतस्य परमात्मसमापन्नस्य न तद्धर्मयोगः तदुक्तं श्रीवासिष्ठमंगल
तं योगवासिष्ठे अतिमज्जनु सर्वेषु भावनाभावनेन हृदि अविद्ने
सुखवादीनाम संसंगपरं विहरतीति [illegible] ॥१३॥

पंचोलीटीका

एवं तावच्चित्तशुद्धिशून्यस्य संन्यासात्कर्मयोगो विशिष्यते इति इदानीं
शुद्धचित्तस्य संन्यासः श्रेष्ठः इत्याह सर्वकर्माणीति वशी जितेन्द्रियः देही
आत्मा मनसा विवेकयुक्त्या कर्मादौ अकर्मादिदर्शनेन सर्वकर्माणि नि न॰
त्यनैमित्तिककाम्यनिषिद्धानि कर्माणि संन्यस्य परित्यज्य नवद्वारे पुरे

नवद्वारे देहे स्वयंअकुर्वन्अन्यंचअकारयन्सुखंसुखेनआस्तेतिष्ठति १३

वशीवीरसमिद्धाधिनी॥

एतदेवस्पष्टयति सर्वकर्माणीति वशीस्वायत्तीकृतेंद्रियः सर्वाणिकर्माणिकथंभीष्ममित्यादिरूपाणिविक्षेपकाणिसंकल्पात्मनसा निश्चयात्मकेनज्ञानेनदृढीकृतचेतसासंन्यस्यविहाय नवद्वारेन वानिसर्वेषांहरणीकृतवान्नवीकृतानिद्वाराणियत्रतस्मिन्पुरेस्वकीयेपरकीयेवानगरेसुखंयथास्यात्तथास्ते कीदृशःसन्सुखमास्तेइत्याह देहेनेति एवमग्रेऽपिभिन्नक्रमः कारयन्नित्यनेनान्वेति देहेन कर्मेंद्रियैःस्वयंकुर्वन् नपुनरन्यैर्भटैःकारयन्नेवकोऽर्थः सैन्यानाम नायकत्वेन शीघ्रंपलायनसंभवात्स्वयंचकुर्वीत सैन्यांश्चकारयेदिति शत्रून्विजित्यनिष्कंटकंराज्यसुखमनुभवतीत्यर्थः १३॥

मथभाष्य

सर्वकर्माणीति मनसेति विशेषणादभिमानत्यागः नच करोतिवस्तुतइत्याह १३॥

66

भाषा अनुवाद

इन सब बातों से अशुद्ध चित्त मनुष्य को संन्यास की अपेक्षा निष्काम कर्म करना ही श्रेय है यह विस्तार पूर्वक कहि कर अब शुद्धचित्त पुरुष को संन्यास ही श्रेष्ठ है यह कहते हैं कि जिनका चित्त विवेकयुक्त बुद्धिके द्वारा विक्षेप कारक सब कर्म छाड़ि जैसे सुखमे रहते तैसे ज्ञाननिष्ठ युक्त होके भी सुखमे रहते हैं जो कहो कि कहां रहतेतो कहते हैं कि नवद्वारपुर जो अहङ्कार सूक्ष्म शरीर तिसमे आत्म स्वरूप से स्थितरहते हैं और अहङ्कारके अभावसे आप शारीरक कर्मनहीं करते और ममताके अभाव से दूसरे से भी वे कोई काम नहीं करावते हैं यह शुद्ध औ अशुद्धचित्त मनुष्यों का भेद भगवानने कहा १२ ।

दोहा

कर्मसमस्तहित्यागमनसुखीजीतेंद्रिहोय नौदुवारपुरदे
हमें करेनकरावे सोय १३॥

नकर्तृत्वंनकर्माणि लोकस्यसृजतिप्रभुः नकर्म
फलसंयोगं स्वभावस्तुप्रवर्तते १४ ॥

शांकरभाष्यं

किंचनकर्तृत्वमिति नकर्तृत्वंस्वतः कुर्विति नापिकर्माणिरथ[घट]प्रासा
दादीनि ईप्सिततमानि लोकस्य सृजत्युत्पादयति प्रभुरात्मानापि रथादि
कृतवतस्तत् फलेनसंयोगंनकर्मफलसंयोगंयदिकिंचिदपि स्वतोन
करोतिनकारयतिचदेहीकस्तर्हि कुर्वन्कारयंश्च प्रवर्ततइत्युच्यते स्वभा
वस्तुस्वोभावः स्वभावोऽविद्यालक्षणाप्रकृतिःमायाप्रवर्ततेदैवी हीत्या
दीति वक्ष्यमाणा १४ ॥

आनंदगिरिकृतटीका

आत्मनोयदुक्तंकारयितृत्वं नास्तीतितत्प्रपंचयति नेत्यादिना यद्यपिलो
कस्यकर्तृत्वंनसृजतीति नास्तीतिकारयितृत्वंतथापिरथघटकटादीनि
कुर्वन् भवतिकर्तेत्याशंक्याह नकर्माणीति तथापिभोजयितृत्वेन वि
क्रियावत्त्वंदुष्परिहारमित्याशंक्याह नकर्मेति कस्यतर्हिप्रवर्तकत्वंतदाह
स्वभावस्त्विति कुर्विति कर्तृत्वंलोकस्य नसृजत्यात्मेति संबन्धः रथादीनां
कर्मत्वंसाधयति ईप्सितेति आत्मनोदेहादिस्वामित्वेनप्रभुत्वंरथादिकृतव
तोलोकस्य रथादिफलेनसंबंधमपिनसृजत्यात्मेत्यात्मनोभोजयितृत्वं
प्रत्यादिष्टंनापीति चतुर्थपादंशंकोत्तरत्वेनावतारयतियदीत्यादिना स्व
भाववादस्तर्हीत्याशंक्यव्याकरोति अविद्यालक्षणेति प्रकृतेर्विद्याभाव
त्वंव्युदसितुंमायेत्युक्तंसाचममैवशक्तितेनप्रधानविलक्षणेत्याह दैवी
हीति १४॥

स्वामिकृतटीका

नन्वप(?)एषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषउ(?)एवा
साधुकर्मकारयतितंयमेभ्योलोकेभ्योधोनिनीषतइत्यादिश्रुतेः पर
मेश्वरेणैवशुभाशुभफलेषुकर्मसुकर्तृत्वेनप्रयुज्यमानः अस्वतंत्रःपु
रुषःकथंतानिकर्माणित्यजेत् ईश्वरेणैवज्ञानमार्गेप्रयुज्यमानस्तु प्र
शुभानि त्य त्यजतिचेत् एवंसतिवैषम्यनैर्घृण्याभ्यांप्रयोजककर्तुरीश्वरस्यापि
पापपुण्यसंबंधःस्यादित्याशंक्याह नकर्तृत्वमितिद्वाभ्यां प्रभुरीश्वरो

भाषा अनुवाद

इन सब बातों से अशुद्ध चित्त मनुष्य को संन्यास की अपेक्षा निष्काम कर्म करना ही श्रेय है यह विस्तार पूर्वक कहि कर अब शुद्धचित्त पुरुष को संन्यास ही श्रेष्ठ है यह कहते हैं कि जिना चित्त विवेकयुक्त बुद्धिके द्वारा विक्षेप कारक सब कर्म छाडि जैसे सुखमे रहते तैसे ज्ञाननिष्ठ युक्त होके भी सुखमे रहते हैं जो कहो कि कहां रहतेतो कहते हैं कि नवद्वारपुर जो अहङ्कार सूक्ष्म शरीर तिसमे आत्म स्वरूप से स्थितरहते हैं और अहङ्कारके अभावसे आप शारीरक कर्मनहीं करते और ममताके अभाव से दूसरे से भी वे कोई काम नहीं करावते हैं यह शुद्ध औ अशुद्धचित्त मनुष्यों का भेद भगवानने कहा १२ ।

दोहा

कर्मसमस्तहित्याग मन सुखवी जितेंद्रि होय नौद्वारपुरदे
हमें करैन करावे सोय १३॥

67

नकर्तृत्वंनकर्माणि लोकस्यसृजतिप्रभुः नकर्म
फलसंयोगं स्वभावस्तुप्रवर्तते १४ ॥

शांकरभाष्यं

किंचनकर्तृत्वमिति नकर्तृत्वंस्वतः कुर्विति नापिकर्माणिरथघटप्रासा
दादीनि ईप्सिततमानिलोकस्य सृजत्युत्पादयति प्रभुरात्मानापि रथादि
कृतवतस्तत् फलेनसंयोगंनकर्मफलसंयोगंयदिकिंचिदपि स्वतोन
करोतिनकारयतिचदेहीकस्तर्हि कुर्वन्कारयंश्च प्रवर्तत इत्युच्यते स्वभा
वस्तुस्वोभावः स्वभावोऽविद्यालक्षणाप्रकृतिः मायाप्रवर्तते दैवी हीत्या
दीति वक्ष्यमाणा १४ ॥

आनंदगिरिकृतटीका

आत्मनोयदुक्तंकारयितृत्वं नास्तीतितदुपपादयति नेत्यादिना यद्यपिलो
कस्यकर्तृत्वंनसृजतीति नास्तीतिकारयितृत्वंतथापिरथघटकादीनि
कुर्वन् भवतिकर्तेत्याशंक्याह नकर्माणीति तथापिभोजयितृत्वेन वि
क्रियावत्त्वंदुष्परिहारमित्याशंक्याहनकर्मेति कस्यतर्हिप्रवर्तकत्वंतदाह
स्वभावस्त्विति कुर्विति कर्तृत्वंलोकस्यनसृजत्यात्मेतिसंबंधः रथादीनां
कर्मत्वमाप्यतईप्सितेति आत्मनोदेहादिस्वामित्वेनप्रभुत्वंरथादिकृतव
तोलोकस्य रथादिफलेनसंबंधमपिनसृजत्यात्मेत्यात्मनोभोजयितृत्वं
प्रत्याचष्टेनापीति चतुर्थपादंशंकोत्तरत्वेनावतारयतियदीत्यादिना स्व
भाववादस्त्वहीत्याशंक्याव्याकरोति अविद्यालक्षणेति प्रकृतेर्विद्याभाव
त्वंव्युदस्यितुंमायेत्युक्तंमाचममैवसतीतेनप्रधानविलक्षणेत्याह दैवी
हीति १४॥

स्वामिकृतटीका

ननुपरमेश्वरएवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषउएवा
साधुकर्मकारयतितंयमेभ्योलोकेभ्योऽधोनिनीषतइत्यादिश्रुतेः पर
मेश्वरेणैवशुभाशुभफलेषुकर्मसुकर्तृत्वेनप्रयुज्यमानः अस्वतंत्रःपु
रुषःकथंतानिकर्माणित्यजेत् ईश्वरेणैवज्ञानमार्गेप्रयुज्यमानस्त्य प्र
शुभाशुभानित्य क्ष्यतीतिचेत् एवंसतिवैषम्यनैर्घृण्याभ्यांप्रयोजककर्तृत्वेनेश्वरस्यापि
पापपुण्यसंबंधःस्यादित्याशंक्याह नकर्तृत्वमितिद्वाभ्यां प्रभुरीश्वरो

जीवलोकस्य कर्तृत्वादिकं न सृजति किं तु जीवस्यैव स्वभावो विद्यैव कर्तृत्वा
दिरूपेण प्रवर्तते अनाद्यविद्याकामवशात्प्रवृत्तिस्वभावे जीवलोके मीश्व
रः कर्मसु न नियुंक्ते न तत्स्वयमेव कर्तृत्वादिकमुत्पादयतीत्यर्थः १४

पिशाचभाष्य

न कर्तृत्वं स्वतः न च कुर्वन्नपि कर्माणि रथप्रासादादीनीप्सिततमानि लोक
स्य सृजति उत्पादयति प्रभुरात्मा नापि रथादिकृतवतस्तत्फलेन संयोगं क
र्मसंयोगं यदि किंचिदपि स्वतो न करोति न कारयति च देही कस्तर्हि कुर्वन्
कारयंश्च प्रवर्तत इत्युच्यते स्वभावस्तु स्वभावश्चाविद्यालक्षणा प्रकृतिर्माया
प्रवर्तते १४

रामानुजभाष्य

साक्षादात्मनः स्वाभाविकं रूपमाह न कर्तृत्वमिति अस्य देवतिर्यङ्म
नुष्यस्थावरात्मना प्रकृतिसंसर्गेण वर्तमानस्य लोकस्य देवाद्यसाधारणं क
र्तृत्वं देवाद्यसाधारणानि कर्माणि तत्कर्मजन्यदेवादिफलसंयोगं चायं प्र
भुरकर्मवश्यः स्वाभाविकस्वरूपेणावस्थित आत्मा न सृजति नोत्पादयति क
स्तर्हि स्वभावस्तु प्रवर्तते स्वभावः प्रकृतिवासना अनादिकालप्रवृत्तपूर्वक
र्मजनितदेवाद्याकारप्रकृतिसंसर्गकृततत्तदात्माभिमानजनितवासनाकृ
तमीदृशं कर्तृत्वादिकं न स्वरूपप्रयुक्तमित्यर्थः १४ ॥

अभिनवगुप्तकृतटीका

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभा
वस्तु प्रवर्तते यत एष आत्मा न किंचित्कस्यचित्करोति प्रवृत्तिस्तु स्वस्वभा
वमात्रेण फलेच्छया तथा हि संवेदनात्मनो भगवतः प्रकाशानंदस्वातं
त्र्यपरमार्थस्वभावस्य स्वभावमात्रमिति समस्तसृष्टिस्थितिसंहृतिप्रव
र्तनस्वभावान्मनागप्यपायो जातु विद्यते न कर्तृत्वस्यातिरिक्तं क
र्तृत्वं किंचित् तदभावात्कानि कर्माणि तदभावे कस्य फले को वा कर्म
फलसंबंधः कर्म च क्रिया कर्मफलमपि च क्रियाफलमेव तथा हि चे
ष्टचक्रपरिवर्तनादिक्रिया नान्या न च सा घटनिष्पादिना संविदितनवेतिला
त् तस्मादीश्वितनः स्वतंत्रः परमेश्वर एव तथा तथा भातीति न तत्त्वतोऽतिरि
क्तं क्रिया तत्फलादिकमिति मितिः

+ ननुज्ञानामिधर्मंनचमेप्रवृत्तिरित्यादिवाक्यैःस्वतंत्रस्यपुरुषस्यैनैवकुर्वन्नकारयन्नित्यादिना
स्वतंत्रत्वंकथमुक्तं यथात्वामीश्वरस्यैवप्रयोजकत्वमितिचेन्नहिसदसत्कार्यप्रवर्तकत्वेना
सदादिवत्तस्यापिविषमत्वंस्यादित्याह +

[illegible]
[illegible] ॥ १४ ॥ नकर्तृत्वमितिद्वाभ्यांप्रभुरीश्वरोपि

परमार्थप्रपा टीका

+ नकर्तृत्वमिति द्वाभ्यांप्रभुरीश्वरोपिलोकस्यजीवलोकस्यकर्तृत्वंकर्मा
णिकर्मफलसंयोगंवानसृजतिनप्रयोजयति तर्हिस्वतंत्रःस्यादित्या
हस्वभावइति अनाद्यविद्यागुणोत्पन्नसत्त्वसंस्कारःस्वभावःसएव
लोकेषुप्रवर्तते प्रवृत्तिजनकोभवति सएवेश्वरेणानुग्रहोनिग्रहोवेति
न्र^ कथ्यते १४ ॥

वनमाली टीका

ननुयदुक्तंनैवकिंचित्करोमीतिमन्येतेतिसाभ्रांतिःकर्ताशास्त्रार्थत्वादि
तिसूत्रेणजीवस्यकर्मकर्तृत्वोक्तेस्तथाचकथंभ्रांतिरूपज्ञानान्मोक्ष
स्तदुपदेष्टुर्विप्रलंभकत्वप्रसंगाच्चेत्याशंक्यनिरासायश्रीहरिरेवनएव
कुर्वन्कारयन्नपिस्वातंत्र्येणनकरोतिकारयतिचेत्युच्यतेइत्याहनेति
देहेंद्रियाद्युपलक्ष्याप्रभुःअसमर्थोजीवःलोकस्यदेहेंद्रियादेःकर्तृत्वंनसृ
ज्ञेति^ जतिकर्माणिस्वयंनसृजतिकर्मफलसंयोगंसंबंधंस्व[illegible]वासृज स्मात्परस्मात्^
तिकर्मकर्तृत्वाभावादेवकर्मजन्यफलसंबंधोनास्तीत्यर्थःस्वंजीवंभा
वयतिव्यापारयतीतिस्वभावःपरमेश्वरःसएवमत्तःस्वयंकरोतिकर्म
नाहंस्वातंत्र्येणकिंचित्करोमितदपीनकर्मणोवाहंविदितरुइतिभाव
यतेवप्रवर्ततइत्यर्थः एषएवसाधुकर्मकारयतितंयमुन्निनीषतएष
उवासाधुकर्मकारयतितंयमधोनिनीषतइत्यादिश्रुतेः अज्ञोजंतुरनी
शोयमात्मनःसुखदुःखयोःईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्वभ्रमेववेति
स्मृतेश्च नचभगवान्कांश्चित्सुखयतिदुःखयतिचकांश्चिदितिविषमोऽति
घृणश्चस्यादितिवाच्यंवैषम्यनैर्घृण्येनसापेक्षत्वात्तथाहिदर्शयतीतिसूत्रे
ण पुण्येनपुण्यंलोकंनयतिपापेनपापमितिश्रुत्याचजीवादृष्टसापेक्षतक
र्तृत्वोक्त्यावैषम्याद्यसंभावात् नचविविधकर्माण्यपितेनैवकारितमितिवैष
म्यादिकंतदवस्थमितिवाच्यं पूर्वपूर्वकर्मसापेक्षत्वेनवाऽनादित्वेनकर्मका
र्यत्वे कर्मणांप्रवाहानादित्वेनदोषाभावात् नचैवमागतंजीवस्यकर्मा

गी॰ टी॰ पं॰

69

दौस्वातंत्र्यं पूर्वपूर्वकर्मणामपिजीवेनेश्वरप्रेरितेनैवकृतत्वात् नचैवंजी
वस्यस्वर्गनरकादिभोगोनस्यात्तस्यकर्माभावादितिवाच्यं अनाद्यविद्यया
देहेंद्रियकर्मादिष्वहमहंममेतिप्रवाहानाद्यभिमानस्ततः प्रागुक्तसंबंधे
नकर्तृत्वात्सुखदुःखादेर्हेतोरन्यस्यसंयोगेनपुत्रपश्वादिवत्तस्य
जीवेविद्यमानत्वात् अतोविद्ययासंबंधादीश्वराधीनत्वात् स्वतोकर्तृत्वा
ज्जीवस्यकर्तृत्वादिबोधकवाक्यद्वय मप्युपपन्नमितिभावः १४

अथरामवैजयन्ती टीका

नन्वात्मनःकर्तृत्वंकारयितृत्वंचसर्वेषांप्रत्यक्षसिद्धंदेहीनैवकुर्वन्नैवकार
यन्नित्युक्तिःकथमुपपद्यते॥अथवातस्ययदिकर्तृत्वादिकंनास्तितर्हिकोवा
करोतिकोवाकारयतीत्याशंक्यात्मनःप्रकृतिसंबंधत्वेनकर्तृत्वादिकंवद
न्शुद्धेस्वाभाविकंस्वरूपमाह नकर्तृत्वमितिप्रभुःशरीरेंद्रियादिपतिरक
र्माधीनःस्वस्वाभाविकरूपावस्थितःप्रकृतिसंबंधरहितःप्रत्यगात्मास्य
लोकस्यसुरासुरनरतिर्यक्स्थावरादिविविधाकाररूपप्रकृतिसंबंधेनाव
स्थितस्यजनस्यकर्तृत्वंनसृजतित्वंकर्मकुर्विंत्येवंकारयितानभवतितस्य
कर्माणिचेप्सिततमानिवस्त्रालंकारादीनिनसृजतिकर्तापिस्वयंनभवतिना
पिच तस्यकर्मफलसंयोगंसृजतिभोक्ताभोजयितावापिस्वयंनभवति एवं
चेत्तर्हिकः कर्ताकारयितेत्यपेक्षायामाह स्वभावइतितुपुनःस्वभावःप्रवर्त
ते॥स्वभावशब्देनानादिकालप्रवृत्ताप्रकृतिवासनोच्यते॥नादिप्रकृतिसंस
र्गेनादि[illegible]शुभाशुभकर्मजन्यादिविजमनुजतिर्यगाद्याकृतिकृतदेवनमनु
ष्यत्वाद्यभिमानोद्भववासनाप्रयुक्तमेवंभूतेकर्तृत्वंकारयितृत्वंचभवतिन
तद्धातिविक्तस्वरूपप्रयुक्तंस्वरूपेणात्मनादिवदसाधारणधर्मभूतंस्वाभावि
कंयत्कर्तृत्वादिकंनतत्प्राकृतवासनाप्रयुक्तंनभवति किंत्वीश्वरप्रयुक्तंपर
तंत्रस्वरूपवन्नित्यमेवेदंनतत्वविनाशमित्यर्थः १४॥

+देवदत्तस्यस्वर्गेनैवगतिर्यथास्थितोस

मधुसूदनी टीका

त्वंनभवतिएवमात्मनोपिकर्तृत्वंच
स्वगतमेवसत्संन्यासेसतिनभवति अ

[illegible]ानभसितलमलि
[illegible]ादिवद्दह्रहत्या +
[illegible]नालेपेवतिसंदेहा
[illegible]हायाह +

लोकस्यदेहादेःकर्तृत्वंप्रभुरात्मास्वामीनसृजतित्वंकुर्विंतिनियोगेनतस्य
कारयितानभवतीत्यर्थः नापिलोकस्यकर्माणीप्सिततमानिघटादीनिस
ंसृजतिकर्तापिनभवतीत्यर्थः नापिलोकस्यकर्मकृतवतस्तत्फलसंबंधं

सृजति भोजयितापि भोक्तापि न भवतीत्यर्थः समस्मानाः सन्तु भौ लोकाव
नुसंचरति ध्यायतीव लेलायतीव स यो इत्यादिश्रुतेः अज्ञानादि शरीरस्थोऽपि कौ
न्तेय न करोति न लिप्यत इत्युक्तेः यदि किंचिदपि स्वतो न कारयति न करोति चात्
मा कस्तर्हि कारयन् कुर्वंश्च प्रवर्तत इति तत्राह स्वभावस्तु अज्ञानात्मिका दै
वी माया प्रकृतिः प्रवर्तते १४ ॥

सदानंदीटीका

यथाहंसः स्वनिष्ठैव गतिः सर्वा स्थितौ न सा तथात्मनोऽपि कर्तृत्वं संस्था
से मतिनास्ति किं यद्वा न भसिवर्णादिवत्तस्यात्मनि वस्तुतः इति संदेह
विच्छित्त्यै भगवानाह श्लोकतिमं १ सृजत्यात्मा न कर्तृत्वं देहादेर्लोक कुर्विति
नापि लोकस्य कर्माणि प्रासादादीनि यानि च २ अत्यन्तेप्सिततमानि स्व
यं सृजति कर्हिचित् न वा कृतवतः कर्म लोकस्यैतत्फलेन च ४ स एवं
यं सृजत्यात्मा भोक्ता भोजयिता न सः यथात्मा न स्वतः किंचित्कुरुते का
रयत्यजः ५ कस्तर्हि कारयन् कुर्वन् प्रवर्तत इहेति चेत् शृणु स्वभावशब्दे
न माया विद्यादिशब्दिता प्रकृतिर्यास्ति सैवेयं व्यवहृतिप्रवर्तते ७ १४

नीलकंठीटीका

नन्वेवं मन्यत्वं कर्तृत्वे स्वामित्वं कारयितृत्वं वास्य मास्तु अयस्कांतव
द्विकारस्यैव सतः कर्त्रादिधर्मकाहंकारादि प्रवर्तकत्वमस्तित्याशंक्याह
न कर्तृत्वमिति कर्तृत्वमहंकारस्य कर्माणि इंद्रियाणां वचनादानादी
नि श्रवणदर्शनादीनि च लोकस्य लोक्यते प्रकाश्यत इति लोको जडवर्गः
प्रभुश्चिदात्मा सूर्य इवास्मदादीनां प्रकाशकोऽपि न कर्मादौ प्रवर्तकस्तद्वत्
द्वास्य कर्मफलसंयोगं वा न सृजति किंतु योयादृक्स्वभावः स तथा प्रव
र्तते यथा सूर्ये प्रोदिते कमलानां विकसनं कुमुदानां संकोचनं चेति तद्दे
वमात्मनि प्रकाशमाने चराचरयोनवेष्टते स्वभावादेव सत्त्वचेष्टते न त्वात्मा
कस्यचित्प्रवर्तको निवर्तको वा लोहायस्कांतयोरिव सत्यानंतयोरात्मा
नात्मनोः संबंधाभावादिति भावः १४ ॥

श्रानंदीटीका

एवं तस्य जीवन्मुक्तस्य हृष्टस्याया शरीरचेष्टा सा कथमित्याह प्रभुः प्रकृतिदृष्
ट्या वा त्वानंतकोऽणवेभवं प्राप्तः स्वयं निष्क्रियो लोकस्य हृष्टपस्य बुद्ध्यादेः कर्तृत्वं क्रि
यतामित्येवमायादिप्रयिकारं न सृजति नापि कर्माणि प्रासादादीनि सृजति न च क

गी॰
टी॰ ५

मेणोथवमायादेः फलेनरागद्वेषाद्युणाद्वानोपेतात्मना संयोगं सृजति तत्पुनः
स्वभावः बुद्ध्यादीनां स्वात्मीयो भावोऽथवमायादिः प्रवर्तते यथाजितसकलसामं
तस्मृक्रवर्तीस्वपुरेविश्रांतिसमर्थेमात्मवर्गस्यप्रयोजनाभावान्किंचिन्नज्ञापयति
तेनस्वयमेवस्वाधिकारेषुप्रवर्ततेतद्वदित्यर्थः तथाचोक्तं सम्यग्ज्ञानाधिगमाद्
मौदीनामकारणप्राप्तौतिष्ठति रामकंठीटीका संस्कारवशाच्चक्रभ्रमिवद्धृतः शरीरइति ॥

अतएवपरमात्मस्वरूपंस्मारयन्नाह ॥

यस्माद्दृग्यचिन्मात्रस्वभावप्रतिष्ठितात्मप्रभुरीश्वरः परमात्मा वास्तवेना-
रूपेणलोकस्य तन्मायामहिमोज्जृंभितपरस्परभेदस्यजीववर्गस्यनकर्तृत्वे
तास्तास्क्रियाःस्वप्रतिनियतफलाःस्वतन्त्रत्वेनसृजति नापिपुण्यपापल
क्षणानिकर्माण्यपिलोकस्यचित्सृजति नचस्वस्वात्मकैस्तत्फलैः संबं
धम् अतस्तत्स्वरूपसमापन्नः कर्मयोगीतादृशएवभवतीति पूर्वश्लोकेन
संगतिः ननुयद्येवंयथोक्तस्वरूपमात्रनिष्ठत्वादीश्वरोनकरोतिनकारयति
तत्कुतोजगद्व्यवहारइत्याह स्वभावस्तुप्रवर्ततेइति स्वभावः प्राक्प्रकृत्य
परपर्यायमायाशक्तिरेवाचिंत्यस्वरूपैश्वर्यपते साप्रवर्तते अनन्तभावभेदो
द्भूतविचित्रजगदन्यथैवनानावभासानायप्रसरति साहिवास्तवसर्वभावा
भेदख्यातिमात्रजीविता प्रकृतिपादितयानियत्याःसर्वमिदमवभासयति
एवमवभासमानमप्येतत्तत्त्वज्ञानदृशापरामृश्यमानंयथोक्तपरमात्मस्वा-
रूपान्नव्यतिरिच्यते ततःपरमेश्वरस्यप्रतिनियतकार्यकर्तृत्वादिर्नवास्तवोऽथ
मेः [illegible] १४

अतःपरमात्मस्वरूपंस्मरन्नाह ॥ [illegible] टीका

प्रभुःस्वामीपरमात्मालोकस्यजीवलोकस्यकर्तृत्वंनसृजति नचपुण्य तत्क्रियानुष्ठाने
पापात्मकानि ईप्सिततमानिकर्माणि नचकर्मफलैःस्वाभावात्मकैः
संबन्धंवास्तवेनरूपेणसृजन्नुत्पादयति अतस्तत्स्वरूपमापन्नःकर्मयो
गीतादृशएवभवति यदिकिंचित्स्वतोनकारयति नकरोतिवात्माकर्त
र्हिकारयन्कुर्वन्प्रवर्तते तत्राह स्वभावोजीवस्याविद्यैवप्रवर्तते अनाद्य
विद्याकामवशात्प्रवृत्तिस्वभावोजीवलोकःकर्तृत्वादिकंकर्माण्यपादयतीत्य
र्थः १४ ॥

70

पंचोलीटीका

तर्हिपरमेश्वरस्यहेतुकर्तृत्वात्पापपुण्यसंबंधः स्यादित्याशंक्याह नकर्तृत्वमिति प्रभुरीश्वरः आत्मालोकस्यकर्तृत्वंत्वंकुरु इति नउत्पादयतिकर्माणिरथघटप्रासादादीनिलोकस्यईप्सितानिनोत्पादयति कर्मकर्तुःफलसंयोगंनोत्पादयतितर्हिकः स्वभावः अविद्यामाया कर्तृत्वादिरूपेणप्रवर्तते १४ ॥

श्रगवीरसमिद्धोधिनी ॥

नकर्तृत्वमिति करोतितच्छीलस्तदाचारोवाकर्ता ताच्छील्येतिरन् कर्माणिकायकैवाङ्मनोनिष्पाद्यानिविविधानिसामान्यानिकर्तृ नलोकेतिकर्मणिषष्ठीनिषेधः विविधकर्माचरणशीलः स्वस्ववर्णाश्रमोचितकर्मकरणाचारश्च तस्यभावः कर्माणिकर्तृत्वं लोकस्यब्राह्मणादिवर्णचतुष्टयस्यप्रभुरीश्वरोनसृजतीतिन अपितुसृजत्येव परंतस्यलोकस्यस्वभावः स्वाभिप्रायोन्यथाप्रतिपत्त्यात्मकः कर्मफलसंयोगं कर्मणांस्वोचितानांफलस्यराज्यस्वर्गापवर्गलक्षणस्यसंयोगोयथास्यात्तथानप्रवर्तते प्रवर्तयते प्रवृत्तिजनको नभवतीति अंतर्भावितणिजर्थोत्र वृत्तिः अयमभिप्रायः ईश्वरेणप्रजाः सकर्माण्येवसृष्टास्तत्रापियथायथमनुष्ठितकर्माणामेव (शास्त्रप्राप्ति) परंतासामदृष्टवशात्स्वकीयेनैवबुद्धिमालिन्येनान्यथाप्रतिपत्तेनिषिद्धएव तस्मिन्प्रवृत्तिः सत्फलावभासते विषद्वामृतमितिनेश्वरस्यवैषम्यमिति १४ ॥

मथभाष्य

नकर्तृत्वमिति प्रभुर्हि जीवोज्ञडमपेक्ष्य ज्ञानमेवाज्ञाननाशकमित्याह १४ ॥

71

भाषा अनुवाद

ईश्वर जिस को इस लोकसे श्रेष्ठ लोक कोलेजाने की इच्छा करते हैं उससे सत्कर्म करावते और जिसे अधो लोक लेजाने की इच्छा करते उससे कुकर्म करवावते हैं यह श्रुतिमे कहा है तो परमेश्वर की प्रेरणासे पराधेन जो मनुष्य सो कैसेवे कर्मत्याग करने शके एक दूसरे जो परमेश्वरहीकी प्रेरणा से शुभ अशुभ कर्ममे लोग प्रवृत्त होते हैं तो ईश्वर भी विषम दृष्टि औ निर्दय है फेरि कर्मोका करवावने वाला भी वह है तो उसको भी पुण्य पाप संबन्ध होय जो यह शङ्का करे तो इसका सिद्धान्त यह दो श्लोकसे कहते हैं कि प्रभु जो ईश्वर सो मनुष्यों को कर्तृत्व अथवा कर्म सृजन नही किया किन्तु मनुष्यों को पूर्व कर्म संस्कार रूप जो अज्ञान सोइ कर्तृत्वादि मे प्रवृत्त करै है इसीसे अपनी अनादि अविद्या से कामना वश हो प्रवृत्ति युक्त पुरुष को ईश्वर भी कर्ममे नियुक्त करते हैं और ईश्वर कुछ आपसे उसको प्रवृत्ति नहीं देते हैं सोइ कहा कि कर्तृत्व औ कर्म तथा फल योग प्रभुने नहीं किया लोग स्वभाव अर्थात् माया से प्रवृत्त है १४ ॥

दोहा

कर्त्तानाहिनलोककोकरैंनकर्मप्रभुसोय कर्तनकर्मसं
योगहिं सभीस्वभावकहोय १४ ॥

72

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञानेना
वृतं ज्ञानं तेन मुह्यन्ति जन्तवः १५ ॥

शांकरभाष्यं

परमार्थतस्तु नेति नादत्ते न च गृह्णाति भक्तस्यापि कस्यचित् पापं न
चैवादत्ते सुकृतं विभुः भक्तैः प्रयुक्तं विभुः किमर्थं तर्हि भक्तैः पूजादिल
क्षणं यागदानहोमादिकं च सुकृतं प्रयुज्यत इत्याह अज्ञानेनावृतं ज्ञानं
विवेकविज्ञानं तेन मुह्यन्ति करोमि कारयामि भोक्ष्ये भोजयामीत्येवं मो
हं गच्छन्त्यविवेकिनः संसारिणो जन्तवः १५ ॥

आनंदगिरिकृतटीका

कर्तृत्वभोक्तृत्वे प्रवर्त्यान्यात्मनो न विद्याकृतानीत्युक्तमिदानीमीश्वरे
संन्यस्तसमस्तव्यापारस्य तदेकशरणस्य दुरितं सुकृतं वा तदनुग्रहार्थं
भगवानादत्ते मदेकशरणो मत्प्रीत्यर्थं कर्म कुर्वाणो दुष्कृता[illegible]दत्ते
नानुग्राह्यो मयेति प्रत्ययभाक्तादित्याशंक्यासोऽपि परमार्थतो न स्यात्
विक्रियत्वादित्याह परमार्थतस्त्विति कथं तर्हि भक्तानामनुग्राह्यत्वमी
श्वरस्यानुग्रहीतृत्वमिति प्रसिद्धिस्तत्राह अज्ञानेनेति एवं हि गतान्यद्वा
णीव्याख्याय आकांक्षापूर्वकमुत्तरार्द्धमवतार्य व्याचष्टे किमर्थमित्यादिना १५

स्वामिकृतटीका

यस्मादेवं तस्मात् नादत्त इति प्रयोजकोऽपि सन्प्रभुः कस्यचित्पापं सुकृ
तं चैव नादत्ते न भजते तत्र हेतुः विभुः परिपूर्ण आप्तकाम इत्यर्थः यदि
हि स्वार्थकामनया कारयेत्तर्हि तथा स्यान्न त्वेतदस्ति आप्तकामस्यैवावि
द्यानिजमायया तत्पूर्वकर्मानुसारेण प्रवर्तकत्वात् ननु भक्ताननुगृह्ण
तोऽभक्तान्निगृह्णतश्च वैषम्योपलंभात्कथमाप्तकामत्वमित्यत आह अ
ज्ञानेनेति अज्ञानेन निग्रहोऽपि दंडरूपोऽनुग्रह एवेत्येवमज्ञानेन सर्वत्र स
मः परमेश्वर इत्येवंभूतं ज्ञानमावृतं तेन हेतुना जंतवो जीवा मुह्यंति भ
गवति वैषम्यं मन्यंत इत्यर्थः १५ ॥

पैशाचभाष्यं

परमार्थतस्तु नादत्ते न गृह्णाति भक्तस्यापि कस्यचित्पापं नैवादत्ते सुकृतं

गी॰ भक्तैः प्रयुक्तं विभुः कथं तर्हि भक्तैः स्तोत्रलक्षणयागदानादिसुकृतं प्रयुज्य
टी॰ नश्यत्यत आह अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति करोमि कारयामि भोक्ष्ये भोज
पं॰ यामि इत्येवं मोहं गच्छन्ति अविवेकिनः संसारिणो जन्तवः १५ ॥

73

रामानुजभाष्यं

कस्यचित्संबन्धितयाभिमतस्य पुत्रादेः पापं दुःखं न ददाति नापनुदति क
स्यचित्प्रतिकूलतयाभिमतस्य सुकृतं सुखं नादत्ते नापनुदति यतोऽयं
विभुः न क्वचित्केनचिद्देवादिदेहेन स्थानाद्यावृतः अतएव न कस्यचित्संबं
धीन कस्यचित्प्रतिकूलश्च सर्वमिदं वासनाकृतं एवं स्वभावस्य कथमि
यं विपरीतवासनोत्पद्यते अज्ञानेनावृतं ज्ञानं ज्ञानविरोधिना पूर्वकर्म
णा स्वफलानुभवायोग्यत्वायास्य ज्ञानमावृतं संकुचितं तेन ज्ञानावरण
रूपेण कर्मणा देवादिदेहयोगः तद्देहात्माभिमानरूपमोहश्च जायते तत
स्तदात्माभिमानवासना तदुचितकर्मवासना च वासनातो विपरीतात्मा
भिमानकर्मारम्भश्चोपपद्यते १५ ॥

अभिनवगुप्तकृतटीका

नादत्ते कस्यचित्पापं नैव च सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मु
ह्यन्ति जन्तवः पापादीनि तेन कृतानि किं तु निजेनाज्ञानेन कृतानि
किं तु निजेनाज्ञानेन कृतानि श्लोकयेवाभने विषम् १५

परमार्थप्रपा टीका

अतएवाह नादत्त इति विभुर्व्यापको गगनवत्सर्वत्र समः परमेश्वरः
कस्यचित्पापं सुकृतं वा नादत्ते न ददाति परिपूर्णत्वात्सर्वास्सकलकामत्वा
त् किंच अज्ञानेन ज्ञानमावृतं तेन हेतुना जन्तवो ज्ञाः जीवा मुह्यन्ति ततः
सदसद्वा कर्म कुर्वन्तीत्यर्थः १५ ॥

वनमाली टीका

एवं प्रवृत्तस्य संन्यासिनः फलमाह नादत्त इति अयं परमात्मा तत्त्वज्ञानी
कस्यचिद्देहादेः पापं सुकृतं च नादत्ते न भुङ्क्ते कर्माधीनसुखदुःखादीनां
ते देहेन्द्रियान्तःकरणादिकं बीजं प्रवृत्तानामष्टाङ्गहि स्थानी यो भगवान्
विद्यावान् जीव अभिमानिकः फलभोक्ता विद्यानिवृत्तावभिमाने च निवृत्ते

देहेंद्रियाध्यासजन्यकर्मजन्यं पापफलं दुःखं सुकृतफलं सुखं वा तदनेन तेन त्व
ज्ञाभिमानकृतविकारस्यैव तस्य तज्ज्ञामेणनाशात् नहि कृतविकारेणायत्नात् दुःख
त्वादिनाशेपि विकृत्यादिना त्वज्ञाभिमानात् कथ्यादितो न पश्यात् समस्ताज्ञा
कृतविकारस्य दुःखादिकं भवति नन्वसर्वप्रेरकमते तथा सर्वेश्वरेश्वरं स्वान्तः
स्यं स्वस्वरूपमिव सर्वे जीवाः अतो न जानन्तीत्यत आह अज्ञानेनेति अज्ञा
नेन यथार्थज्ञानविरोधिना विद्याख्येनानादिना नित्यं जीवस्वरूपात्मकं
ज्ञानं भगवद्विषयकमावृतं तेन हेतुना जन्तवो मुह्यन्तीति सर्वे प्रवर्तकस्य सर्व
प्रेरकस्याऽनन्दरूपस्य स्वतोकर्तुः स्वरूपं वदन्ति विपर्यययथार्थज्ञानाभावं प्राप्नु
वन्तीत्यर्थः नित्यं भगवद्विषयकं स्वस्वरूपविषयकं च जीवे स्वरूपभूतं ज्ञा
नमस्ति अविद्यावृतस्येश्वरविषयतायाः स्वविषयतायाश्च संबंधरूपार्थः
प्रतिबंधाने श्वरस्वस्वरूपयोर्यथार्थस्फूर्तिः श्रवणादिजन्यभगवद्विषय
कापरोक्षतः करणाहतिप्रागभावनाशप्रयुक्तजीवस्वरूपज्ञानस्याकृ
तेयेन सहसंबंधः नित्यस्यापि ज्ञानविशेषाद्देहेरिप्रसादस्य जीवे सनाश
एवसंबंधः तथा च यथा श्रवणमनननिदिध्यासनजन्यापरोक्षरूपा भग
वद्गतविशेषविषयिकातः करणवृत्तिस्तया भगवत्प्रसादस्य जीवे संबंध
स्तथैवाविद्याशेषत्वं स्यानेदाविर्भावश्च स्वयोग्यशेषभगवद्गतविशेषा
परोक्ष वद्द रेभिहारप्रसादस्यैनाशेषानिहतिः सर्वांस्वानेदाविर्भावश्च मापि
नोहतिश्छिद्रप्रणागार्थैलियते सर्वगतनित्यापरिचितोपि घटादिना हस्तिहारक
एवसंबंधो जायते न स्वतः तार्किकमते सर्वगतस्यापि योगतादेः साक्षादिमते
वसंबोधकं सादिमलियथा तथा नित्यस्य जीवस्वरूपज्ञानस्य श्रवणादिज
सहर्षपरोक्षरूपायाम्नंतः करणाहतेः प्रागभावस्य नाशे सत्येव तत्तेयेपरेश्रो
जीवेव संबंधो जायते एवं नित्यस्यापि ज्ञानादिविशेषस्य हरिप्रसादस्यान्तः
वृत्तिप्रागभावनाशे सत्येव जीवे संबंधो जायते इति भावः २५ ॥

ज्ञसमवैजयन्ती टीका

एवं प्रकृतिसंसाररहितः स्वस्वरूपगणावस्थितो यो जीवात्मा मकस्यापि लोक
स्यकर्तृत्वादिकं न सृजति किं तु प्राकृतत्वात्मनैव प्रवर्तते इत्युक्ते दानीं कस्यचि

गी॰ टी॰ पं॰

इति पापपुण्ययोः ... न स्पृशा-
तीत्याह नादत्त इति विभुः स्वरूपेणाणुपरिमाणकत्वेपि धर्मभूतज्ञानस्य वि-
भुत्वाद्विभुः तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति न्यायात् अयं जीवात्मा कस्य-
चिद्देहेन्द्रियादेः पापं दुष्कृतं च पुनः सुकृतं पुण्यं नादत्ते न गृह्णाति परमेश्वरप्रे-
रिता देहादय एव पापं पुण्यं च कुर्वन्ति अहं तन्न करोमीत्येवं मत्वा ते पापपुण्ये
न गृह्णातीत्यर्थः यद्वा विभुः कस्यचित् आत्मीयत्वेन स्नेहातिरेकतयाभिमत-
स्य पुत्रादेः पापं दुःखं विनादत्ते नापनयति न दूरीकरोतीत्यर्थः कस्यचिद्विद्वे-
ष्यत्वेनाभिमतस्यामित्रादेः सुकृतं सौख्यं चैव नापनयति न कस्याप्ययं पुत्रामि-
त्रामित्रादिसंबन्धवानित्यर्थः ननु एवं चेदात्मानर्थस्य मोहः कथं स्यादिति चेत्त-
त्राह अज्ञानेनेति अज्ञानेनाविद्याख्येनानादिशुभाशुभरूपकर्मगणस्याना-
द्यात्मकस्यात्मनो ज्ञानं स्वाभाविकं धर्मभूतमावृतमाच्छादितमेव वितितेन
ज्ञानावरणहेतुभूतेन कर्मगणेन जन्तवः प्राकृतदेहात्माभिमानवन्तो मह्ये-
ति देवोहं मनुष्योहमित्याद्याकारकं मोहं प्राप्नुवन्ति ततः सत्त्वगुणाद्याकारदेहा-
भिमानजनिता वासना उत्पद्यते ततः कर्मारंभस्ततः पुनस्तत्तद्देहयोगस्ततः पुनस्त-
त्तद्देहाभिमानस्ततः पुनर्वासना पुनस्तथैव एवं स्वपरस्वरूपाज्ञानकृतविपरी-
तवासनयैवास्मिन्संसारे जन्ममरणलक्षणे भ्रमन्तीति भावः १५ ॥

मधुसूदनी टीका

नन्वीश्वरः कारयिता जीवः कर्तेति तथा च श्रुतिः एष ह्येव साधु कर्म कारयति
तं यमुन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इत्यादिः श्रु-
स्मृतिश्च अज्ञो जन्तुरनीशोयमात्मनः सुखदुःखयोः ईश्वरप्रेरितो गच्छेत्स्व-
प्र४ र्गं वा श्वभ्रमेव वेति तथा च जीवेश्वरयोः कर्तृत्वकारयितृत्वाभ्यां भोक्तृत्वभोज-
यितृत्वाभ्यां च पापपुण्यलेपसंभवात्कथमुक्तं स्वभावस्तु प्रवर्तत इति तत्रा-
ह परमार्थतः । विभुः परमेश्वरः कस्यचिज्जीवस्य पापं सुकृतं चैव नादत्ते पर-
मार्थतो जीवस्य कर्तृत्वाभावात् परमेश्वरस्य च कारयितृत्वाभावात् कथं त-
र्हि श्रुतिस्मृति स्मृती लोकव्यवहारश्च तत्राह अज्ञानेनावरणविक्षेपशक्ति-
मता मायाख्येनानृतेन तमसावृतमाच्छादितं ज्ञानं जीवेश्वरजगद्भेदभ्र-

माधिष्ठानभूतेनित्येस्वप्रकाशेसच्चिदानंदरूपमद्वितीयेपरमार्थसत्ये तेनस्व
रूपावरणेनमम्हैतिप्रमातृप्रमेयप्रमाणकर्तृकर्मकरणभोक्तृभोग्यभोग
व४ त्मनाविधसंसाररूपंमोहमतस्मिंस्तद्वभा स्वरूपेणगच्छति जंतवोजननता विदेपं ४
शीलात्संसारिणोवस्तुस्वरूपादर्शिनः अकर्तृभोक्तृपरमानंदाद्वितीयात्मस्व
रूपादर्शननिबंधनोयंजीवेश्वरजगद्भेदभ्रमः प्रतीयमानोवर्ततेमूढानां
तस्यांवावस्थायांमूढप्रत्ययानुवादिन्याबेदेश्रुतिस्मृतीवास्तवाद्वैतबोधि
वाक्यविरोधभूतइतिनदोषः १५ [illegible]
[illegible] ॥

सदानंदीटीका

नत्वकर्तास्तितौकर्ताप्रसिद्धोजीवएवहि ईशःकारयितासिद्धस्तद्विकद्वमि
होच्यते १ मायाविद्याभिधाशक्तिःस्वभावाख्याप्रवर्तते यमिच्छतिसउन्नेतुं
शापंतंकारयत्यजः २ यमिच्छतिवधोनेतुंपापंतंकारयत्यसौ अज्ञोजंतु
रनीशोयमात्मनःसुखदुःखयोः ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्वभ्रमेववा ३
तिश्रुतिस्मृतिभ्यांचनिर्णीतेनाधनायतः ४ कर्तृत्वप्रेरकत्वाभ्यामात्म
नोरीशजीवयोः भोक्तृत्वभोजयितृत्वधर्माभ्यांलेपसंभवात् ५ नैवंवस्तु
तस्त्वात्मायंविभुत्वात्परमेश्वरः जीवस्यकस्यचित्पापंनादत्तेसुकृतंतथा ९
वस्तुतोनास्तिकर्तृत्वंजीवस्यासंगिनोविभोः कारयितृत्वमप्येवंनेश्वर
स्यास्तिवस्तुतः ७ अज्ञानेनावृतेनैवाहंतिविलक्षणशालिना मायाख्येनां
धतमसाच्छादितंचेतनात्मकं ८ जीवेश्वरजगद्भेदभ्रमाधिष्ठानमद्वयं
स्वप्रकाशंपरानंदंज्ञानंतेनेहजंतवः ९ स्वरूपावरणेनैवविक्षेपंयांति
सर्वशः मातृमानप्रमेयादिमोहंदुःखैकसंकटं १० प्राप्नुवंतिमयाजी
वाभ्रांतिज्ञानवशीकृताः अकर्तृभोक्तृपरमानंदात्माद्वितिदर्शकाः जीवे
श्वरजगद्भेदभ्रमोमूढधियांभवेत् तस्यांदशायांमूढानामवभासानुवा
दिनी १२ वास्तवाद्वैतबोध्यायश्रुतिस्तदनुगास्मृतिः अतस्त्वविद्यकैर्ध
र्मैःकर्तृत्वादिभिरीश्वरः १३ जीवोवालिप्यतेनैवश्रीहरेरेषआशयः ई
श्वराश्रयमाश्रित्यब्रह्मात्मैकंविचार्यच १४ अकर्त्रात्मस्वरूपंचनिश्चिन्वं
तिविवेकिनः १५ १५ ॥

नीलकंठीटीका

गी॰ टी॰ पं

ननुपरमेश्वरएवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतेएषएवासा
धुकर्मकारयतितंयमधोनिनीषतइतिश्रुत्यापरमेश्वरेकारयितृत्वेबोध्यते
नतुकथमुच्यतेस्वभावस्तुप्रवर्ततइतितत्राह नादत्तइति कस्यचित्कर्तुःपापं
पुण्यंनादत्तेनापिसुकृतं कारयितृत्वाभावात् यतोविभुर्व्यापकःनिष्क्रियइ
तियावत् सक्रियोपितन्नप्रवर्तयतितदीयेपापपुण्येवालभतेश्रूयते नत
थाकिंतत्सूर्यवत्प्रकाशनएवनतुस्वप्रकाश्यपापेनाकर्त्रादीनाकर्मणासंबा
ध्यतेइतिभावः कारयितृत्वमप्यस्यसत्तामात्रेणसूर्यवत् यथाचदृःप्रका
शतेसविताप्रकाशयतीतिनोदाहृतश्रुतिविरोधः कथंतर्हिईश्वराराध
नार्थंकर्माणिकुर्वंतितदकरणाच्चबिभ्यतीत्याशंक्याह अज्ञानेनेतिम
हाराजस्यसार्वभौमस्याहंसर्वेश्वरोनिर्हेतोस्मीतिज्ञाने अज्ञानेनसोभमे
नावृतेचेत्सतत्रविविधानिपरचक्रादीनिमहांतिसंकटस्थानानिपश्यतिअ
हो अहंदीनोस्मिदुःखोस्मीतिचमन्यतेतद्वदेतेजंतवःस्वस्याहंबलास्मी
तिप्रमाणेनबलभावमजानंतईश्वरादात्मानंपृथगुन्नयमानाईश्वरात्मा
नोःसेव्यसेवकभावंचपश्यंतोमुह्यंति तथाचश्रुतिः अथयोन्यांदेवता
मुपास्तेन्योसावन्योहमस्मीतिनसवेदयथापशुरेवंसदेवानामिति एवंसेवे
तिश्रुतिरपिभ्रांतजनव्यवहारविषयैवेतिभावः १५ ॥

आनंदीटीका

एतदेवसामान्योक्त्याहृदयेसन्निवेशयितुमाह अज्ञानेनमिथ्याज्ञानेनना
विद्यापर्यायेणआत्मस्वानात्मस्वदेहादिष्वात्मबुद्ध्यापरमात्मज्ञानमावृतंते
नमुह्यन्तिजंतवःबालनटषष्ठकन्यायेनबन्धनमनुभवन्तीत्यर्थः १५ ॥

तस्मान्मायाकृतएवबंधमोक्षाविति भ्रमोय रामकंठीटीका मितिपादयितुमाह ॥

विभुर्यथाप्रतिपादितस्वरूपईश्वरोनकस्यचिज्जन्तोःपरमार्थतःपापंवं
धकरणभूतंकल्मषमादत्तेपरिहृतियेनसौजनूनुत्तरपहरणादमव
गीलत्तणंश्रेयःप्राप्नोति नचमोक्षकारणंसुकृतंकस्यचिदादत्तेयेना
सौतदादानात्संसारबन्धनलक्षणमश्रेयःप्राप्नोतिकस्तर्हिबन्धहेतुर्मो
तहेतुर्वेत्याह अज्ञानेनपारमार्थिकपरमात्माभेदाश्रयनमात्रस्वरूपेण

ज्ञानाभावेन मिथ्याज्ञानेन सत्त्वमसेनैव पदार्थस्वरूपज्ञानेयथाप्रतिपा
दितत्त्वप्रथनात्मको बोध आवृतम् संप्रतितिरस्कृतं तेन हेतुना सर्वप्रा
णिनो मुह्यंति शरीरादावात्मप्रतिपत्तिग्रहणालक्षणा विपर्ययज्ञानमय
ह्यपयोवन्धमनुभवन्ति १५ ॥

लाक्षिकी [illegible] टीका

किंच विभुः परमात्मा कस्यचिज्जीवस्य परमार्थतः पापं पुण्यं वा नादत्ते निर्वी सत
त्वात् अतस्तत्तत्त्वरूपमापन्नस्य योगिनो न पुण्यपापसंबन्धः ननु जीवस्यै
व चेदयं कर्तृत्वादिसंबन्धः तर्हि किं कारणा कस्यत आह अज्ञानेनावर
णाशक्त्यात्मकेन स्वरूपापकृवेन ज्ञानं स्वस्वभावप्रत्यभिज्ञालक्षणं आह
तमाच्छादितं विस्मृतिपथमुपनीतमिति यावत् तेन कारणेन जंतवो
जीवा विरभासा मुह्यंति देहाभिमानपूर्वं कर्तृत्वादिकं स्वात्मन्यारोपयंती
त्यर्थः १५ [illegible] १५ ॥

पंचोलीटीका

परमार्थतो वस्तुतत्त्वमाह नादत्तेइति विभुरीश्वरः अविद्याका
मवशाल्लोके कर्मसु नियुक्तेषु नः कस्यचित् भक्तस्य पापं न गृह्णाति किं
तत्तस्य स्वनिधानान्नामसंकीर्तनात्पापं भस्मसाद्भवति च पुनः भक्तस्य
पुण्यं सुकृतं नादत्ते ईश्वरायनिवेदितेनैवमनंतं भवति अज्ञानेन अवि
वेकेनावृतं तेन प्राणिनः मोहं गच्छति आत्मनि कर्तृत्वं भोक्तृत्वमीश्व
रे पापपुण्ययोरादानं मन्यंते १५ ॥

रमावीरसमिद्बोधिनी ॥

अतस्तु नादत्तेइति विभुरीश्वरः कस्यचिद्गुर्वादिवधजनकसमरक
र्माचरतः पापं नादत्ते नांगीकरोति अनेन पापमनुष्ठितमिति मन्यते
स्वयमेव तदनुपासनात् नापि निषिद्धमहिंसाप्रायं भिक्षाचर्यादिकं
वर्णांतरोचितं कर्मानुतिष्ठतः सुकृतमादत्ते अयं पुण्यवानिति न
मन्यते स्वयमेव तन्निषेधनात् कथं तर्हि पुण्यपापाव भासइत्याह

76

अज्ञानेनेति अज्ञानेन गुरुशास्त्रवाक्यादौ संदेहेन ज्ञानं निश्चयात्मक
माहृतं तेन जंतवो पुत्रादिकारिणो मुह्यंति मोहं बुद्धिभ्रमं यांति अय
मत्राभिप्रायः विहितनिषिद्धयोः कर्मणो विषये पुण्यपापे ईश्वरे
णाकृते किंतु स्वीयेनैवानिश्चयेन शंकयेवान्यते विषमितिसुति
स्थितो भूत्वा कर्म कुर्वंति ॥१५॥

मयभाष्य

॥१५॥

भाषा ग्रन्थार

जिस हेतु भगवान न कुछ करते और न किसी से कुछ करवावते हैं वे तो विभुकहे व्यापक तथा पूर्ण काम हैं इस से भक्त अभक्त किसीके पुण्यपा पाप के भागी नहीं हैं परन्तु परमेश्वरकी अचिंत्य जो माया सोई पूर्व कर्म के अनुसार ऊंचनीच कर्म मे लोगों को प्रवृत्ति देती औ अज्ञान से ज्ञान आवृत्त है तिस से सब मोहित होते हैं जो कहो कि पूर्ण काम को फेरि भक्तों पर अनुग्रह औ अभक्तों का निग्रह। क्यों करते हैं तो कहते हैं कि परमेश्वर का निग्रह रूप दण्ड अनुग्रह है अर्थात् दण्ड होनेसे पापी का पाप दूर हो जायगा ऐसे दण्डरूप अनुग्रह का न जानना जो अज्ञान सोई परमेश्वर विषयक ज्ञानको आवृत करता है तो फेरि जीव मोहित होय अपने अज्ञान से परमेश्वर मे विषम दृष्टि करते हैं १५

दोहा

लेत न किसीके पापकों प्रभु पुण्यन हि लेत आवृत हि ज्ञा
न अज्ञानसें बंध्यो जीव तिह हेत १५॥

77

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषा-
मादित्यवज्ज्ञानं प्रकाशयति तत्परं १६

शांकरभाष्य

ज्ञानेनेति ज्ञानेन तु येन अज्ञानेनावृता मुह्यन्ति जंतवः तदज्ञा-
नं येषां जंतूनां विवेकज्ञानेनात्मविषयेण नाशितमात्मनो भवति
तेषां जंतूनामादित्यवत् यथादित्यः समस्तं रूपजातं अवभासयति त-
द्वत् ज्ञानं ज्ञेयं च वस्तु सर्वं प्रकाशयति तत्परमार्थतत्त्वं १६ ॥

आनंदगिरिटीका

तर्हि सर्वेषामनात्मज्ञानवृतत्वाज्ज्ञानवत्वात् व्यामोहस्य भावाज्जगतः संसारा-
निवृत्तिरिति तत्राह ज्ञानेनेति सर्वमिति पूर्णत्वमुच्यते ज्ञेयस्यैव वस्तु-
नस्तत्परमिति विशेषणं तद्धावेष्टं परमार्थतत्वमिति १६ ॥

स्वामिकृतटीका

ज्ञानेन स्वत्वं न मुह्यतीत्याह ज्ञानेनेति आत्मनो भगवतो ज्ञानेन येषां
तदैहिकमप्युपलंभकमज्ञानं नाशितं तज्ज्ञानं [illegible] तेषामज्ञानं नाशयि-
त्वा तत्त्वं परमेश्वरस्य स्वरूपं प्रकाशयति यथा आदित्यस्तमो निरस्य
समस्तं वस्तु ज्ञानं प्रकाशयति तद्वत् १६ ॥

पैशाचभाष्य

ज्ञानेन तु येनाज्ञानेनावृता मुह्यंति जंतवस्तदज्ञानं येषां जंतूनां विवेकज्ञानेना-
त्मविषयेण नाशितमात्मनो भवति तेषां जंतूनामादित्यवत् यथादित्यः सम-
स्तं रूपादिजातमवभासयति तद्वज्ज्ञानं ज्ञेयवस्तु सर्वं प्रकाशयति तत्परं १६ ॥

रामानुजभाष्य

सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरु-
तेऽर्जुन नहि ज्ञानेन सदृशं पवित्रमिति पूर्वोक्तं स्वकाले संगमयति ज्ञानेनेति घ४
एवं वर्तमानेषु सर्वात्मसु येषामात्मनामज्ञानं केनात्मयाथात्म्योपदेशजनि-
तेनात्मविषयेणाहरहरभ्यासाधेयातिशयेन निरतिशयपवित्रेण ज्ञानेन तज्ज्ञानावर-
णमनादिकालप्रवृत्तानंतकर्मसंचयरूपं ज्ञानेन नाशितं तेषां तत्स्वाभाविकं
परं ज्ञानमपरिमितमसंकुचितमादित्यवत् सर्वं यथावस्थितं प्रकाशयति ते-

गी॰
टी॰
पं

78

षामादित्यवत् ज्ञानमिति विनष्टाज्ञानानां वहुत्वाभिधानादात्मस्वरूपव
हुत्वे तेभरस्त्वपक्रमावगतमत्रस्पष्टतरमुक्तं नवेदेवहुत्वमनुपाधिकृतं वि
नष्टाज्ञानानामनुपाधिगंधभावात् तेषामादित्यवज्ज्ञानमिति व्यतिरेकनि
र्देशात् ज्ञानस्य स्वरूपानुवंधिधर्मत्वमुक्तं आदित्यदृष्टांतेन च ज्ञातृज्ञानयोः
प्रभाप्रभावतोरिवावस्थानं च तत एव च संसारदशायां ज्ञानस्य कर्मणा सं
कोचः मोक्षदशायां विकाशश्चोपपद्यते १६ ॥

अभिनवगुप्तकृतटीका

अत एव ज्ञानेन तत्त्वज्ञानेन येषां नाशितमात्मनः तेषामादित्यवज्ज्ञानं प्रका
शयति तत्परं ज्ञानेन तत्त्वज्ञाने नाशिते ज्ञानस्य स्वप्रकाशत्वं स्वतः सिद्धं यथा
दित्यस्य तमस्य नष्टे विनिवर्तितायां हि शंकायां अनंतमनन्तकार्यं स्वयमे
व करोति १६ ॥

परमार्थप्रपा टीका

ज्ञानेन तु तदज्ञानं नीत्याह ज्ञानेनेति तत्पूर्वमुक्तं ज्ञानावृतमज्ञानं येषामा
त्मनरीश्वरस्य ज्ञानेन नाशितं तेजसा तमोवद्भिन्नं तेषां ज्ञानं तत्परमे
श्वरं प्रकाशयति किंवत् आदित्यवत् यथादित्यस्य तेजः सकलं तमस्ति
रस्कृत्यादित्यं प्रकाशयति तद्वत् यद्वादित्यदृष्टांतेनैतदुक्तं भवति यथाप्र
र्यंकरा एवमेव तत्प्रवलेव्यामृतं मेवछादयेति तेनादित्यस्य कृतं दिवसस्यादिनत्वं
नलभेति तद्वदज्ञानच्छन्नं दृष्टिनाच्छन्नं स्वयं याति प्रभं मन्यते वातिमूढ
इति इदमेवाज्ञानस्यावरणशक्तेरपहरणमेव मात्मविषयकमज्ञानमा
त्मानमेवावृणोति परं त्वनुभूयमानचित्तं चित्स्वरूपत्वेनाच्छादयति ।
अतो यमेव ज्ञानोपायस्त्वर्थः श्रुतिरपि वाजसनेयसंहितायां ईशावा
स्यमिदं सर्वं यत्किंच जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्य
स्विद्धनमिति भाष्यं जगत्यां पृथिव्यां इदं यत्किंच जनत वत्सरी दृश्यमानं यत्किं
चित्सर्वं नामरूपकर्मात्मकं गच्छतीति जगत् तत्सर्वमनतं ईशा नियंत्रा ये
स्वस्य वा तापरमेश्वरेणाच्छादनीयं तेन स्वस्वरूपेणाच्छादनीयं तिरस्कार्यं
अवतिरस्करणासामर्थ्यमीशोऽतिपदेन सूचितं यथादीपेन तमसस्तिरस्क्रिय
ते नत्तु तमसा दीपस्त्वर्थः तेन त्यक्तेन जगदाभासेन त्यक्तेन इतरेतापास्ते न क
ना अवशिष्टेकस्य पात्मलाभः स्वात्मं भुंजीथाः वित्तुपांतु धनविषयमत्वं मा

कस्य

गत्यः शृफ अभिक्रोतायाम भिक्रांतयेत्यर्थः १६ ॥

वनमाली टीका

नन्वीश्वरज्ञानस्याज्ञानावृतत्वे योगादिकं साधनं व्यर्थं तत्राह ज्ञानेनेति
ज्ञानेन श्रवणमननिदिध्यासनाकं श्रीहरिगुरुभक्तिसहितेश्वरीयं वा
तत्प्रसादसहकृतेन च यत्साधनेन तज्जन्येन स्वयोग्यभगवज्ज्ञानेनाशेषविष
यकेणापरोक्षरूपेणात्मनो जीवस्वरूपस्याच्छादकमज्ञानं येषां नाशि
तं तेषां स्वरूपभूतं ज्ञानमनावृतं सत्परं श्रेष्ठं तत्प्रकाशयति विषयीक
रोति यथादित्यो लोकं प्रकाशयति तद्वत् तथा च प्रथमं श्रवणादिजन्य
परोक्षवृत्तिस्ततोंतःकरणवृत्तिरूपं भगवदपरोक्षं ततो महाप्रसादस्ततो
जीवं प्रतीश्वरजीवा[illegible]नेशयाच्छादिकाविद्यानिवृत्तिस्ततः आदित्यप्रकाश
वज्जीवेश्वरस्यानंदादिविषयः प्रकाशः इति भावः तेषामित्यनेन जीवानामा
नेकत्वं सिद्धं १६ ॥

ऊस्तमवैसयंती टीका

यथाज्ञानिनोजंतवो मुह्यंति तथा ज्ञानिनस्तु न मुह्यंतीत्याह ज्ञानेनेति
ज्ञानेन सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि नहि ज्ञानेन सदृशं पवित्र
मिह विद्यते ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तेन येन ज्ञानमहिम्ना स
त्संप्रदायोक्त्वाचार्यलब्धेनात्मविषयकेन देहाध्यासातिशयेन निरति
शयपवित्रेण येषामाचार्यदेवानां लब्धात्मयाथात्म्यज्ञानानां गुरुभक्ति
८ प्र[illegible]तिबलेन निर्जितान्येय ज्ञानैव निकावरणरूपाणीणां वशरूप्रपंचेव
तिरस्कृतनिखिलानंतसमदमादिसाधनानामात्मनो मनसो ध्वनादिका
लप्रवृत्तानंतशुभाशुभकर्मसंचयरूपं ज्ञानावरणरूपं तदज्ञानं नाशितं
नष्टं भवति तेषां मुमुक्षूणां भगवन्निर्माणामात्मश्रवणशीलानां हरि
गुरुप्रपंनानां तत्स्वरूपभूतं स्वाभाविकमनाद्यविद्यया संकुचितमपरि
मितं परमुत्कृष्टं ज्ञानं आदित्यवत्सूर्यवत्प्रकाशयति यथा मध्याह्ना
र्कः स्वकरनिकरेणातितिमिरनिकरं निरस्य यथावस्थितं सर्वं वस्तु प्रकाश
यति तथात्मज्ञानमपि याथार्थ्यमात्मवस्त्वित्यर्थः तेषामिति बहुवचने
नत्वबद्धात्मज्ञानानां विनष्टाज्ञानतिमिराणां बहुत्वाभिधानं निरूपाधि

गी॰
टी॰ पं॰

79

कत्वेनात्मस्वरूपस्य बद्धत्वं दर्शितं आदित्यवदिति दृष्टांतेन प्रभाप्रभावतो
रिवज्ञानज्ञानवतोरवस्थाने दर्शितं बद्धावस्थायां कर्मणा ज्ञानस्य सं
कोचो मोक्षावस्थायां तस्य विकाशश्चोपपद्यत इत्यर्थः केचित्तु सदेव सो
म्येदमग्र आसीदेकमेवाद्वितीयं आत्मा वा इदमेक एवाग्र आसीत् एको ह
वै नारायण आसीदित्यादिश्रुतिभ्यः स्वरूपत एकमेव ब्रह्माभेदाश्रयभूतं
अनाद्युपाधिना च भेदस्तत्त्वमस्यादिवाक्यजन्यज्ञानान्निवृत्तिरिति वदंति
तत्तुच्छं विकल्पासहत्वात् तथाहि न तावदुपाधिनाच्छिन्नो ब्रह्मैकदेशो जी
वात्मा ब्रह्मणोऽच्छेद्यत्वात् जीवस्यानादित्वापत्तेश्च नाप्यच्छिन्न एव ब्रह्मरूपो
पाधिसंयुक्तो ब्रह्मप्रदेशविशेषो जीवः ब्रह्मैकप्रदेशे उपाधिसंबंधे तस्मि
न् सर्वे दोषास्तस्यैव स्युः उपाधौ गच्छति सति उपाधिना ब्रह्मप्रदेशाकर्षणा
नर्हत्वेनानुक्षणमुपहितब्रह्मप्रदेशभेदेन क्षणे क्षणे बंधमोक्षौ च भवेता
म् आकर्षणमपत्याभ्युपगमे वाच्छिन्नत्वात् कृत्स्नस्य ब्रह्मण आकर्षणा
त्वात् तदसंभवाभ्युपगमे सर्वांशदोषस्य तादवस्थ्यं अच्छिन्नब्रह्मप्रदेशे
षु सर्वोपाधिसंसर्गेण सर्वजीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसंध
धानं स्यात् प्रदेशभेदादप्रतिसंधाने चैकस्यापि सोपाधौ गच्छति सा
ति संधानं न स्यात् नाप्युपाधिसंयुक्तं ब्रह्मस्वरूपमेव जीवः ब्रह्मस्वरूप
स्यैवोपाधिसंबंधेन जीवत्वापत्तेः तदतिरिक्तानुपहितब्रह्मासिद्धेः सर्वो
पाधिसंयुक्तस्यैतन्नोन्तर एव जीव इति चेतनांतरानभ्युपगमात् अभ्यु
पगमे च भेदस्योपाधिकत्वसिद्धांतभंगात् परपक्षपातित्वापत्तेश्च ना
प्युपाधिरेव जीवः बाह्यमतप्रवेशप्रसंगात् तस्माद्देहेंद्रियाद्यचेतनव
र्गेभ्यो विलक्षणो ज्ञानस्वरूपोऽणुपरिमाणको ज्ञानादिधर्माश्रयः स्व
स्यापरिच्छेद्यस्य स्वरूपतो ब्रह्मणः सकाशाद्भिन्नोपि ब्रह्मात्मकत्वात्
ब्रह्मपृथक्स्थितिप्रवृत्तिकत्वादपरतंत्रसत्ताकत्वाच्छेष्यत्वादिभ्यो हेतुभ्यो ब्र
ह्माभिन्न इति ब्रह्माभिन्नाभिन्न एव जीव इति भगवत्सिद्धांतः १९ ॥

तर्हि सर्वेषामनाद्यज्ञानावृतत्वात् मधुसूदनी टीका कथं संसारनिवृत्तिः स्यादत आह ॥
तदावरणविक्षेपशक्तिमदज्ञानं निर्वाच्यमनृतमनर्थव्रातमूलमा
त्मानमात्माश्रयविषयमविद्यामायाप्रधानादिवाच्यं आत्मनो ज्ञानेन स्वरूप

तु तदज्ञानं येषां

दिष्टवेदांतमहावाक्यजन्येन श्रवणमनननिदिध्यासनपरिपाकनिर्मलां
तःकरणवृत्तिरूपेण निर्विकल्पकसाक्षात्कारेण शोधिततत्त्वंपदार्थाभेद
रूपशुद्धसच्चिदानंदाखंडैकरसवस्तुमात्रविषयेण नाशिते बाधिते कालत्र
येप्यसदेवाभन्नयाज्ञानमधिष्ठानचैतन्यमात्रतां प्रापिते शुक्त्याविव रजते
शुक्तिज्ञानेन येषां श्रवणमननादिसाधनसंपन्नानां भगवदनुगृहीतानां
मुमुक्षूणां तेषां तज्ज्ञानेकतरु आदित्यवद्यथादित्यः स्वोदयमात्रेणैव तमोऽ
निरवशेषं निवर्तयति न तु कंचित्सहायमपेक्षते तथा ब्रह्मज्ञानमपि शु
द्धसत्त्वपरिणामत्वाद्व्यापकप्रकाशरूपे स्वोत्पत्तिमात्रेणैव सहकार्यंतरनि
सव पेक्षं तत्तयास कार्यं ज्ञानं निवर्तयति तत्परं सत्यज्ञानानंतानंदरूपमेवा
द्वितीयं परमात्मतत्त्वं प्रकाशयति प्रतिज्ञायां स्फुरणमात्रेणैव कर्मतामंतरे
णाभिव्यनक्ति अत्रोत्रानेनाहतेज्ञानेन नाशितमित्यज्ञानस्यावरणत्वज्ञाना
नाशत्वाभ्यां ज्ञानाभावरूपत्वे व्यावर्तिते नत्वभावः किंविदाहरणीति न वार्त
नाभावो ज्ञानेन नाश्यते स्वाभावनाशरूपत्वात्स्य तस्मादहमज्ञो मम त्वंच न
जानामीत्यादिसाक्षिप्रत्यक्षसिद्धं भावरूपमेवाज्ञानमिति भगवतो मते वि
स्तरस्त्वद्वैतसिद्ध्यादौ द्रष्टव्यः येषामिति बहुवचनेनानियमो दर्शितः तथा च श्रुतिः
तद्यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तदि
दमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यादिरियं द्विविधेयदाश्रय
मज्ञानं तद्विषयत्वदाश्रयप्रमाणजज्ञानान्निवर्तत इति न्यायप्राप्तमनियमं दर्शय इति
ति तत्राज्ञानगतमावरणं द्विविधं एकमसत्त्वापादकं अन्यत्तु भातो सव
प्यभानापादकं तत्राद्यं परोक्षापरोक्षसाधारणप्रमाणजज्ञानमात्रान्निवर्तते
पि अस्तीति ब्रह्मपरोक्षे पर्वते वह्निर्नास्तीतिभ्रमादर्शनात् तथा सत्यं ज्ञानमनंतं
ब्रह्मास्तीतिवाक्यात्परोक्षनिश्चयेपि ब्रह्म नास्तीति प्रतीतेरेव अस्त्येव ब्रह्म मोनिव
किंतु मम न भातीत्येवं भ्रमजनकं द्वितीयमभानावरणं साक्षात्कारादेव
निवर्तते स च साक्षात्कारो वेदांतवाक्येनैव जन्यते निर्विकल्पकश्चायं द्वैतसि
द्धवनुसंदेयं १९ [illegible] ॥

सदानंदी टीका

तदेवं सर्वजीवानामर्थज्ञानाय विषया आहतनाकथंवंधातन्मकिसा

दितिचेन्नृणां १ तदावरणविक्षेपशक्तिमद्द्वैतकारणं अविद्याख्यमनिर्वा
च्यंज्ञानेनाज्ञानमात्मनः २ गुरूपदिष्टवेदान्तवाक्यजन्येनभास्वता अखंडस
च्चिदानंदवस्त्वैकविषयेणाव ३ बाधितेसदधिष्ठानचिन्मात्रत्वेनबोधिते र
ज्ञानमहिम्नामरीचिजलज्ञानेनबाधितं ४ येषांयथोक्तवेदान्तश्रवणादिमतां
मतां केशवानुगृहीतानांममत्वानांविपश्चितां ५ तज्ज्ञानंसूर्यवत्तेषांपर
मद्वैतविज्ञत्वे प्रकाशयतिचात्मानंप्रतिबिंबग्रहेणावै ६ कर्मतामंतरेण
निव्यनक्तीत्याशयोहरेः ज्ञाननाश्यतयाज्ञानेनत्थैवावरकत्वतः ७ ।
भावरूपमनिर्वाच्यमस्तीतिभगवन्मते नत्वभावःक्वचित्किंचिदावृणोती
तिमेभवेत् ८ नित्यमेवनिहतत्वाज्ज्ञानेनापिननाश्यते येज्ञानाभाव
मज्ञानंतार्किकाःप्राकृताग्रहात् ९ भगवन्मतवाह्यत्वात्तेपराश्तेविना
ग्रहैः अतोज्ञोहंममात्मानंजानामीतिप्रतीतितः १० साक्षिप्रत्यक्षसिद्धं
तद्भावरूपंहरेर्मतं ११ त्रिगुणमनन्तमाध्यकल्पितंविज्ञानेच्छक्तिशिव
विचारोद्भूतबोधेननष्टं निरवधिविभ्रान्त्यात्मभासाचकास्तिभ्रमजल
धरनाशेब्रह्मसूर्योऽद्वितीयः १२ १६ ॥

नीलकंठीटीका

तत्आत्मनआवरकमज्ञानंयेषांज्ञानेनब्रह्मास्मीतिप्रमाणजेननाशि
तंतेषांतत्ज्ञानंकर्तृआदित्यवत्आदित्योयथाकृत्स्नंरूपंप्रकाशयति
तद्वत्परंपरमार्थवस्तुप्रकाशयति अज्ञाननाशार्थंनिहत्यर्थंज्ञानमेष्टव्य
मितिभावः १६॥

आनन्दीटीका

तदज्ञानमविद्यात्मकंतमः येषांज्ञानेनात्मानात्मविचारेणात्मनोना
शितंतेषांतत्परमार्थज्ञानमादित्यइवतत्प्रसिद्धंनित्यंचपरंदृश्यग्भू
तंब्रह्मप्रकाशयति १६ ॥

रामकंठीटीका

येषांपुनस्तद्यथाप्रतिपादितमज्ञानं यथोक्तेनात्मनोज्ञेयस्यतत्त्वस्यज्ञा
नेननाशितमपध्वंसितं तेषांपरमेश्वरानुग्रहाद्यथोक्तकर्मयोगसम्पा

स्वानुष्ठानाधिकृतानां योगिनां तज्ज्ञानं परं प्रकृष्टमपेयं परमात्मस्वरूप
लक्षणं वस्तु प्रकाशयति प्रथयति कथमादित्यवत् यथादित्यो भगवान्स्व
मयाभ्युदितः सन् इन्द्रियागम्यमपि सान्द्रमन्धकारं प्रभामात्रेण पर्यवस्यन्
दृष्टं च वस्तु सर्वं निःसंशयतया प्रकटीकरोति तथैव ज्ञानमेतदीश्वरानुग्रहे
णावसरोत्कर्षितं सत्स्वरूपतिरोधानकारणमज्ञानं तिरस्करोतीत्युपमा
नार्थः [illegible]
[illegible] १६ ॥

लूासिकी वनमाली टीका

व्यतिरेकपरमार्थलाभइत्याह ॥

तद्व्यतिरेके आत्मनोज्ञानेन प्रत्यभिज्ञालक्षणेन येषां तदज्ञानं स्वरूपाप
ह्नवरूपेनाशितमपध्वंसितम् तेषामुपायांतरानपेक्षं स्वप्रकाशं ज्ञान
मुक्तलक्षणं वस्तु प्रकाशयत्यात्मत्वेन प्रथयति ज्ञानस्य स्वप्रकाशत्वादौ
दृष्टांतः आदित्यवदिति यथा निःसंशयम् आदित्यः प्रभामात्रेणान्धकारं
पर्यवस्यन् दृष्टं च वस्तु प्रकटीकरोति तद्वत् [illegible]
[illegible] १६ ॥

पंचोलीटीका

ज्ञानेन तु तदज्ञानमिति ज्ञानेनेति तु पुनः येषां तदज्ञानं मोहकरं अज्ञानं
आत्मनो ज्ञानेन गुरुप्रसादादात्मप्रसादाद्वा ज्ञानेन नाशितं तेषां ज्ञानमा
दित्यवत् तत्परं ब्रह्म प्रकाशयति १६ ॥

रणवीरसमिद्धोधिनी ॥

ज्ञानेनेति येषां जीवानामात्मनः स्वोचितकर्मविषयस्य यत्तस्य ज्ञाने
न सुकृतफलजनकतायां दृढनिश्चयेन तत् अनिष्टफलजनकम
ज्ञानं संदेहरूपं भ्रांतिरूपं वा नाशितं स्यात् तेषां तज्ज्ञानं परं परमफ
लं तदवश्यानुष्ठेयं कर्म प्रकाशयति सूर्य इव भावान् प्रकटीकरो
ति १६ ॥

मथभाष्य

ज्ञानेनेति प्रथमज्ञानंपरोक्षं अपरोक्षज्ञानाव्यवहितसाधनमाह १८॥

81

भाषा अनुवाद

और ज्ञान से जिन का अज्ञान नाश हो गया है ऐसे ज्ञानी पुरुषों
को पर जो भगवत स्वरूप सो प्रकाशमान है जैसे सूर्य के प्रकाश से
अन्याकार हरहो वस्तु सब प्रकाशित होती हैं लोग केवल अपने
मोह से ईश्वर मे मोह कल्पना करते है १६

दोहा

ज्ञानहि सें जिनको भयो मनसें नाश अज्ञान होत विकाशित
ज्ञान हि तिनको पुन ज्यों भान १६॥

82

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छंत्य
पुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः १७ ॥

शांकरभाष्यं

यत्परं ज्ञानं प्रकाशितं तद्बुद्धय इति तस्मिन्गता बुद्धिर्येषां ते तद्बुद्धयः तदात्मा
नस्तदेव परं ब्रह्म आत्मा येषां ते तदात्मानः तन्निष्ठा इति तन्निष्ठा निष्ठाभिनि
वेशस्तात्पर्यं सर्वाणि कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठास्त
त्परायणाश्च तदेव परमयनं परा गतिर्येषां भवति ते तत्परायणाः केवलात्म
रतय इत्यर्थः ते गच्छंत्येवंविधा अपुनरावृत्तिं अपुनर्देहसंबन्धं नयत्क्रांति
ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतो निर्हृतो नाशितः कल्मषः पा
पादिसंसारकारणदोषो येषां ते ज्ञाननिर्धूतकल्मषाः यतय इत्यर्थः १७

आनंदगिरिकृतटीका

विदुषो विविदिषूणां चांतरंगाणि विद्यापरिपाकसाधनानि इत्युपदिदि
क्षुरनंतरश्लोकस्यापेक्षितं पूरयति यत्परमिति तस्मिन्परमार्थतत्वे परस्मिन् ब्र
ह्मणि वाक्यविषयमर्यादया गता प्रवृत्ता श्रवणमनननिदिध्यासनैः सहकृद
ष्टिभेदैर्हि साक्षात्कारलक्षणा येषां ते तथेति प्रमेयविशेषणं विभजते त
स्मिन्निति तर्हि बाह्यो जीवो बोद्धव्यं ब्रह्मेति जीवब्रह्मभेदाभ्युपगमो नेत्याह
तदात्मान इति कल्पितं बोद्धृबोद्धव्यत्वं वस्तुतस्तत्र न भेदोऽस्तीत्यंगीकृत्य व्याचष्टे
तदेवेति ननु देहादावात्माभिमानमपनीय ब्रह्मण्येवाहमस्मीत्यवस्थाने त
त्र न क्षीयमानकर्मप्रतिबंधान्न सिध्यतीत्याशंक्य विशेषणांतरमा
दत्ते तन्निष्ठा इति तत्र निष्ठाशब्दार्थं दर्शयन् विवक्षितमर्थमाह निष्ठेत्यादिना
तथापि पुरुषार्थापेक्षाप्रतिबंधात् कथं यथोक्ते ब्रह्मण्येवावस्थाने सेद्धुं पा
रयति तत्राह तत्परायणाश्चेति यथोक्तानामधिकारिणां परमपुरुषार्थश्रे
यो ब्रह्मज्ञानातिरेकेणान्यत्रासक्तिरिति तात्पर्यार्थमाह केवलेति ननु यथो
क्तविशेषणवतां वर्तमानदेहपातेऽपि देहांतरपरिग्रहस्यावगततया कुतो यथो
क्ते ब्रह्मण्यवस्थानमित्याशंक्यानंतरमाह ते गच्छंतीति सति संसारका
रणे दुरितादौ संसारप्रसरस्य दुर्वारत्वात्कुतोऽपुनरावृत्तिसिद्धिरित्याशंक्याह
ज्ञानेति उक्तविशेषणसम्पन्नया दर्शितफलप्राप्तिमात्मनोऽतिसंभावि

गी॰ टी॰ पं॰

तमिति सत्त्वानो विशिनष्टि यत्तद्य इति १६ ॥

स्वामिकृतटीका

एवंभूतेश्वरोपासकानां फलमाह तद्बुद्धय इति तस्मिन्नेव बुद्धिर्निश्चयात्मिका येषां तस्मिन्नेवात्मा मनो येषां तस्मिन्नेव निष्ठा तात्पर्यं येषां तदेव परमयनमाश्रयो येषां ततस्तत्प्रसादलब्धेनात्मज्ञानेन निर्धूतं निरस्तं कल्मषं येषां ते अपुनरावृत्तिं मुक्तिं यान्ति १७ ॥

पिशाचभाष्यं

आत्मतत्त्वं यत्परं ज्ञानं प्रकाशितं तद्बुद्धय इति तस्मिन्गता बुद्धिर्येषां ते तद्बुद्धयः तदेव परब्रह्मात्मा येषां ते तदात्मानः तन्निष्ठास्तस्मिन्निष्ठाभिनिवेशस्तात्पर्यं सर्वाणि कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठास्तत्परायणास्तदेव परमयनं परागतिर्येषां भवति ते तत्परायणाः केवलात्मरता इत्यर्थः ते गच्छन्ति एवंविधाः अपुनरावृत्तिं पुनर्देहसंबंधं ज्ञाननिर्धूतकल्मषा यथोक्तज्ञानेन निर्धूतो नाशितः कल्मषः पापादिः संसारकारणदोषो येषां ते ज्ञाननिर्धूतकल्मषाः यतय इत्यर्थः १७ ॥

रामानुजभाष्यं

तद्बुद्धय इति तद्बुद्धयस्तथाविधात्मदर्शनव्यवसायाः तदात्मानस्तद्विषयमनसः तन्निष्ठास्तदभ्यासनिरताः तत्परायणास्तदेव परमयनं येषां ते एवमभ्यस्यमानेन ज्ञानेन निर्धूतकल्मषास्तथाविधमात्मानमपुनरावृत्तिं गच्छन्ति यदवस्थात्मनः पुनरावृत्तिर्न विद्यते स आत्मा अपुनरावृत्तिरिति तेन स्वरूपेणावस्थितः तमात्मानं गच्छन्तीत्यर्थः १७ ॥

अभिनवगुप्तकृतटीका

तथा तज्ज्ञतद्बुद्धिमनसां त्यक्तान्यव्यापाराणां घटते इत्याशयं प्रकटयितुमाह तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः सर्वतोऽपि मङ्गलेन तत्स्पर्शं नोऽपि स्वकर्माणि सक्तान्यपि न स्पृशन्ति पंकेरविकरा इव १७ ॥

परमार्थप्रपाटीका

अथेश्वरोपासनया मोक्षाधिकारिणां निष्ठामाह तद्बुद्धय इति तस्मिन्नीश्वरे निश्चयात्मिका [illegible] बुद्धिर्येषां ते तथा तद्विषये आत्मा प्रपन्नो येषां ते तथा

ष्ठा तस्मिन्नेव निष्ठापर्यवसाने येषां ते तथा तद्देवपरायणमात्रप्रयोजने येषां ते
कृ तथाविधा ज्ञाननिर्धूतकल्मषाः संतः अपुनरावृत्तिं गच्छंति अपुनरावृत्तिं गच्छं-
ति ९

वनमाली टीका

भगवद्रूपेक्षज्ञानोत्पत्त्यव्यवहितं साधनमाह तदिति तस्मिन्सद्रूपे तद्गु-
णालये महत्पदारविंदचिंतनेनाखिलपुरुषार्थदे सर्वेश्वरे परमकारुणि-
के पुनः पुनर्धारणारूपा वेदांतजन्या बुद्धिर्येषां ते सएवात्मा परमप्रेमास्पदो ये-
षां ते तस्मिन्नात्मा भगवान् अस्माकं स्वामी इष्टदेवतेति मनो येषामिति वा तस्मि-
न्निष्ठा कायिकवाचिकमानसव्यापारपर्यवसानं येषां ते महापयपितत्वो-
चलत्वमित्यर्थः क्रियामात्रस्य तत्प्रीत्यर्थमेवानुष्ठानमिति भावः तत्परायणाः
णाः सएव परममयनं प्राप्योऽस्माकमिति धीर्येषां तः तादृशास्ताधनैर्जातं यद्भ-
गवद्रूपालंबं ज्ञानं तेन निर्धूतमनाद्यविद्यारूपं कल्मषं येषां ते पुनरावृत्तिमाविर्भू-
तस्वानंदादिरूपगुणकाः संतः प्राणिनेदर्तनिर्मलत्वादिना भगवत्साम्यरू-
पां मुक्तिं प्राप्नुवंतीत्यर्थः गच्छंत्यनेन जीवानां मुक्तौ अणुत्वं च सिद्धं नहि
विभोर्गमनं संभवति मध्यमपरिमाणत्वे चानित्यत्वं स्यादित्यणुत्वमेव सिद्ध्य-
ति एषोऽणुरात्मा चेतसा वेदितव्य इत्यादिश्रुतेः सोऽस्माच्छरीरादुत्क्रम्यामुं लो-
कमभिगच्छति अमुष्मादिमं लोकमागच्छतीति गमनश्रुतेः नच बुद्धिगतं
गमनादिकमात्मन्युपचर्यत इति वाच्यं प्रद्योतेनैष आत्मा निःक्रामतीति
निःक्रमणस्यात्मनिष्ठत्वोक्तेः नच ध्यानमस्तु समाहितस्तत्संज्ञं यात्येवमेवा-
यं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीति श्रुतेः स्वाभाविकग-
त्याश्रयश्रकरदृष्टांतोक्तेश्च नचाणोर्देहस्यैकदेशे स्थितस्य युगपत्सर्वांगे
दुःखाद्यनुभवानुपपत्तिः गुणिनोऽणुत्वेऽपि दीपप्रभावद्गुणेन व्या-
साभोगोपपत्तेः नच गुणिनं विहाय गुणस्यावस्थितिर्न युक्तेति वाच्यं पार्थि-
णां विना जातिसमवायादेर्घटादिरेकैकैव व्यक्तिरिति मीमांसकमते श्रा-
हणापादेरवस्थानात् नच जात्यादिवज्ज्ञानस्यापि व्यापकत्वं स्यात्तु स्यादेव हि
यदि मानं स्यात् देहपवनतत्कार्योपलब्ध्या तावद्व्यापी कल्पने नच प्रभाद्व्या
वा तरं दीपेनेह लाणावत्प्यावस्थानापत्तेः पृथग्विहाय गंधस्यागमनाच्च
नच पृथक्परमाणवो गच्छंतीति वाच्यम् पृथक्कस्तूर्यादेःक्षयापत्तेः नचपृ

न देहयोगोत्पत्तिः पुनरुत्पत्तेरप्रासंगिकत्वात् सर्वगं यस्मादव्यक्तो त्यन्ता[illegible]गोप
क्रमस्यात्मनो नुत्पत्तेः देहैकदेशपतितत्वेन विज्ञानाकृतस्त्वदेहे शैत्यवदन्न
तेर्पिकृतस्वदेहे भोगोपपत्तेः अलातचक्रवदुपपत्तेश्च १७ ॥

[illegible]वैजयन्ती टीका

ननु येषां ज्ञानेनाज्ञानं नाशितं तेषां ज्ञानं प्रकाशयति ते कीदृशाः किंफलं च
प्राप्नुवन्तीत्यपेक्षायामाह तद्बुद्धय इति तद्बुद्धयस्तस्मिन्नात्मदर्शने बुद्धयो व्यव
सायात्मिका येषां ते तथा आत्मपर्याप्तात्मदर्शननिश्चयाः अत एव तदात्मानः
तस्मिन्नात्मदर्शनविषये आत्मा मनो येषां ते तथा आत्मदर्शनैकविषयमान
साः तन्निष्ठाः तस्मिन्नेव निष्ठाभ्यासो येषां ते तथा तद्दर्शनाभ्यासकुशलाः त
त्परायणाः तदेव परमयनं शरणं येषां ते तथा स्वस्वरूपदर्शनैकशरणाः स्वप्राकृ
तविषयदर्शने [illegible] न जातु इत्यर्थः ज्ञाननिर्धूतकल्मषाः ज्ञानेन स्वस्वरूप
ज्ञानेनाभ्यासयुक्तेन निर्धूतानि दूरीकृतानि कल्मषाणि पापानि येषां ते तथा ईदृ
शा ये ते अपुनरावृत्तिं पदवस्थां अपुनरावृत्तिर्नैस्सत्त्वं पुनरावृत्तिः तां प्रकृ
तिसंबंधरहितं शुद्धमात्मस्वरूपं गच्छन्ति प्राप्नुवन्ति १७ ॥

ज्ञानेन परमात्मतत्त्वप्रकाशे सति ॥ मधुसूदनी टीका

तस्मिन् ज्ञानप्रकाशिते परमात्मतत्त्वे सम्यग्दर्शनेन एव वा सर्वविषय
परित्यागेन साधनपरिपाकात् अवसिता बुद्धिरन्तःकरणवृत्तिः साक्षात्
कारलक्षणा येषां ते तद्बुद्धयः सर्वदा निर्बीजसमाधिभाज इत्यर्थः ननु किं
बोद्धारो जीवा बोद्धव्यं ब्रह्म तत्त्वमिति बोद्धृबोद्धव्ययोर्भेदोऽस्ति नेत्याह त
दात्मानः तदेव परं ब्रह्म आत्मा येषां ते तथा बोद्धृबोद्धव्यभावो हि मायया कल्पि
तो न वास्तवो भेदविरोधीति भावः ननु तदात्मान इति विशेषणं व्यर्थं अवि
द्यावतां केषांचिद्विशेषणं अज्ञानामपि हि वस्तुगत्या तदात्मान इति कथं
तद्व्यावर्तकत्वमिति चेन्न इतरात्मत्वव्यावर्तकत्वात्पर्यात् अज्ञा एवानात्मभूते देहादा
वात्माभिमानिन इति न तदात्मान इति व्यपदिश्यन्ते विज्ञास्तु निवृत्तदेहाद्य
भिमाना इति विरोधिनिवृत्त्या तदात्मान इति व्यपदिश्यन्त इति युक्तं विशेषणं
ननु कर्मानुष्ठानविक्षेपे सति कथं देहाद्यभिमाननिवृत्तिरिति तत्राह तन्नि
ष्ठाः तस्मिन्नेव ब्रह्मणि सर्वकर्मानुष्ठानविक्षेपविहीनतया स्थितिर्येषां ते तन्नि
ष्ठाः सर्वकर्मसंन्यासेन तदेकविचारपरा इत्यर्थः फलरागे सति कथं तत्सा

पनभूतकर्मत्यागः इति तत्राह तत्परायणाः तदेव परमयनं प्राप्यं येषां
ते तत्परायणाः सर्वतो विरक्ताः इत्यर्थः अत्र तद्बुद्धय इत्यनेन साक्षात्कार उक्तः
तदात्मान इत्यनेनात्माभिमानरूपविपरीतभावनानिवृत्तिफलको निदि
ध्यासनपरिपाकः तन्निष्ठ इत्यनेन सर्वकर्मसंन्यासपूर्वकः प्रमाणप्रमे
यगतासंभावनानिवृत्तिफलको वेदान्तविचारः श्रवणमननपरिपाकरूपः
तत्परायणा इत्यनेन वैराग्यप्रकर्षः इत्येतेषां उत्तरोत्तरस्य पूर्वपूर्वहेतुत्वं द्रष्टव्यं उक्त
विशेषणा यतयो गच्छन्ति अपुनरावृत्तिं पुनर्देहसंबंधाभावरूपां मुक्तिमा
प्नुवंति सकृत्प्रबुद्धानामपि पुनर्देहसंबंधः कुतो न स्यादिति तत्राह ज्ञान
निर्धूतकल्मषाः ज्ञानेन निर्धूतं समूलमुन्मूलितं पुनर्देहसंबंधकारणं
कल्मषं पुण्यपापात्मकं कर्म येषां ते तथा ज्ञानेनाज्ञाने निहते तत्
कार्यं कर्म तत्तेन निर्मूलं पुनर्देहग्रहणे कथं भवेदिति भावः १७ [illegible]
[illegible]
[illegible] ॥

सदानंदी टीका

ज्ञानप्रकाशिते तस्मिंस्तत्त्वे सच्चित्सुखात्मनि बाह्यवस्तुपरित्यागाद्बुद्धिर्ये
षां सुनिष्ठिता १ तदेवात्मा परं तत्त्वं येषामद्वैतचेतसां तस्मिन्नेव चिदानंदे
स्थितिर्येषां स्थिरा सदा २ प्राप्यं तत्परं येषां विरक्तानां परेशवत् साक्षात्
कारो निदिध्यासश्रवणादिनिरंतरं ३ वैराग्यादिप्रकर्षश्च पूर्वपूर्वस्य कार्य
ता उत्तरोत्तरहेतूनां विशेषणचतुष्टये ४ एतैर्विशेषणोपेता मोक्षं गच्छ
न्त्यनामयं ज्ञानेनोन्मूलितं येषां कल्मषं बंधकारणं ५ सकार्याज्ञानबाधे
न ब्रह्मात्मैक्यधियां सतां कथं तन्मूलको बंधो भवेद्देहपरिग्रहः ६ १७

नीलकंठी टीका

तद्बुद्धय इति यत्परं ब्रह्म प्रशंसितं तत्रैव बुद्धिः अस्ति ब्रह्मेति निश्चयो येषामापा
ततः श्रुत्यर्थविचारात्ते तद्बुद्धयः तदेव आत्मा प्रत्यक्तत्त्वं येषां श्रवणमननात्म
कविचारेण प्रमाणप्रमेयगतासंभावनाविनीतानां ते तदात्मानः तत्रैव नि
ष्ठा विजातीयवृत्त्यनंतरितसजातीयवृत्तिप्रवाहो येषां देहादावनात्मनि आत्म
धीरूपविपरीतभावनारहितानां ते तन्निष्ठाः तदेव परं अयनं अज्ञानरूपावापि
निरासेन प्राप्यं येषां अखंडानंदमग्नानां ते तत्परायणाः अपुनरावृत्तिं मोक्षं गा

गी॰ च्छंति यतः ज्ञानेन निर्धूतं कल्मषमज्ञानं संसारबीजभूतं येषां ते ज्ञान
टी॰ पं॰ निर्धूतकल्मषाः १७ ॥

85

आनन्दीटीका

तस्यात्मज्ञानस्याभ्यासार्थमाह तस्मिन्ब्रह्मणि बुद्धिः इदमेव परप्रकाशकं परमोपेयं इत्यध्यवसायो येषां तस्मिन्नेव निष्ठा निर्वाहो येषां ततः परसंन्यासस्योपेयस्याभावात् तदेव परमयनं गतिर्येषां ते ज्ञाननिर्धूतकल्मषा अपुनरावृत्तिं गच्छन्ति १७ ॥

[illegible] आत्मनो व्यापकत्व [illegible] गेन [illegible] कर्मफलोपभोगसमर्थानि नानाविधानि शरीराणि गृह्णन्तः

रामकंठीटीका

बुद्धिर्नानाभूतबोध्यवस्तुसाधनभूतं कारणं प्राधान्यात्तया समस्तः करणवर्ग उपलक्षितो बोद्धव्यः आत्मशब्देन च बोद्धा पुरुष उच्यते इति । तत्र यथोक्ते ज्ञाने एव पर्यवसिता बुद्धिर्येषां ते तद्बुद्धयः तथा तत्रैव ज्ञाने आत्मा येषां ते तदात्मानो यथोक्तज्ञाननिष्ठा इत्यतीतय इति सकललोकव्यवहारनिबन्धने व आत्मलक्षणं हृदयमहं तज्ज्ञानमयं येषां ते तथाविधाः तथा निष्ठाशब्देन परमोपेयवस्तुसीमोच्यते परायणशब्देन च तत्प्राप्त्युपायो विवक्षितो येन तत्परायणं इति तज्ज्ञानं यथोक्तं निष्ठा येषां ते तन्निष्ठाः तदेव परायणं येषां ते तत्परायणाः इत्थंरूपे योपायलक्षणं हृदयं योगिव्यवहारविषयं यथोक्तज्ञानात्मकमेव येषां ते एवंविधास्तज्ज्ञाननिबन्धनसकलसंसारापवर्गविषयपदार्थसार्थाः अत एवैवंविधेन ज्ञानेन निर्धौतं निःशेषमक्षालितमज्ञानरूपं कल्मषं पापं येषां ते तथाविधा योगिनोऽपुनरावृत्तिं गच्छन्ति न भूयः संभवं मोक्षमाप्नुवन्तीत्यर्थः [illegible] ॥

त्यासिकी वसगनीटीका

तदेवंभूतपरमात्माभ्यासफलमा
ह — तद्बुद्धयस्तमात्मानं भगवन्तं येतस्मिन्परमात्मन्येव बुद्धिरंतःकरणाद्वृत्ति

रूपाबोधशक्तिर्येषांते तद्बुद्धयः समाधौ तदात्मानः सएवब्रह्मैवात्मा स्वभावो
येषांते तथा तन्निष्ठाः समाधिपरमसमये तस्मिन्नेव निष्ठा परमानन्दरूपमनका
रसंस्काररूपा निश्चयो येषांते तथा तत्परायणाः व्युत्थानकालेपरामर्श
त्यागेनात्मनिरंतराश्रवहिताः एवमभ्यासक्रमेण व्युत्थानेपिसमाध्युत्र
वेपःसंपत्स्यति तदुक्तं समाधिसंस्कारवति व्युत्थानेभूयोभूयस्विदेका
मर्शान्नित्योदितसमाधिलाभः इति ततईश्वरप्रसादलब्धेनाद्वैतज्ञानेन
निर्धूतेध्वस्तेकल्मषे पुण्यपापरूपेकर्मयेषांते एवंविधायोगिनोऽपुनरावृ
त्तिंमुक्तिंप्राप्नुवंति तथाचश्रुतिः एकएवात्मामंतव्योजाग्रत्स्वप्नसुषुप्ति
षु स्थानत्रयातीतस्यपुनर्जन्मनविद्यतेइति ॥ [illegible]
[illegible]
[illegible] १७ ॥

पेंचोलीटीका

परमार्थज्ञाननिष्ठानांफलमाह तद्बुद्धयइति तद्बुद्धयस्तस्मिन्नप
रेब्रह्मणिबुद्धिर्येषां तेतद्बुद्धयः तदात्मानः तदेवपरंब्रह्मआत्मायेषां
तन्निष्ठाः तात्पर्येण तस्मिन्नेवब्रह्मणि सर्वकर्माणिसंन्यस्यावस्थाने
येषांतेतत्परायणाः तदेवपरंब्रह्मअयनेपरागतिर्येषांतेतत्परायणाः
णाः केवलात्मरताज्ञाननिर्धूतकल्मषाः यथोक्तेनज्ञानेननिर्धूतो
नाशितःपापादिसंसारकारणंदोषोयेषांतेअपुनरावृत्तिंगच्छंति ८

रणवीरसमिद्बोधिनी ॥

तद्बुद्धयइति तस्मिन्नेवप्रारभ्यमाणेकर्मणिबुद्धिर्निश्चयात्मिका आत्मा
अन्तःकरणंधर्मकं मनश्च निष्ठाज्ञानेंद्रियव्यापारश्च तत्परत्वंकर्मे
द्रियव्यापारश्चयेषामस्ति तेज्ञानेननिश्चयेननिर्धूतंकल्मषमाव
रणकारणभूतः संशयोयेषांतादृशावीरा अपुनरावृत्तिमस्त्रादी
नामपुनर्व्यापारंगच्छंति सकृदेवास्त्राणिप्रयुज्यसाध्यंसाधयंती
तिभावः अथवाऽपुनरावृत्तिंपुनर्जन्माभावलक्षणांमोक्षंप्राप्नुवंतीति
सांपराययमस्यकथितं १७॥

मधभाष्य

तद्बुहयइति परमेश्वरस्वरूपाणांसर्वत्रसाम्यदर्शनांचापरोक्ष
ज्ञानसाधनमित्याशयवानाह १७ ॥

भाषा अनुवाद

ऐसे जो परमेश्वर तिन के उपासकों को प्राप्त जो फल होता है सो कहते हैं कि भगवत की भक्ति से अवश्य ही संसार सागर को उतर जायंगे ऐसी जिन के निश्चयरूप बुद्धि है और तैसे ही भगवद्भक्ति में सम्पन्न औ तत्पर है और परमेश्वर ही जिन के परम अवलंब हैं सो ई जन ईश्वर के प्रसाद से निःपाप होय मुक्तिपद पाय आवागमन से रहित होते हैं सोई कहा कि ईश्वर मे बुद्धि औ ईश्वर मे आत्मा औ ईश्वर मे निष्ठा तथा ईश्वरही मे परायण पुरुष ज्ञान से निर्धूत कल्मष अपुनरागमन पद मोक्ष प्राप्त होते है १७॥

दोहा

ताम बुद्धि मन ताहि मे औ नेष्ठ परायण ताहि प्राप्तहि होत मोक्ष कि को पापनाश ज्ञान से जाहि १७॥

87

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः १८

शांकरभाष्यं

येषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते पंडिताः कथं तत्त्वं पश्यंतीत्युच्यते विद्येति विद्याविनयसंपन्ने विद्या च विनयश्च विद्याविनयौ विद्यात्मनो बोधो विनयश्च उपशमः ताभ्यां विद्याविनयाभ्यां संपन्नो विद्याविनयसंपन्नो विद्वान् विनीतश्च यो ब्राह्मणस्तस्मिन् ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनो विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्विके मध्यमायां च राजस्यां गवि संस्कारहीनायामत्यंतमेव केवलतामसे हस्त्यादौ च सत्वादिगुणैस्तज्जैश्च संस्कारैस्तथा राजसैस्तथा तामसैश्च संस्कारैरत्यंतमेवास्पृष्टं सममेकमविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पंडिताः समदर्शिनः १८ ॥

आनंदगिरिकृतटीका

यदुक्तमपुनरावृत्तिसाधनं तत्त्वज्ञानं तदेव प्रश्नद्वारेण विवृणोति येषामित्यादिना विद्या वेदार्थविज्ञानमित्यङ्गीकृत्य विनयं व्याचष्टे विनय इति उपशमो निरहंकारत्वमनौद्धत्यं परार्थमेव समस्तवाक्यार्थं दर्शयति विद्वानिति गवीत्याद्यनूद्य वाक्यार्थं कथयति विद्येति हस्त्यादौ पंडिताः समदर्शिन इत्युत्तरेण संबंधः तत्र तत्र प्राणिभेदेषु तत्तद्गुणोत्पन्ननिमित्तसंस्कारैश्च संस्पृष्टत्वसंभवात् ब्रह्मणः समत्वमित्याशंक्याह सत्वादीति तज्जैरित्यत्र तच्छब्देन सत्वमेव गृह्यते सात्विकसंस्कारैरिव राजसैः संस्कारैरपि सर्वथैवास्पृष्टं ब्रह्मेत्याह तथेति राजसैरिव तामसैरपि संस्कारैर्ब्रह्मात्यंतमेवास्पृष्टमित्याह तथा तामसैरिति ब्रह्मणो द्वितीयत्वं कूटस्थत्वमसंगत्वं चोक्तेऽर्थे हेतुरिति मत्वा समपदार्थमाह सममिति समदर्शित्वमेव पांडित्यं तद्वत्वे सतीति १८ ॥

स्वामिकृतटीका

कीदृशास्ते ज्ञानिनो ये अपुनरावृत्तिं गच्छंतीत्यपेक्षायामाह विद्याविनयेति विषमेष्वपि समं ब्रह्मैव द्रष्टुं शीलं येषां ते पंडिताः ज्ञानिन इत्यर्थः तत्र विद्याविनयाभ्यां युक्ते ब्राह्मणे वा श्वनीचः पचति तस्मिंश्चेति कर्मणां वैषम्यं गवि हस्तिनि शुनि चेति जातितो वैषम्यं दर्शितम् १८ ॥

पिशाचभाष्यं

गी॰ टी॰ प

88

येषां ज्ञानेन नाशितमात्मनो ज्ञानं ते पण्डिताः कथं ते तत्त्वं पश्यन्तीत्यत्रोच्यते वि
द्याविनयसंपन्ने अतिसंस्कारवति ब्राह्मणे सात्त्विके मध्यमायां राजस्यां गवि संस्
कारहीनायामत्यन्तमेव केवलतामसे हस्त्यादौ समानादिगुणेषु संस्कारैस्त
था राजसा राजसैस्तमसा तामसैश्च संस्कारैरत्यन्तमेवास्पृष्टं सममेवाविक्रियं
ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः सम्यक्दर्शिनः १८॥

रामानुजभाष्यं

विद्याविनयसंपन्न इति विद्याविनयसंपन्नब्राह्मणगोहस्तिश्वश्वपाकादिषु
अत्यन्तविषमाकारतया प्रतीयमानेषु पण्डिता आत्मयाथात्म्यविदो ज्ञानैकाकार अ॰
तया सर्वत्र समदर्शिनः विषमाकारस्तु प्रकृतेर्नात्मनः आत्मा तु सर्वत्र ज्ञानै
काकारतया सम इति पश्यन्तीत्यर्थः १८॥

अभिनवगुप्तकृतटीका

यत एवं स्वभावस्तु प्रवर्तते इत्यतो युक्तात्मनां नाभिसंधिरस्तीत्याह वि
द्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पण्डिताः समद
र्शिनः १८

परमार्थप्रपा टीका

अथ तदाचारमेवं वसितं समदर्शिनमाह विद्येति पण्डिता ज्ञानिनो ब्राह्म
णादिषु समदर्शिनो भवन्ति सर्वत्रात्मदर्शिनो बाह्याकारेण गणयन्तीत्यर्थः : १८

वनमाली टीका

सर्वज्ञानयोगस्थितपाशस्थितस्य भगवतः साम्यज्ञानं विषमदेहादिस्थितानां
साम्यज्ञानं च ज्ञानभक्तिप्रसादद्वारा मुक्तिहेतुरित्याह विद्येति विद्येदार्थ या॰
ज्ञानं ब्रह्मज्ञानं वा विनयो निरहंकारत्वमनौद्धत्यं ताभ्यां संपन्ने ब्रह्मविदि
विनीते च ब्राह्मणे सात्त्विके सर्वोत्तमे तथा गवि राजस्यां मध्यमा
यां तथा हस्तिनि शुनि श्वपाके वात्यन्तं तामसे सर्वाधमे सत्त्वादिगुणैस्तत्सं
अ॰ जैः संस्कारैरस्पृष्टमेव समं तयामिणं तत्त्वं जीवतत्त्वं च द्रष्टुं शीलं येषां
ते समदर्शिनः सर्वत्र जीवे च तत्त्वमेकं च समत्वदर्शिने रागद्वेषादिराहित्ये
न श्रवणादिकमनुतिष्ठन्तः क्रमेण मुक्ता भवन्तीति भावः १८॥

कुलमणिजयन्ती टीका

एवं ज्ञानेन च लौकिकाभ्यां विद्येति विद्यात्मज्ञानेन शास्त्रज्ञानेन वा विन
याविशेषेणानयोर्नीतिर्नम्रता वा ताभ्यां संपन्ने शुक्लस्मिन् ब्राह्मणे वे
देज्ञे श्वपाके अन्त्यजे वेति कर्मगुणैर्विषमे गवि हस्तिनि शुनि चेत्येते ः

˅ तथा च तेषां योगिनां ब्राह्मणेऽह स्त्री शूद्रादिस्वस्वरूपावाधितानां पार्थिवाणामीत्यादि अविनयावनीयासत्यादि अस्तित्वानाथादि ... निनार्थज्ञापकानिताधिनम्रयः श्वपाकेवत्सनपापविज्ञादि ... तत्पवसमयप्रवृत्तीति नतु श्ववत्कुत्रि इति यदुक्तं विदुर्मा सर्वभूतेषु ... नास्ति उत्पत्तिः श्रुतम्भन्नम् अयं सर्वभावयत्नावलित्तिनः प्रज्ञा ... निद्रान स्वैवेयंथार्णता ˅

घ॰

ज्ञात्वैव विप्राः प्रकृतिपरिणामदेहादिसंसर्गात्तेन विषमाकारप्रतीयमानेष्व
तेषु पंडिताः आत्मयाथात्म्यज्ञानवन्तः समदर्शिनः सममेकरूपं शीलं येषां ते तथा
एते सर्वे देहादयः प्रकृतेरेव परिणामा न त्वात्मनः एक आत्मा ज्ञानस्वरूपः स
मानाकारो भवति न तु विषमाकार इत्येवं पश्यंतीत्यर्थः ॥१८॥
देहपातादूर्ध्वं विदेहकैवल्यरूपं ज्ञानफलमुक्त्वा मधुसूदनीटीका प्रारब्धकर्मवशात्तस्मिन्नपि देहे जीवन्मुक्तिरूपं
फलमाह विद्यावेदार्थपरिज्ञानं ब्रह्मविद्या वा विनिरहंकारत्वमनौद्धत्यमिति यावत् नयो॰
ताभ्यां संपन्ने ब्रह्मविदि विनीते च ब्राह्मणे सात्विके सर्वोत्तमे तथा गवि संस्का
रहीनायां राजस्यां मध्यमायां तथा हस्तिनि शुनि श्वपाके चात्यंततामस
से सर्वाधमे च सत्वादिगुणैस्तज्जैश्च संस्कारैरस्पृष्टमेव समं ब्रह्म द्रष्टुं शीलं ये
षां ते समदर्शिनः पंडिता ज्ञानिनः यथा गंगागतोये तडागे सुरायां मूत्रे वा प्र
तिबिंबितस्यादित्यस्य न तद्गुणदोषसंबंधस्तथा ब्रह्मणोऽपि भासहेतुप्र वि॰
तिबिंबितस्योपाधिगतगुणदोषसंबंध इति प्रति संस्थानाः सर्वत्र सम
दृष्ट्यैव रागद्वेषराहित्येन परमानंदस्फूर्त्या जीवन्मुक्तिमनुभवंतीत्यर्थः १८
ननु सात्विकराजसतामसेषु स्वभावविषमेषु प्राणिषु समत्वदर्शनं धर्म
शास्त्रनिषिद्धं तथा च तस्यान्नमभोज्यमित्युपक्रम्य गौतमः स्मरति स
मासमाभ्यां विषमसमे पूजातः इति समासमाभ्यामिति चतुर्थी द्विवचनं
विषमसमे इति द्वंद्वैकवद्भावेन सप्तम्येकवचनं चतुर्वेदपारगाणामत्यं
तसदाचाराणां यादृशो वस्त्रालंकारान्नादिदानपुरःसरं पूजाविशेषः
क्रियते न तत्समायैवासमायैव चतुर्वेदपारगाय सदाचाराय विषमे तस्येत्ता
यत्नेन पूजाप्रकारे कृते तथाल्पवेदानां हीनाचाराणां यादृशो हीनसाध
नः पूजाप्रकारः क्रियते तादृश एव समाय चतुर्वेदपारगसदाचारब्रा
ह्मणायेत्यहीनाय तादृशहीनपूजाधिके मुख्यपूजा समे पूजाप्रकारे
स॰ कृतेऽन्नमहीनतयाहीनस्यान्नमत एव पूजातोऽस्य पूजयितुरन्नमभोज्यं हेतो॰
भवतीत्यर्थः पूजयिता प्रतिपत्तिविशेषमकुर्वन् धनाद्धर्माच्च हीयत इ
ति च दोषांतरं यद्यपि यतीनां निष्परिग्रहाणां पाकाभावादन्नाभावाच्चा
भोज्यान्नत्वं वचनहीनत्वं च स्वत एव विद्यते तथापि धर्महानिदोषो भवत्ये
व अभोज्यान्नत्वं चाश्रुवित्ते न पापोत्पत्तिफलत्वं तपोधनानां च तपण
वयनमिति तद्धानिरपि दूषणं भवत्येवेति कथं समदर्शिनः पंडिता जी
वन्मुक्ता इति प्राप्ते परिहरति ॥

उक्तां ज्ञानफलं मोक्षं देहपातादनंतरं जीवन्मुक्तिफलं प्राह देहे सत्यपि तद्विदां १ सात्विके ब्राह्मणश्रेष्ठे विनीते तत्त्वदर्शिनि मध्ये विसंस्काररहितायां राजस्यां मध्यमाकृतौ अत्यंततामसे सर्वाधमे हस्त्यादिकत्रये सत्वादिकगुणोत्कृष्टैः संस्कारैरत्यसंगिके २ शुभशीले समं ब्रह्म येषां ते तानि तोयपाः सूर्यो गंगाजले कूपे तडागे प्रतिबिंबितः तद्गुणैर्दोषसंबंधैः संस्पृष्टो यथा भवेत् तथा ब्रह्मविदाभासद्वारेण प्रतिबिंबितं ५ तदुपाधिगुणदोषाभ्यां संबंधं याति विद्घृतं इत्येवं मन्यमानास्ते सर्वत्र समदर्शिनः ९ वीतरागाः स्वस्वरूपस्थाः जीवन्मुक्तिं भजंति वै ७ १८ ॥

नीलकंठीटीका

एतेषां जगति दृष्टिमाह विद्येति उत्तमब्राह्मणे चंडालादौ वा समं ब्रह्मैव स्वरूपेणास्फुरणाद्रूपेणाचभासमानेऽदृष्टुं शीलं येषां ते समदर्शिनः यथोक्तं । अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति चराचरं जगद्ब्रह्मदृष्ट्यैव पश्यंतीत्यर्थः १८ ॥

आनंदीटीका

विद्याविनयसंपन्ने ब्राह्मणादिविषये शरीरस्थिताः समदर्शिनः सममेकमविकारं ब्रह्म द्रष्टुं शीलमेषां ते तादृशाः संतीत्यन्वयः विगतरागद्वेषाभिमानाः ब्राह्मणशरीराश्रयेण किमपि सुकृतं नादेयं श्वपाकशरीराश्रयेण किमपि दुष्कृतं न ग्राह्यमित्यर्थः अत्रायमर्थसंग्रहः योगीयद्यपि महाविदेहाख्यया संयमहस्त्यानतन्नत्सारब्रसुकृतं न ग्राह्यमित्यर्थः अत्रायमर्थसंग्रहः योगी यद्यपि महाविदेहाख्यया संयमहस्त्यानतन्नत्सारब्रसुकृतदुष्कृतफलोपभोगार्थं मनुष्यपशुपक्ष्यादीनि नानाविधान्युत्तममध्यमाधमशरीराणि गृह्णाति तथापि तस्य शरीराश्रयेण पुण्यपापलेपो नास्ति यथा सूर्यस्य पुण्यपापभूमिसंपर्कात् तथा चात्र विद्याविनयसंपन्नो ब्राह्मणोत्तमः अन्ये क्षत्रियादयो मध्यमाः श्वपाकोऽधमः पशुषु गजतया गौरुत्तमा हस्ती मध्यमः श्वाधमः १८ ॥

(वं विदेह धारणा मुक्ता महाविदेहां दर्शयति परिकृत्ता ग्रणाधारणाभिन्नाः प्रकाशावरणक्षयो जन्मविदेहाख्यवृत्तयः प्रादुर्भूता ग्रमादिसिद्धयः प्रत्यमनावेशात्तत्त्विवहूनिसृगयन्तप्रायोगवरं कुर्यात्तैश्च संविमहीवृत्त भुंजीत विषयान्केश्चित्केश्चिदुग्रं तपश्चरेत् संहरेच्च पुनस्तानि सूर्यस्तेजोगणानिवेतादि पृथग्भमेयोद्भानपवलंति यान्मनो ग्राघक तैन्यायव्रार्तिकादिदर्शितयोर्थस्त्या कर्मसमुपभोगेन दुःखार्थ तत्तत्कर्मतो पभोगसमर्थाविनानाविनिर्माणी शरीराणि गृह्णन्ति ५)

रामकंठीटीका

ग्रंथेनाहं ज्ञानीयोगिनां सकललोक विलक्षणां विनयवतीं प्रतिपादयितुमाह — विद्याशास्त्रं विनयस्तदर्थानुष्ठानविषयो नियमविशेषस्ताभ्यां संपन्नः

मेवद्रष्टो याब्राह्मणास्तस्मिंस्तथागवादिषुतिर्यक्षुभयादृष्टारमैथुनमात्रव
र्यवस्थितसर्वेहत्स्विषु तथाश्वपाके मनुष्यभावेपितिर्यकप्राये पंडितायथो
क्तत्वज्ञानप्रवुद्धाः समदर्शिनः समंसमात्मैकमशेषविशेषशून्यंस्व
स्वभावं विल्मात्रेद्रष्टुं प्रतिपत्तुं शीलंयेषांतेन्येयाविधाः किमनेनोक्तंभ
वति येमनुजूभितदिव्यज्ञानवत्तेषु मायाप्रहतदृष्टिभिर्नानात्वेनपरि
नृश्यमानेष्वमस्तभावजातेष्ववैलिकरूपतयानित्यमालोकयंति नवैवंस
नवं यथावेवस्त्ये(?)गादौविहितंसमाचारंश्वपचादिषु प्रयुंजते श्वपचादिषु
विहितंब्राह्मणादिष्विति विकर्मणिस्थिताः पारमेश्वरींजगद्व्यवस्थांब्रु
त्पादयति तेहियथास्थितमेवजगद्भावविलासंब्रह्मात्मकंपश्यंति नतु
बुधानमाचरंतीति [illegible] १८ ॥
एवंदेहपातादूर्ध्वंविदेहकैवल्यंफलं[?]सिनी[redacted]टीका पंज्ञानफलभुक्तामारब्धकर्मवशात्तत्पिदेहे जीवन्मुक्तिरूपंतत्फ
माह — पंडितायथोक्ततत्वज्ञानाःस्वप्रवुद्धाः विद्याविनयसंपन्नेब्राह्मणेविद्या
शास्त्रविनयस्तदर्थानुष्ठाननिवस्तान्यांसंपन्ने ब्राह्मणेसात्विकेसर्वोत्त
मे तथागवि राजसेपावनत्वादिधर्मयुक्तायाम् हस्तिनि अर्थादिस्था
ने शुन्यपवित्रत्वादिहाश्रये श्वपाकपापित्वादिप्रतिपन्निविषये पतेभूता
मेभूव सत्वादिसंस्कारैरसंस्पृष्टाःसमदर्शिनः समंनिर्विशेषंब्रह्मद्रष्टुं
शीलंयेषांतेइतिसमंपश्यंति नतुव्यवहरंति तदुक्तं विद्वमीसर्वदेहेषुविशे
षोनास्तिकश्चन अतस्तत्रत्ययेसर्वेभावयन्भवजिज्ञिनइति यथागंगातो
येतडागेसुरायांमूत्रेवप्रतिविम्बितस्यादित्यस्यनतद्गुणदोषसंबंधः इत्यनुसं
दधानाः सर्वत्रसमदृष्ट्यैवपरमानंदस्फूर्त्याजीवन्मुक्तिमनुभवंतीत्यर्थः
इत्यद्वैतज्ञानस्येयंधारोक्ता [illegible]
[illegible]
[illegible] १८ ॥

पंचोलीटीका

कथंतत्वंपश्यंतिइत्यवधायतायांतत्प्रकारमाह विद्येति पंडिताविवे
किनः विद्यावतिसुविनीतेब्राह्मणेसात्विकेराजस्येगविस्त्रस्तेतनाम

सेहस्त्यादौसमदर्शिनः समंसर्वेष्वपिनाशगुणसंस्कारविक्रियादिना
रहितंपरंब्रह्मैवपश्यन्ति १८ ॥

रणवीरसमिद्धोधिनी ॥

विद्याविनयेति पंडिताब्रह्मव्यवहारनिपुणाः विद्याविनयसंप
न्ने विद्याशास्त्रं विनयस्तदर्थानुष्ठानविषयोनियमविशेषस्तदादि
भ्यां संपन्ने विशिष्टे ब्राह्मणेगवादौचसमदर्शिनः ब्राह्मणत्वादि
कंविहायाततायित्वमंगीकृत्यवध्यतायांसमानंनिमित्तंपश्यंति
तच्छीलाः इति तथाचस्मृतिः आततायिनमायांतंहन्यादेवाविचा
रयन् इति नाततायिवधेदोषः इत्यादिच भगवताचयेन्नकवंयस्त
थैवाचरितं इति अत्रचगवादिरूपेणप्रकृत्यामायाविनोब्रह्मणएवदं
तव्यानत्वंनगवत्वेषामाततायित्वासंभवादित्ययंभगवतोभिप्रायः
तथोक्तिस्तु निःसंशयंब्रह्मप्रवर्तनार्था १८ ॥

मथभाष्य

विद्येति तदेवस्तौति १८ ॥

भाषा अनुवाद

तो वे तत्त्वज्ञानी जो मुक्ति लाभ करते कैसे होते हैं सोई कहते हैं कि विषम वस्तुमे समज्ञान अर्थात् सकल वस्तु मे ब्रह्मरूप देखते हैं जैसे कि विद्या औ विनय से युक्त ब्राह्मण औ गऊ हाथी कुत्ता तथा चाण्डाल इन सब मे पण्डित कहे ज्ञानी समदर्शी होते हैं अर्थात् सब मे आत्मा रूप ईश्वर को एकरूप देखते है १८ ॥

दोहा

विद्याविनययुतविप्र मे गऊ मे हस्ति माहि औरहिस्वान चंडाल
में पंडित समदर्शाहि १८ ॥

91

इहैवतैर्जितःसर्गो येषांसाम्येस्थितंमनः निर्दोषं
हिसमंब्रह्म तस्माद्ब्रह्मणितेस्थिताः १९ ॥

शांकरभाष्यं

नन्वभोज्यान्नास्तेदोषवन्तः समासमाभ्यांविषमसमेपूजातइति स्मृतेर्न
तेदोषवंतः कथंइहेति इहैव जीवद्भिरेवतैः समदर्शिभिः पंडितैर्जितोवशी
कृतः सर्गोजन्मयेषांसाम्येसर्वभूतेषु ब्रह्मणिसमभावेस्थितंनिश्चलीभूतं
मनोंऽतःकरणंनिर्दोषंयद्यपिदोषवत्सुश्वपाकादिषु मूढैस्तद्दोषैर्दोषवदिव
विभाव्यतेतथापि तद्दोषैरसंस्पृष्टमिति ~~निर्दोषंयद्यपिदोषवत्सुश्वपाकादिषु मूढैस्तद्दो~~
~~षैर्दोषवदिवविभाव्यते तथापि तद्दोषैरसंस्पृष्टमिति~~ निर्दोषंहि दोषव-
र्जितंहि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्यवक्ष्यतिच भग
वानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्निर्गुणत्वादिति च नाप्यन्त्यादिविशे
षा आत्मनोभेदकाःसंतिप्रतिशरीरंतेषांसत्वेप्रमाणानुपपत्तेरतःसमं
ब्रह्मैकंच तस्माद्ब्रह्मण्येवतेस्थिताः तस्मान्नदोषगन्धमात्रमपितान्स्पृ
शति देहादिसंघातात्मदर्शनाभिमानाभावात् तेषांदेहादिसंघातात्मदर्श
नाभिमानवद्विषयन्तु तत्सूत्रं समासमाभ्यांविषमसमे पूजातइतिपूजा-
विषयत्वविशेषणात् दृश्यतेहिब्रह्मवित् षडङ्गवित् चतुर्वेदवित् इति पू
जादानादौगुणविशेषसंबंधःकारणंब्रह्मतुसर्वगुणदोषसंबन्धवर्जितमि
त्यतो ब्रह्मणितेस्थिताइतियुक्तं १९ ॥

आनंदगिरिकृतटीका

सात्विकेषु राजसेषु तामसेषुचासमेषु समत्वदर्शनमनुचितमिति शं
कतेनन्वितिसर्वत्र समदर्शिनः तत्त्वेन पराम्रष्टंपतितेषां दोषवत्वादा-
भोज्यान्नत्वमित्यत्र प्रमाणमाह समासमाभ्यामिति समानामध्ययनादि
भिः समानधर्मकाणां वस्त्रालंकारादिपूजयाविषमे प्रतिपत्तिविशेषे ।
क्रियमाणे सत्यसमानांचासमानधर्मकाणां कस्यचिदेकवेदत्वमपरा-
स्यद्विवेदत्वमित्यादिधर्मवतां साधारणतयापूजयासमेप्रतिपत्तिविशेषे पूज
यिताएवविशेषज्ञाना प्रतिपत्तिमकुर्वन्धनाद्धर्माच्च हीयतेतेनसात्विके
राजसतामसयोश्च समबुद्धिंकुर्वन्प्रत्यवैतीत्यर्थः उत्तरत्वेनोत्तरश्लोकम

वर्तयतीति न ते दोषवन्त इति स्वत्वयं भेदेन सर्वसत्वेषु समत्वदर्शिनां
दोषवत्त्वमुक्तं कथं नास्तीति प्रतिज्ञामात्रेण सिध्यतीति शंकते कथमिति
स्मृतेर्गतिमप्येवं दर्शयन् निर्दोषत्वं समत्वदर्शिनो विशदयति इहैवेति सर्वे
षां चेतनानां साम्ये ब्रह्मणि मनसो ब्रह्मलोकगमनमन्तरेण अस्मिन्नेव दे
92
हे परिभूतजन्मनामशेषदोषराहित्ये हेतुमाह निर्दोषं हीति वर्तमानो दे
हः समस्यापरिदृश्यते तेनानेव समदर्शिनो विशिनष्टि येषामिति ननु ब्रह्म
णो निर्दोषत्वमसिद्धं दोषवत्त्वश्वपाकादिषु तद्दोषैर्दोषवत्त्वोपलंभसंभ ले
न वात् तत्राह यद्यपीति यस्मात् तन्निर्दोषं तस्मात्तस्मिन् ब्रह्मणि स्थितास्तै निर्दो
षैः सर्गो जित इति संबन्धः ब्रह्मणो गुणाभ्युपगमाद्गणीयान् दोषोपि स्यादि
त्याशंक्याह नापीति चेतनस्य गुणविशेषे विशिष्टत्वमनिष्टं निर्गुणत्वश्र
वणादित्युक्तं बुद्धिस्वर्वहीनां परिशेषादात्मधर्मत्वस्य केचिन्निचिन्तता
दित्याशंक्याह वस्तुतश्चेति आत्मनो निर्गुणत्वे वाक्यशेषं प्रमाणयति अ
नादित्वादिति चकारो वस्तुतीत्यनेन संबंधार्थः गुणदोषवशादात्मनो भे
दाभावेपि भेदो नस्य विशेषेभ्यो भविष्यतीति प्रसंगादाशंक्य दूषयति ना
पीति प्रतिशरीरमात्मभेदसिद्धौ तद्धेतुत्वेन तेषां सत्वं तेषां च सत्वे प्रतिश
रीरमात्मनो भेदसिद्धिरिति परस्पराश्रयत्वमभिप्रेत्य हेतुमाह प्रतिशरीर
मिति आत्मनो भेदकाभावे फलितमाह अत इति समत्वमेव व्याकरोति
एकं चेति ब्रह्मणो निर्विशेषत्वेनैकत्वाज्जीवानां च भेदकाभावेनैकत्वस्यो
क्तत्वादेकलक्षणत्वादेकत्वं जीवब्रह्मणोरैक्यमित्याह तस्मादिति जीव
ब्रह्मणोरेकत्वे जीवानां ब्रह्मवन्निर्दोषत्वं सिध्यतीत्याह तस्मान्नेति तदेव ह्य
र्थमेव स्फोरयति देहादीति यदि सर्वसत्वेषु समत्वदर्शनमदुष्टमिष्टं तर्हि
कथं गौतमसूत्रमित्याशंक्याह देहादिसंघातेति तत्त्वस्य पूजाभिमानव
द्विषयत्वेन गमकमाह पूजेति यदि वतद्वेदानामेव स्मृता पूजयावैषम्यं यदि
वा चतुर्वेदानां षडङ्गविदां ब्रह्मविदां च पूजायाः साम्यं तदा तेषामुक्तपूजावि
षयाणां केषांचित्समनो विकारसंभवे कर्ता प्रत्यवैतीत्यविद्वद्विषयत्वं सूत्रा
स्य प्रतिभातीत्यर्थः तदेव वाच्यमवमनुक्लसेनोदाहरति दृश्यते हीति दे

हादिसंघाताभिमानवतां गुणदोषसंबन्धसंभवात्तद्विषयं सूत्रमित्यु
क्तमिदानीं ब्रह्मात्मदर्शनाभिमानवतां गुणदोषासंबन्धान्नतद्विषयं सू
त्रमित्यभिप्रेत्याह ब्रह्मविदिति १८ ॥

स्वामिकृतटीका

ननु विषमेषु समदर्शनेन निषिद्धं कुर्वन्तः कथं ते पंडिताः यथाह गौत
मः समासमाभ्यां विषमसमे पूजात इति अस्यार्थः समाय पूजायां
विषमप्रकारेण कृते विषमाय च समप्रकारेण कृते सति पूजक इहलोकात्प
रलोकाच्च हीयत इति तत्राह इहैवेति इहैव जीवद्भिरेव तैः सृज्यत इति
सर्गः संसारो जितो निरस्तः केषां येषां मनः साम्ये समत्वे स्थितं तत्र हेतु
र्हि यस्मात् ब्रह्म समं निर्दोषं च तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिता ब्र
ह्मभावं प्राप्ता इत्यर्थः गौतमोक्तस्तु दोषो ब्रह्मभावप्राप्तेः पूर्वमेव पू
जात इति पूजकावस्थाश्रवणात् १९ ॥

पिशाचभाष्ये

ननु भोज्यान्नास्ते दोषवंतं समासमाभ्यां विषमसमे पूजात इति स्मृतेः न ते
दोषवंतः कथं इहैवेति इहैव जीवद्भिः समदर्शिभिः पंडितैर्जितो वशीकृतः
सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणः समभावे स्थितं मनोंतःकरणं
निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैः सदोषवदिव विभाव्यते त
थापि तद्दोषैरस्पृष्टमिति निर्दोषं दोषवर्जितं हि यस्माद्ब्रह्मापि स्वगुणाभेदात्
भिन्नं निर्गुणत्वाच्चेतनत्वस्य वस्तुतिभगवानिच्छादीनां देहधर्मत्वमना
दित्वान्निर्गुणत्वादिति च नाप्यंत्यविशेषा आत्मनो भेदकाः संति प्रतिशरीरं
तेषां सत्वे प्रमाणानुपपत्तेः अतः समं च ब्रह्मैकं तस्माद्ब्रह्मण्येव ते स्थिता
स्तस्मान्न दोषगंधमात्रमपि तान् स्पृशति देहादिसंघातात्मदर्शनाभिमा
नाभावान्नेषां देहादिसंघातात्मदर्शनाभिमानवद्विषयं तत्तत्त्वं समासमा
भ्यां विषमसमे पूजात इति पूजाविषयत्वेन विशेषणाद्दृष्टपते हि ब्रह्मवित्
षडंगवित् वत्तवेदविदिति पूजादानादौ गुणविशेषसंबंधः कारणं ब्रह्म
तु सर्वगुणदोषवर्जितमित्यतो ब्रह्मणि ते स्थिता इति युक्तं कर्मविषयं तत्समा
समाभ्यामित्यादि इदं तु सर्वसंन्यासविषयं प्रस्तुते सर्वकर्माणि मनसा संन्यस्य

गी° त्यारभ्याध्यायपरिसमाप्तेः १९
टी° पं

93

रामानुजभाष्यं

इहैवेति इहैव साधनानुष्ठानदशायामेव तैः सर्गो जितः संसारो जितः ये
षामुक्तरीत्या सर्वेष्वात्मसु साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म प्रकृतिसं
सर्गदोषवियुक्ततया समम् आत्मवस्तु हि ब्रह्म आत्मसु साम्ये स्थिता ब्रह्म
णि स्थिता एव ते ब्रह्मणि स्थितिरेव हि संसारजयः आत्मसु ज्ञानैकाका
रतया साम्यमनुसन्धाना मुक्ता एवेत्यर्थः १९॥

अभिनवगुप्तकृतटीका अयं श्लोकः अस्यां टीकायां षष्ठाध्याये दिप्नः

तेषां च तेषां योगिनां ब्राह्मणो नीचः श्वा बहिस्पृश्यः श्वपाको दिनाहं गुणवान्
विद्यामीत्यादि गविन पावनीयमित्यादि हस्तिनि नाशोऽदियौः शुनि र
नापवित्रापकारितादिनिश्चयः श्वपाके च न पापापवित्रादिनिश्चयाः अत
एव समं पश्यन्तीति न तु स्वयं वहन्तीति यदुक्तं विद्वांसः सर्वदेहेषु विशेषो
नास्ति ज्ञवित् अतः सततं समं भावयन् भवजिन्नरः अत्रापि भाव
यन्निति ज्ञानस्यैवायं पारोक्ता १९॥

परमार्थप्रपाटीका

अथ तेषां फलमाह इहैवेति येषां ब्रह्मणादिषु साम्ये समत्वे मनः स्थितं स्थि
कै रीभूतं तैः समदर्शिभिः इहैव देशे जीवद्भिः संसारो जितः हि यस्मात्कारणा
द्ब्रह्म समम् अविषमं तथा निर्दोषं वैषम्यदोषसाधनीभूतं न तु देहाद्युपाधि
भिरस्पृष्टं निर्बाधं वा तस्मात्ते ब्रह्मणि स्थिताः समो मशकेन समो नागेनेति
श्रुतेः १९॥

वनमालीटीका

ते जीवन्मुक्ता भवन्तीत्याह इहेति येषां मनः साम्ये मनः स्थितं तैरिहैव
जन्मनि सर्गो जन्मादिरूपः संसारो जितः ननु विषमस्य वस्तुनः समदर्शन
मात्रेण कथं मुक्तिस्तत्राह निर्दोषमिति हि यतः परं ब्रह्म निर्दोषं नात्म मंजी
वात्मभवापि तत्तत्त्वात्मसमतः समदर्शिनः सर्वत्र समब्रह्मदर्शिनो जीवे
श्वरेति यमप्रज्ञानानेदनिर्विकारत्वादिना साम्यदर्शिनो नदेहपारिराहित्याद्ब्रह्मते ब्र
ह्मणि स्थिताः अपरोक्षीभूते ब्रह्मण्येव स्थिताः तेषां तादृशदृष्ट्यावहिन

कालेएव परब्रह्मणा योगितं भवतीति भावः १८ ॥

क्रमवैजयन्तीटीका

किंच इहैवेति येषां ज्ञानाभ्यासनिरतानां मुमुक्षूणां मनः आत्मप्रवृत्तिदर्श
नोपायभूते साम्ये ज्ञानैकाकारतया सर्वेषामात्मवस्तुनः स्वरूपे साम्ये त
स्मिन् साम्ये आत्मस्वरूपे स्थितं प्राकृतविषयाव्याकुलतया स्थिरीभूतं भवति
तैः साधनाभ्यासपरैर्मुमुक्षुभिः इहैवास्मिन्संसारे एव जन्मन्येव वा साधनद
शायामेव वा सर्गः संसारो जितस्त्यक्तस्तत्र स्थिता अपि त्यक्त एवेत्यर्थः कस्मा
देवमित्यपेक्षायामाह हि यस्मादात्मवस्तु ब्रह्म हेयगुणाकर्ताहूदितं हेयद्वा
वित्यस्माद्धानतो रोगादिको मदम्रत्ययः यद्वा यथा पृथिवीत्वजलत्वादिविशेष
धर्मेण पृथिव्यादयो भिन्ना अपि द्रव्यत्वसामान्यधर्मेणाभिन्नाः तथा सामान्यधर्मे ५
णाभिन्नाः तथा जीवब्रह्मणोरल्पज्ञत्वसर्वज्ञत्वादिविशेषधर्मेणाल्पस्वरूपतः उभौ
भिन्नावपि चेतनत्वादिसामान्यधर्मेणाभिन्नावित्येवं रीत्या जीवस्यापि ब्रह्मकथ
नेयुक्तमेव एवमपि कृतो यतः समे ज्ञानैकाकारतया सर्वात्मनां समाने रूपे ।
अत एव निर्दोषप्रकृतिसंसर्गरूपदोषवर्जितं भवति तस्मात् ब्रह्मणि आत्म
साम्ये ते स्थिताः स्थितवन्तो मुक्ता एवेत्यर्थः आत्मसाम्यस्थितिरेव संसारजय इत्यर्थ :१९

मधुसूदनीटीका

तैः समदर्शिभिः पण्डितैरिहैव जीवनदशायामेव जितोऽतिक्रान्तः सर्गः सृज्यत
इति व्युत्पत्त्या द्वैतप्रपंचः देहपातादूर्ध्वमतिक्रमितव्य इति किमु वक्तव्यं कैः ।
येषां साम्ये सर्वभूतेषु विषमेष्वपि वर्तमानस्य ब्रह्मणः समभावे स्थितं निश्च
लं मनः हि यस्मान्निर्दोषं समं सर्वविकारशून्यं कूटस्थं नित्यमेकं च ब्रह्म
तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिताः अयं भावः दुष्टत्वं हि द्विधा भवति ।
अदुष्टस्यापि दुष्टसंबंधाद्यथा गांगोदकस्य सुरागर्तपातात् तदेव वा
यथा मूत्रादेः तत्र दोषवतः श्वपाकादिषु स्थितत्वेन तद्दोषैर्दुष्टमिति ब्रह्मेति मूढै
र्विभाव्यमानमपि सर्वदोषासंस्पृष्टमेव ब्रह्म व्योमवदसंगत्वात् असंगो
ह्ययं पुरुषः सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एक
स्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेः नापि कामा
दिधर्मवत्तया स्वत एव कलुषितं कामादेरन्तःकरणधर्मत्वस्य श्रुतिस्मृति

गी॰
टी॰
५

94

षिद्धस्मृतिनात स्मान्निर्दोषं ब्रह्म तद्रूपापत्त्या यतो जीवन्मुक्ताः अभोज्यान्नादिदो
षदृष्टोऽस्मीति व्याख्यातं स्मृतिश्चाविद्वद्गृहस्थविषयैवतस्मात्समभोज्यमित्युपक्र
मात्सजातः इति मध्ये निर्देशाद्धनात् पर्यवसीयत इत्युपसंहाराचेति द्रष्टव्यं १९
[illegible] ॥

मराठीटीका

ननु सातिकमुख्येषु स्वभावविषमेषु च समत्वदर्शनेशास्त्रनिषिद्धं पमेत
मते १ स्ववृत्तौ च समभोज्यान्नः इत्युपक्रम्य गौतमः समासमाभ्यां विषमसमे
पूजातः इत्यसौ २ उत्कृष्टानां यथा पूजा प्रोक्ता वेदविरोधकृतो नत्समायैव
चान्यस्मैन्ने पूजाविधीयते ३ हीनाचारवतामल्पविदा पूजायथोदिता
तत्समानायचान्यस्मै मध्यपूजाविधीयते ४ हीनत्वेन वरिष्ठस्य हीनस्य
त्नमभावतः पूजातः कारणात्तस्य पूजाकर्तुरतद्विदः ५ भवत्यन्नमभोज्य
हिंस्यते नित्यर्थईरितः एवं दोषप्रसिद्धे ते कथं स्युः समदर्शिनः ६ पंडिता
इति प्रोक्ता यामतं प्राह केशवः तैर्जीवद्भिरतिक्रांतः पंडितैः समदर्शिभिः
सर्गो हैतप्रपंचोऽयं भूतेषु विषमेष्वपि ब्रह्मणो वर्तमानस्य साम्ये येषां स्थिरं म
नः यस्मान्नद्धह्मकूटस्थं नित्यमेकरसं समं तस्मात्तेवस्थिता नित्यं ब्रह्मणीव
विपश्चितः ७ यामैर्दोषवत्स्वेषु श्वपाकादिषु यद्यपि तद्दोषैर्दोषवत्स्व
दैः परब्रह्म विभाव्यते १० तथापि दोषासंस्पृष्टमेव ब्रह्मस्वभावतः तद्रू
पाः पंडिता जीवन्मुक्ता दोषैर्विवर्जिताः ११ स्मृतिस्त्वगृहस्थस्य दोष
माहात्म्याकृतेः नत ब्रह्मविदो दोषं वक्तुमर्हति कंचन १२ १९ ॥

नीलकंठी टीका

ननु समासमाभ्यां विषमसमे पूजातः इति तुल्यश्रुतशीलाय ब्राह्मणाद्वयाय
विषमा पूजा प्रत्यवायकृत्वतः तथा अतुल्यश्रुतशीलाय ब्राह्मणाद्वयाय समा
पूजा प्रफलकृद्वत समाभोज्यान्नत्वं गौतमेन स्मर्यते तत्कथं ब्राह्मणादौ चंडालयोः
समदर्शित्वयुक्तमित्याशंक्याह इहैवेति येषां मनः सर्वभूतेषु साम्ये ब्र
ह्मभावे स्थितं निश्चलं तैरिहैव जीवद्भिरेव सर्गो जन्मजितो वशीकृतः हि य
स्मात् निर्दोषं समं सर्वत्रा विषमं ब्रह्मास्ति यथा दिव्यामय यो दैवतान्तस्यौ

योः स्वर्णादिकं साम्यं पश्यति पुत्रकलत्राकारटकतारतम्यं पश्यति त
द्वत् पुत्रास्तुतिर्भीतिकृततारतम्यविषया साम्यदृष्टिस्तत्तद्विषये
तिभावः यस्मादेवं ते साम्यं पश्यंति तस्मात् ब्रह्मणि आवैदेकरसे ते द्रष्टा
रः स्थितापकीभावेन समासिंगताः १९ ॥

आनंदीटीका

केचिदिमं श्लोकं षष्ठे ध्याये पठंति ...करेणात्वस्मिन्नध्याये द्वे च विहितम्
मे गच्छते चात्रैव तथाहि येषां महायोगिनां श्लोकार्थ यामहाविदेहाख्य
यां संयम महत्या विद्यया विनय संपन्न ब्राह्मणादिदेहे शुभनिजकर्मणां भोग
न लयणार्थं स्थितानां साम्ये तद्गुणदोषालेपाभावे मनः स्थितं तैर्योगि
भिरिहास्मिन्नेव जन्मनि सर्गश्चतुर्दशविधः सर्वभूतसर्गो जितः सूर्य
द्वारे संयमाद्भुवनज्ञानमिति योगसूत्रार्थावेत्तया महायोगसिद्ध्या प्रकाशा
वरणात्यात्संयमेन तत्र तत्र भुवनेते न ते न भूतेंद्रियादिसंघातात्मना दे
हेन कर्मणां भोगेन लयणात् जितांजितांनं तथा भूमिमाहरेन यथाऽऽ
मम् दोषान् व्यापितयामोहमाक्रांता भूवनिर्जितेति स्मरणात् सर्वाप
व भूमीरुलंघ्य परमां भूमिं कैवल्यं प्राप्ता इत्यर्थः अत्रोपपत्तिमाह हियस्मि
न्निर्दोषं निर्लेपं समं निर्विकारं ब्रह्मास्ति तस्मात्ते महायोगिनः प्रधानत
त्वया वजितम् मयो ब्रह्मणि स्थिताः सर्वासां भूमीनां जयादतः परं जे
तव्याभावात्स्वरूपं प्राप्ता इत्यर्थः संवैवैतत् अंतर्धानं स्मृतिः कांतिर्दृष्टि
श्रोत्रज्ञतातथा निजं शरीरमुत्सृज्य परकायप्रवेशनं अर्थानां छंदतः
सृष्टिर्योगसिद्धेस्तु लक्षणं इति याज्ञवल्क्यस्मृतौ विहितं अपराः कैर
णा विलीयंते अंतर्धानमदृश्यदेहत्वं तथाणिमाद्यष्टगुणप्राप्त्या एवैत
संभवंति तथाचात्र योगसूत्रम् कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे च
क्षुः प्रकाशासंयोगेंतर्धानमिति स्मृतिर्जन्मांतरानुभूतार्थविषया
सूत्रे चात्र संस्कारसाक्षात्करणात्पूर्वजातिपरिज्ञानमिति कांतिः कम
नीयत्वं सूत्रेनि च ततो णिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघा
तश्चेति दृष्टिरतीतानागतव्यवहितविप्रकृष्टार्थविषया श्रोत्रज्ञता
श्रोत्रेंद्रियसाक्षात्कारः अनेन चात्महतिरिक्तो अहंकारपंचतन्मात्रे

गी॰ कादशेंद्रियपंचभूतानां साक्षात्कारित्वमुक्तम् प्रागुक्तं सूत्रं च प्रवृत्त्यालो
टी॰ पं॰ कन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानमित्यस्यार्थः ज्योतिष्मती प्रवृत्ति
रुक्तामनसः तस्या य आलोकस्तेयोगेन सूक्ष्मे वा व्यवहिते वा विप्रकृष्टे
95 वार्थे विन्यस्य तं तमधिगच्छतीत्यादि निजस्वकीयशरीरं पूर्वकर्मारब्धम
स्तस्य परकायं प्रविश्य तदंतर्गततया तद्दुःखाद्युपभोक्तृत्वम् सूत्रं चात्र
भुवनज्ञानं सूर्ये संयमात् बंधकारणशैथिल्यात् प्रचारसंवेदनाच्च
चित्तस्य परशरीरावेश इति अर्थानां स्वेच्छया छेदनसृष्टिः अर्थानां
पृथिव्यादीनां स्पष्टव्यानां पदार्थानां छेदनं स्वातंत्र्येणोत्पादनमिति
योगसूत्रे च बहिरकल्पिता वृत्तिर्महाविदेहेति स्थूलस्वरूपसूक्ष्मान्वया
र्थवत्त्वसंयमाद्भूतजय इति तथा च प्रत्यभिज्ञाविमर्शिन्यामभिनवगु
प्तपादाः दृश्यंते च बहुशो योगिनः स्वदेहस्थदेहस्थिता एव स्ववशीकृ
तमायासमार्गयोगेन देहांतरेष्वपि वस्तुविज्ञानक्रियायोगिन इत्यादि स
र्वं चैतद्योगाभ्यासेन यथायोगं शिष्याणां तु हैः सद्यः सन्निवेशापि
तेलिवामः तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः समाधिभाव
नार्थः क्लेशतनूकरणार्थश्च तत्राध्यात्मिकादिदुःखसहिष्णुत्वं तपः
बाह्यनिमित्तनिरपेक्षं शारीरं मानसिकं च दुःखमाध्यात्मिकम् मनुष्य
पश्वादिभूतान्यपि कृत्योत्पन्नमाधिभौतिकं दैवप्रयुक्तं शीतातपादिरू
निमित्तमपि कृत्योत्पन्नमाधिदैविकं तदेतत्त्रिविधमपि दुःखं वैराग्येन भा
वेन नियमं कृत्वा सहमानस्य धर्माधर्मयोः संचयस्तत्क्षयकरणात्तपस्तु उच्य
ते ततो धर्मसंचयायोगप्रवृत्तिहेतवः श्रद्धायतिशयो भवति अधर्मतया
श्चाधिक्याशयानसंप्राप्यप्रमादालस्यादीनामंतरायाणामुपशमः त
तो नाकुलं चित्तं समाधीयते ननु दुःखेभ्यस्तपोभ्यः चित्तविक्षेप एव भ
वत्यतो न योगार्थिना तपः कर्तव्यं धर्माधर्मयोः संचयस्तयोश्च जपप्र
त्याहारादिभिः एव भवतः तपःसाधनत्वेन प्रमाणानामस्तीति नैतद
स्ति येऽशुन्मादकामादिभिरभ्रुतः सकथं जपप्रत्याहारादिकं कर्तुं श
क्नोत्यतः तेन तपः कर्तव्यम् यथा वस्त्रस्य स्थूलो मलः स्थूलोपायेन नि
वर्त्यते सूक्ष्मः सूक्ष्मोपायेनेति तथात्मनोपि स्थूलो मलः तावत्स्थूले

नोपायेन निवर्त्यते सूक्ष्मस्तूपघातात्तु स्वोपायेन तत्प्रत्याहारादिना नि
वर्त्यते इति प्रशान्तमंत्रस्येश्वरवाचिनो भ्यासः स्वाध्यायः तदुक्तसिद्धिहेतु
रूपोश्वरवाची मंत्रोस्तीति तत्रातिशयार्थं प्रशान्तग्रहणं परमात्मैक-
निष्ठेन भवितव्यमिति ज्ञापनार्थमीश्वरग्रहणं योगशास्त्राभ्यासो वा
स्वाध्याय इति परमेश्वरे तत्त्वस्य भक्त्यतिशयात्सर्वं येनानुचिंतनं पर्या-
लोचनमीश्वरप्रणिधानं स्तुतिजपपूजादिभिराराधनं वा सर्वक्रिया
णां परमगुरावर्पणं वा तद्वाचकस्य प्रणवस्य जपस्तदर्थभावनं चेति
सेयं तपःस्वाध्यायल तिमाक्रिया योगहेतुत्वाद्योग इत्युच्यते स च
क्रियायोगः सेव्यमानः समाधिं भावयति क्लेशांश्च तनूकरोति य
था च क्रियायोगः क्लेशतनूकरणहेतुस्तथा योगाङ्गान्यप्यतस्तान्यप्य
तियत्नेनानुष्ठीयानि कानि तानि योगाङ्गानि कियंति वेत्युच्य
ते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽ
ष्टावङ्गानि निर्वर्तकानीत्यर्थः समाधितः कोन्यो योगस्य समाधिरङ्ग
मिति चेत्समाधिरेवाल्पप्रकर्षोपेतो योगस्य पूर्वः समाधिरङ्गमनु
त्कृष्टस्याप्यस्य पूर्ववदस्य वा सर्वोपि समाधिप्रकर्षः पूर्वसमा
धिजन्यत्वेन योग उत्तरप्रकर्षजनकत्वेनाङ्गमिति यदि समाधितः
एव समाधिर्भवति तत्रैकमेवाङ्गमस्तु ततोष्टावङ्गानीति न वाच्यं
पूर्वपूर्वासिद्धावुत्तरोत्तरासिद्धिः नह्ययमासिद्धौ नियमाः सिद्ध्यंति
नियमासिद्धौ चासनं न सिद्ध्यति आसनासिद्धौ च प्राणायामो न सि
द्ध्यति प्राणायामासिद्धौ च प्रत्याहारो न सिद्ध्यति प्रत्याहारासिद्धौ च
धारणा न सिद्ध्यति धारणासिद्धौ च ध्यानं न सिद्ध्यति ध्यानासिद्धौ च
समाधिर्न सिद्ध्यति ततोष्टानामपि योगाङ्गत्वमिति तत्र देशकाला
वस्थाभिरनियताः शुक्लस्य शुद्धिहेतवो यमाः शुद्धिरधर्मक्षा
योऽहिंसाधर्मोपचयः अथवा शुद्धिश्चित्तवैमल्यं शुद्धियोगोत्कर्षः त
द्धेतवो देशादिभिरनियताः सर्वस्मिन्देशेनुष्ठीयंते सर्वस्मिन्काले सर्व
स्यामवस्थायां ते यमाः अहिंसादयः ननु हिंसादयोपि केचिद्देशा
दिनियमेनानुष्ठीयंते यथा तीर्थे हिंसां न करिष्यामि पर्वदिवसे वा

गी॰
टी॰ पं॰

96

यद्वावस्थायां वा प्राणिवधं न करिष्यामि इति न देशाद्यपेक्षित्वेहिंसादी
नामपि नियमत्वात् अत एव ब्रह्मस्यादेः परमार्थेतायमानसंति यमेन
पेक्षायतिरिच्यते यमाभावे कथं ब्रह्मस्यादेर्नियमनिष्पत्तिरिति चेन्न प्र
वर्तकथमनिष्पादकनियमनिष्पत्तेर्व विरोधान्निवर्तको हि यमो नियमस्त
हेतवो नियमा अष्ट नियमस्य तन्निष्पद्यते इति देशकालावस्थापेक्षिताः
पुण्यहेतवः क्रियाविशेषा नियमाः तत्र देशापेक्षिता देवतायतने कालाः
पेक्षितसन्ध्योपासने जपक्रियादवस्थामात्रमपेक्षते प्रणवातिशयं च
देशाद्यपेक्षितत्वमप्यन्त्यं नतं शिवसन्निधावित्यादिश्रवणात् एवमन्येपि
क्रियाविशेषा देशाद्यपेक्षितत्वेन नियमा इति पातंजलाभिप्रायमात्रनिरु
ति लक्षणा यमाः प्रवृत्ति नियमा इति यमनियमलक्षणं द्रष्टव्यम् ना
यावोक्तम् अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा यमाः शौचसंतोष
तपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति योगकर्मविरोधिनः
क्लेशाद्यपायः तेषां आसनजयाज्जयः श्रूयते करणान्यशरीरावय
वाः पादादयस्तेषां वन्यस्ये यमाः प्राणायामादिसिद्ध्यर्थं स्तदासने
स्थिरंसुखेनोपवेशनमित्यर्थः तच्च पद्मकस्वस्तिकाद्यनेकप्रकारं को
ष्ठस्य वायोः श्वासप्रश्वासलक्षणस्य गतिविच्छेदः प्राणायामः प्रच्छने
निवाते निर्जने निश्छिद्रे च प्रदेशे यथा स्वरं मात्रमने चद्वारे रेचकपूरककुं
भकप्रकारः कर्तव्यः स च शनैः शनैर्जेतव्यो वनगजेन्द्रवत् यथा वन
गजेन्द्रः प्रयोगेन शनैः शनैर्जीयमानो महान्तमुपकारं करोति हठा
दिप्रयोगेन तु हीनस्य विनाशमेव करोति तथा वायुः प्रयोगेन शनैः
शनैर्जीयमानो दोषमपमेरागादिमलं च निर्मापयोगं प्रापयति अप्र
योगेनातिक्रम्य वा गृहीतस्य वातगुल्माद्यनर्थमेव करोतीति समाधि
प्रत्यनीकार्थेभ्यः समन्तात् स्वेन स्वेनावावर्तने प्रत्याहारः प्रत्याह्रियन्ते चेतसि
इंद्रियाण्यपि प्रत्याहृतानि भवंति कस्मात् तन्मूलत्वादिंद्रियाणां प्रहृतेः
प्रत्याहाराभियुक्तस्येंद्रियजयः समाधिलाभश्च भवति नान्यथेति दे
शावन्यस्थितस्य धारणा कोऽसौ देशः कस्य देशे चित्तस्य बन्ध इति शरीराव
यवाः पादादि नाड्यो वा सूर्यमंडलादिर्देशः इत्येके वयं तु ब्रूमः परमा

स्मिन्वात्र देशोऽभिप्रेतस्तदाराधनत्वान्मोक्षार्थिनः धारणादिषु धारणानोहि
विष्णुलोकादिप्राप्तिः फलं श्रूयते चित्तस्य मननमः प्रयत्नेन धारणा निश्च
लीकरणं बन्धस्तूच्यते धारणेति सा तत्र प्रत्ययैकतानता ध्यानं तस्मिन्धा
रणादेशे ध्येयावलंबनस्य प्रत्ययस्य सदृशः प्रवाहः प्रत्ययांतरेणापरा
मृष्टः ध्यानम् तत्रैकतानतात्युक्तेः चित्तस्य तन्वृत्तेः चित्तस्यैकतान
तेति गम्यते मननस्य सदृशप्रवाहकर्तृत्वमेवैकतानतेति तदेवार्थमा
त्रनिर्भासं स्वरूपशून्यमिव समाधिरिति ध्यानमेव ध्येयाकारमात्रनिर्भा
सं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति संसर्गात्स्फटिकवत्
इदं ध्येयमहं ध्यायामीति भेदेन शून्यं भवति तदा समाधिरित्युच्यते य
दा ध्यानेऽनेकधी निर्वाताचलप्रदीपावस्थानमिवैकत्रैव चेतसोऽवस्थानं
समाधिरभिधीयते स च प्रज्ञालोकविकः समाध्युत्कर्षतारतम्यादिप्र
ज्ञालोकतारतम्यं भवति तथा पातंजलसूत्राणि तृतीयपादे त्रयमेक
त्र संयमः तदेतद्धारणाध्यानसमाधित्रयमेकविषयंयोगस्थापनेयम
स्तूच्यते तज्जयात्प्रज्ञालोकः तस्य संयमस्य जयात्समाधिप्रज्ञायाभवा
स्यालोकः यथा यथा संयमः स्थिरपदो भवति तथा तथा समाधिप्रज्ञा
विशदीभवति तस्य भूमिषु विनियोगः तस्य संयमस्य जितभूमेर्याऽनंत
रा भूमिस्तत्र विनियोगः तत्र जिताधारभूमिरनंतरां भूमिकामलंघ्य प्रांत
भूमिषु संयमं लभते तदभावेऽन्ततः प्रज्ञालोकः जितोत्तरभूमिकस्य च
नाधारभूमिषु परचित्तज्ञानादिषु संयमो युक्तः त्रयमंतरंगं पूर्वेभ्यः पूर्वे
भ्यः संयमादिभ्यः पंचभ्यः धारणात्रयमंतरंगं तदपि बहिरंगं निर्बीजस्य
तदभावेभावात् लक्षितोहि प्रथमेपादे निर्बीजसमाधिर्यथा समाधि
प्रज्ञाप्रतिलंभे योगिनः प्रज्ञाकृतसंस्कारेण च नवो जायते तस्यापिनि
रोधे सर्वनिरोधान्निर्बीजसमाधिरिति संस्कारसाक्षात्करणात्पूर्वजाति
ज्ञानं इह द्विरूपाः खल्वमी संस्काराः वासनारूपाः स्मृतिक्लेशहेतवः धर्मा
धर्मरूपाः कर्मविपाकहेतवः तेषु संयमः संस्कारसाक्षात्क्रियायै समर्थः
तदित्थं संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् परत्राप्येवमेव संस्कारसा
क्षात्करणात्परजातिसंवेदनं जन्मकारणाशेषशिल्पानप्रवाहसंवेदनाश्चचित्त

गी· टी·पं·
97

स्यपरशरीरावेशः लोलीभूतस्यमनसोप्रतिष्ठस्यशरीरेकर्माशयवशाद्बन्धः
तस्यकर्मणोबंधकारणस्यशैथिल्यंसमाधिवलाद्भवति प्रचारसंवेदनंचचि
त्तस्यसमाधिजमेव कर्मबंधक्षयात्स्वचित्तसंचारसंवेदनाच्चयोगीचित्तंस्वश
रीरान्निष्कृष्यशरीरांतरेषुनिक्षिपतिनिक्षिप्तंचित्तंचेंद्रियाण्यनुपतंति यथा
मधुकरराजंमक्षिकाउत्पतंतमनूत्पतंति निविशमानमनुविविशंते तथेंद्रि
याणिपरशरीरावेशेचित्तमनुविशन्तीति उदानजयाज्जलपंककंटका
दिष्वसंगउत्क्रांतिश्च समानजयाज्ज्वलनम् श्रोत्राकाशयोःसंबन्धा
संयमाद्दिव्यंश्रोत्रम् कायाकाशयोःसंबंधसंयमाल्लघुतूलसमापत्तेश्चा
काशगमनं बहिरकल्पितावृत्तिर्महाविदेहा शरीराद्बहिःमनसोवृत्तिला
भोविदेहानाममहावृत्तिधारणा साचदिशरीरप्रतिष्ठितस्यमनसोवहिर्वृत्ति
मात्रेणभवतिसाकल्पितेत्युच्यते यातुशरीरनिरपेक्षावहिर्भूतस्यैवमनसः
सोवहिर्वृत्तिःसाह्यकल्पिता तत्रकल्पितयासाधयंत्यकल्पितांमहा
विदेहामिति ययापरशरीराण्याविशंतियोगिनः ततस्तस्याधारणातः प्र
काशात्मनोवुद्धिसत्वस्ययदावरणंक्लेशकर्मविपाकत्रयंरजस्तमोमूलं
तस्यक्षयोभवति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसंयमाद्भूतजयः भूता
नांस्थूलादिषुपंचसुरूपेषुसंयमात्कृतस्यतस्यस्वरूपदर्शनेजयश्चप्रादुर्भव
ति तज्जयाद्वत्सानुसारिण्यइवगावोऽस्यसंकल्पानुविधायिन्योभूतप्र
कृतयोभवंति ततोणिमादिप्रादुर्भावःकायसंपत्तद्धर्मानभिघातश्च
अणिमादयःप्रसिद्धाः रूपलावण्यवलवज्रसंहननानिकायसंपत् प
कटाबद्धशरीरस्यद्वरांवेष्येकेतद्धर्मानभिघातः पृथिवीमूर्त्यानरुण
द्धियोगिनःशरीरादिक्रियाम् शिलामप्यनुविशति नापःक्लेदयंति ।
नाग्निर्दहति नवायुर्नीरयति परिणामीवहतिच अनावरणात्मकेऽ
प्याकाशेभवत्यावृत्तकायःसिद्धानामप्यदृश्योभवति ग्रहणस्वरूपा
स्मितान्वयार्थवत्वसंयमादिंद्रियजयः ततोमनोजवित्वंविकरणभा
वःप्रधानजयश्च कायस्यानुत्तमोगतिलाभोमनोजवित्वं विकरणंवि
कारप्राप्तिः तदभावःविकरणभावः विदेहानामिन्द्रियाणामभिप्रे
तदेशकालविषयापेक्षोवृत्तिलाभः सर्वप्रकृतिविकारवशित्वंप्रधा

नज्जयः इत्येतास्तिस्रः सिद्धयो मधुप्रतीका उच्यंते एताश्च करणानुरू
पंचकजयादपि गम्यंते स्मृतं चैतद्धि स्तत्र मार्कंडेये संवादे पयो
गिकिं विलिख्यते श्रूयं योगी यताहारः प्राणायामपरायणः जितांश
नैः शनैर्भूमिमारुहेत यथा गृहं आहारादिभ्यो निवृत्तानि यदक्षाणि यता
त्मभिः प्रत्याह्रियते योगेन प्रत्याहारस्ततः स्मृतः योगयुक्तः सदा यो
गी लघ्वाहारो जितेंद्रियः सूक्ष्मास्तु धारणाः सप्त भूराद्या मूर्ध्नि धारयेत् ।
धरित्रीं धारयेद्योगी योगी सौक्ष्म्यं प्रपद्यते आत्मानं मन्यते तद्वत्तद्गंधं च प्र
जहाति सः तथैवाप्सु रसं सूक्ष्मं तद्वद्रूपं च तेजसि स्पर्शं वायौ तथा त
द्वद्बिभ्रतस्तस्य धारणाम् व्योम्नः सूक्ष्मप्रवृत्तं च शब्दं तद्वज्जहाति सः म
नसा सर्वभूतानां मन आविशते यदि मानसीं धारणां विभ्रन्मनः सौक्ष्म्ये
जहाति सः तद्वद्बुद्धिमशेषाणां सत्त्वानामेत्य योगवित् परित्यजति सं
प्राप्य बुद्धिसौक्ष्म्यमनुत्तमम् एतासां धारणानां तु सप्तानां सौक्ष्म्यमात्म
वान् दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परां भजेत् एतास्वेव च संधाया
समस्तस्थानां पार्थिव भूतादीनां वशीभावः संभाव्यस्य जायते इति । दू१
विस्तृतेनेव प्राणायामेन सवनैः प्रत्याहारेण चेंद्रियैः वशीकृतैस्त
तः कुर्यात्स्थितं चेतः शुभाश्रये तद्रूपप्रत्ययैकसंततिः मान्यनिस्पृ
हा तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते नृप अयमर्थः ब्रह्मरूपप्रत्ययात्
मिकासंततिः प्रवाहः सा विषयांतरास्पृष्टा सती ध्यानमित्युच्यते तथा
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् मनसा ध्याननिष्पाद्यं समा
धिः सोऽभिधीयते इति अयमर्थः कल्पनाहीनं ध्येयध्यानध्यातृभेदशून्य
मिति मुक्ताविव स्वयंप्रकाशो ब्रह्मीभावः शरीरपातोत्तरकालावसुक्ते
रित्यतोवावयाक्रम्यते [illegible] ॥ १९ ॥

रामकंठी टीका अयं श्लोकः अस्यां टीकायां षष्ठाध्याये दृष्टः

उपक्रमम् ॥ १९ ॥

लासिदी वमदणी टीका

नैर्वन्दनीयचरणैः समदर्शिभिः जीवन्मुक्तैर्विदेहैर्वा जीवद्दशायामेव स

गी॰ र्गः संसारो जन्मापरपर्यायैर्जितो तिक्रांतः देहपातादूर्ध्वमतिक्रमि
टी॰पं॰ तव्य इति किमुवक्तव्यम् कैर्येषांसाम्ये ब्रह्मणः समभावे मनोमनना
त्मकमंतःकरणंस्थितंनिश्चलीभूतं तद्धेतुः हि यस्मात् ब्रह्म सर्वत्र स
98 मं निर्दोषं उपाधिदोषरहितंच तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिता ब्र
ह्मभावं प्राप्ता इत्यर्थः गौतमोक्तस्तु दोषो ब्रह्मणामेः एवमेव पूज्जत इति
पूजकावस्थाश्रवणात् यतो हमोश्च हीयत इत्युपसंहारा...
...मांसाधारणगोमात् १९ ॥

पंचोलीटीका

ननु श्रभोज्यान्नास्ते दोषवंतः समासमाभ्यां विषमसमे पूजिता
इति स्मृतेरित्याशंक्याह इहैवेति येषां पंडितानां मनः सर्वेषु भूते
षु ब्रह्मणः समभावेन निश्चलीभूतं तैः इहैव अस्मिन्नेव शरीरे सर्गो
जन्म जितः वशीकृतः हि यस्मात् समयकं निर्दोषं श्वपाकादिवर्त
मानमपि न दोषरहितं तस्मात्समं ब्रह्म पश्यंतः ब्रह्मणि स्थिताः
संसारदोषास्तान्नस्पृशंतीत्यर्थः १९ ॥

रणवीरसमिद्धोयिनी ॥

इहैवेति येषांसाम्य उक्तलक्षणे समदर्शित्वे मनः स्थितं तैः इमि
तिदेहवभूमावेव अस्मिन्नेव पुरे सर्गः स्वर्गदर्पावियोभूतग्रामो जितः
इदमपुक्तिस्वभाविजयस्याव प्रपंभावित्वप्रतिपादनार्था स्थितः
ब्रह्मधनुर्वेदोक्तो युद्धादिव्यापारः समं साम्येनावर्तितं निर्दोषं दो
षोत्पादकं न भवतीति तस्मात्ते समदर्शिनो ब्रह्मणि धनुर्वेदप्रति
पाद्ये युद्धे स्थिता इति १९ ॥

मध्वभाष्य

इहैवेति संन्यासयोगज्ञानानि मिलित्वा प्रपंच इत्यध्यायशेषे
ण पुनर्योगस्याधिकं स्पष्टयति १९ ॥

भाषा अनुवाद

यह सुनि जो सन्देह होय कि विषम मे सम दृष्टि होना ही निषिद्ध है फेरि सब मेसम दृष्टि मनुष्य पण्डित कैसे से श्री गौतम ने कहा हैं कि विषम मे सम पूजन श्रौ सम मेविषम पूजन करने वाले लोक पर लोक से भ्रष्ट होते हैं इस सङ्का को निवारण करते कहते हैं कि जिन का मन समभाव मे स्थित है उनोने इहांई स्वर्ग जय करलिया है क्यों कि सर्वत्र समान रूप निर्दोष ब्रह्म परिपूर्ण होरहा है ऐसा जो जानते ते ब्रह्म मे स्थित करे ब्रह्मरूप निर्दोष हैं और गौतम की बात ज्ञान अवस्था के पहले की है १९

दोहा

इहांहिं जीत्योभवतिन्हे समतास्थितमन जास। ह्यसमानब्र
ह्मदोष विनसो तातें ब्रह्म वास ॥१९॥

नप्रहृष्येत्प्रियंप्राप्य नोद्विजेत्प्राप्यचाप्रियं
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणिस्थितः २०

शांकरभाष्यं

कर्म्मिविषयं च समासममाभ्यामित्यादि इदन्तु सर्वकर्मसंन्यासि
विषयं प्रस्तुतं सर्वकर्माणि मनसेत्यारभ्याध्यायपरिसमाप्तेः यस्मान्नि
र्दोषं समं ब्रह्मात्मा तस्मात् नेति नप्रहृष्येत् प्रहर्षं कुर्यात् प्रियमिष्टं प्राप्य
लब्ध्वा नोद्विजेत प्राप्य चाप्रियमनिष्टं लब्ध्वा देहमात्रात्मदर्शिनो हि प्रियाप्रि
यप्राप्ती हर्षविषादौ कुर्वाते न केवलात्मदर्शिनः तस्य प्रियाप्रियप्राप्त्यसंभ
वात् किंच सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्विचिकित्सा बुद्धि
र्यस्य स स्थिरबुद्धिरसंमूढः संमोहवर्जितश्च स्यात् यथोक्तब्रह्मवित् ब्रह्मणि
स्थितोऽकर्मकृत् सर्वकर्मसंन्यासीत्यर्थः २०॥

आनंदगिरिकृतटीका

इतश्चानेदं सूत्रं ब्रह्मविद्विषयमित्याह कर्म्मीति तत्रैवस्वज्ञानापरिभवसंभवा
दित्यर्थः ननु यत्र समत्वदर्शनं तत्रैवमिदं सूत्रं न तु कर्मिण्यकर्मिणि वेतिवि
भागोस्ति तत्राह इदं त्विति समत्वदर्शनस्य संन्यासिविषयत्वेन प्रस्तुतत्वे
हेतुमाह सर्वकर्माणीति अध्यायपरिसमाप्तेः सर्वकर्माणीत्यारभ्य त
त्रतत्र सर्वकर्मसंन्यासाभिधानात्तद्विषयमिदं समत्वदर्शनं गम्यते तत्रच
निरहंकारे निरवकाशं सूत्रमित्यर्थः ननु इष्टानिष्टप्राप्तिभ्यां हर्षविषादौ
विद्वानपि कुर्वन्निर्दोषे ब्रह्मणि कथं स्थितिं लभेतेत्याशंक्याकांक्षितं प्रश्य
नुत्तरश्लोकमवतारयति यस्मादिति आत्मज्ञाननिष्ठावतो विदुषो हर्षवि
षादनिमित्ताभावान्न तावुचितावित्याह स्थिरबुद्धिरिति नच हर्षविषादनिमि
मित्तत्वं प्रियाप्रिययोः सिद्धमिति कथं तत्राह हर्षोद्वेगौ न कर्तव्याविति
निषिध्यते तत्राह देहेति विदुषोपि प्रियाप्रियप्राप्तिसामर्थ्यादेव हर्षविषा
दौ कुर्वाताविल्याशंक्याह नकेवलेति अद्वितीयदर्शनशीलस्य व्यतिरिक्तप्रि
याप्रियप्राप्त्ययोगात्र तन्निमित्तौ हर्षविषादावित्यर्थः. द्वतोपि विदुषो हर्षा.

विषादावसंभावितावित्याह किंचेति निर्दोषंब्रह्मणिप्राशुक्ते इत्थंभूत
पतिः संमोहेन हर्षादिहेतुनारहितो यथोक्ते सर्वदोषरहिते ब्रह्मण्यहम
स्मीति विद्यावानशेषदोषशून्ये तस्मिन्नेव ब्रह्मणि स्थितस्तदनुरोधात् क
र्म्माण्यमन्यमानो नैवहर्षविषादभागी भवितुमलमित्यर्थः २० ॥

स्वामिकृतटीका

ब्रह्मप्राप्तस्यलक्षणमाह नप्रहृष्येदिति योब्रह्मविद्भूत्वाब्रह्मण्येवस्थितः यः
नप्रहृष्येद्द्विवान्यत् सप्रियंप्राप्यनप्रहृष्यति अप्रियंप्राप्यचनोद्विजेत् नचविषीदतीत्यर्थः ।
यतःस्थिरबुद्धिः स्थिरानिश्चलाबुद्धिर्यस्यतत्कुतः यतः असंमूढः निवृत्तमोहः २०

पिशाचभाष्यं

यस्मादेवंसमंब्रह्मात्मातस्मात् नप्रहृष्येद्धर्षंनकुर्यात् प्रियमभीष्टं
प्राप्य नोद्विजेत्प्राप्यचाप्रियमनिष्टंलब्ध्वादेहमात्रात्मदर्शिनोहिप्रियाप्रि
यत्वप्राप्तीहर्षविषादौकुर्वाते नकेवलात्मदर्शिनस्तस्यप्रियाप्रियप्राप्ती
संभवतः किंचसर्वभूतेष्वेकः समोनिर्दोषआत्मेतिस्थिरानिर्विचिकित्सा
बुद्धिर्यस्यसःस्थिरबुद्धिरसंमूढः संमोहवर्जितश्चस्याद्यथोक्तब्रह्मणिस्थि
तः अकर्मकृत्सर्वकर्मसंन्यासीत्यर्थः २० ॥

रामानुजभाष्यं

येनप्रकारेणावस्थितस्यकर्मयोगिनः समदर्शनरूपोज्ञानविपाकोभवति
तंप्रकारमुपदिशति नप्रहृष्येदिति यादृशदेहस्थस्ययदवस्थस्यप्राचीनकर्म
वासनया प्रियत्वंयस्माप्रियत्वंतदुभयंप्राप्यहर्षोद्वेगौनकुर्यात् कथंस्थिरा
आत्मनिबुद्धिर्यस्यसस्थिरबुद्धिः असंमूढः अस्थिरेणशरीरेणस्थिरमात्मान
मेकीकृत्यसंमोहेनप्राप्तः तच्चकथं ब्रह्मविद्ब्रह्मणिस्थितः उपदेशेनब्र
ह्मवित्सन्तस्मिन्ब्रह्मण्यभ्यासयुक्तः एतदुक्तंभवतितत्त्वविदामुपदेशादात्म
याथात्म्यविन्नैवयतमानोदेहाभिमानंपरित्यज्यस्थिररूपात्मावलोकनप्रि
यानुभवेव्यवस्थितः अस्थिरेणप्रकृतप्रियाप्रियेप्राप्यहर्षोद्वेगौनकुर्यादिति २०

अभिनवगुप्तकृतटीका

तस्यचैवंसंभावनेत्याह २० नप्रहृष्येद्प्रियंप्राप्यनोद्विजेत्प्राप्यचाप्रियं

इति एतस्य समदर्शिन शत्रुमित्रादिविभागोपिव्यवहारमात्रएवनांतर्ब्रह्मनिष्ठ

स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः २० ॥

परमार्थप्रपा टीका

अथ ब्रह्मणि स्थिरीभूतस्य परीक्षामाह नप्रहृष्येदिति सएव ब्रह्मवित्
सन् ब्रह्मणि स्थितः यः प्रियं प्राप्य न प्रहृष्येत् तथा अप्रियं प्राप्य नउद्विजेत्
उद्वेगं न प्राप्नुयात् अतएव स्थिरबुद्धिरसंमूढः प्रियत्वाप्रियत्वरहितः २०

वनमालीटीका

अतः परमध्यायशेषेण योगसंन्यासज्ञानानि मेलयित्वा प्रपंचयति त
त्रादौ सं[illegible]न्यासं प्रपंचयति नप्रहृष्येदिति आत्माभिन्नं प्रियं प्राप्य न प्रहृष्ये
त् अप्रियं च प्राप्य नोद्विजेत् परमानंदस्वरूपे ब्रह्मणि निमग्नचित्तत्वात् ज्ञा
तात्मतत्वस्यात्मव्यतिरिक्तप्रियाप्रियप्राप्त्ययोगात् तन्निमित्तौ हर्षविषा
दावित्यर्थः कीदृशः स्थिरबुद्धिः स्थिरा निश्चला संन्यासपूर्वकवेदांतवि
चार[illegible]तिपाके [illegible]संशयत्वेनैकरूपनिश्चयरूपा ब्रह्मणि बुद्धिर्यस्य सः श्रव
णमनननिदिध्यासनादिफलप्राप्तेंशागितियावत् असंमूढः निदिध्यास
नेन विजातीयप्रत्ययानंतरितसजातीयप्रत्ययानंतरितसजातीयप्रत्यय
प्रवाहरूपेणाविपरीतभावनाख्यसंमोहरहितः ततः प्रतिबंधापगमा
ज्ज्ञातेश्वरावांतरप्रसादात् ब्रह्मवित् अनंतगुणालयपरमेश्वरसाक्षात्
कारवान् यथा प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगा[illegible]दिति प्र
सादस्य ज्ञानहेतुत्वं वक्ष्यति ततो महाप्रसादप्राप्तः आविर्भूतमहदानंदा
दिगुणाके ब्रह्मणि स्वस्वरूपे स्थितः परंज्योतिरूपं संपद्य स्वेन रूपेणा
घ भिनिष्पद्यत इति श्रुतेः जीवन्मुक्तस्य देहाभाविकं ममलक्षणमसदर्शी
नादिप्रहर्षादिकं न्याज्यमिति भावः २० ॥

कृष्णमैवेजयन्तीटीका

आत्मसमदर्शनरूपज्ञानपरिपाके स्थितस्य कर्मयोगिनो लक्षणमाह
नप्रहृष्येदिति प्राकृते नित्ये देवमनुष्यादिरूपे वर्तमाने देहे स्थितं सत्व
र्वकर्मवशात् प्रियं प्राकृतं पुत्रमित्रादिरूपं वस्त्रालंकारमिष्टभोजना
दिरूपं वा स्वस्वाकाले प्राप्य न प्रहृष्येत् हर्षं न प्राप्नुयात् तथा अप्रियं च शत्रु

गी॰ व्याघ्रादिरूपं स्वप्रतिकूलं प्राप्य नोद्विजेत् उद्वेगं न प्राप्नुयात् कथमेवं य
टी॰ पं तः स्थिरबुद्धिः स्वात्मनि स्थिरा यथार्थनिश्चयेनाचपला बुद्धिर्यस्य सायात्मिकाय
स्मसतयास्थिरबुद्धितात्मानादिकर्मप्रयुक्तं प्रियमप्रियं च प्राप्यापि हर्षद्वेषौ
न कुर्यादित्यर्थः एवमपि कथं यतोऽसंमूढः मोहरहितः प्राकृतेनात्मनो देहे
10 नमहमिति त्मात्मानमेकीकृत्य मोहेन लब्ध इत्यर्थः नैवं कथं यतो ब्रह्मवि
श्रि॰ द्यात्मयाथात्म्यस्वरूपज्ञः यतो ब्रह्मणि स्थितस्तस्मिन्नेव ब्रह्मण्यात्मसामान्यरूपे स्थि
तस्मात् संप्रदायसदाचार्योपदेशाद्ब्रह्मविद्भवति ततस्तदुपदिष्टस्वात्मयाथा
त्म्यस्वरूपे ब्रह्मण्येवावस्थित इत्यर्थः २० ॥

मधुसूदनी टीका

यस्मान्निर्दोषं समं ब्रह्म तस्माद्ब्रह्मरूपमात्मानं

साक्षात्कुर्वन् — ङः खेष्वनुद्विग्नमनाः सुखेषु विगतस्पृह इत्यत्र व्याख्यातोऽर्थोऽयं जीवन्मु
क्तानां स्वाभाविकं चरितमेव मुमुक्षुभिः प्रयत्नपूर्वमनुष्ठेयमिति वदितुं का॰
लिङ्प्रत्ययौ अद्वितीयात्मदर्शनशीलस्य व्यतिरिक्तप्रियाप्राप्त्ययोगान्न प्रिय
निमित्तौ हर्षविषादावित्यर्थः अद्वितीयात्मदर्शनमेव विवृणोति स्थिरबु
द्धिः स्थिरा निश्चला संशयरहिता सर्ववेदान्तवाक्यविचारपरिपाकेन सर्वसंशय
शून्यत्वेन निर्विचिकित्सा निश्चिता ब्रह्मणि बुद्धिर्यस्य स तथा लब्धश्रवणम
ननफल इति यावत् एतादृशस्य सर्वासंभावनाशून्यत्वेपि विपरीतभाव
नाप्रतिबंधात् साक्षात्कारो नोदेतीति निदिध्यासनमाह असंमूढः निदि
ध्यासनस्य विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहस्य परिपाके
न विपरीतभावनाख्यसंमोहरहितः ततः सर्वप्रतिबंधापगमाद्ब्रह्मविद्ब्र
ह्मसाक्षात्कारवान् ततश्च समाधिपरिपाकेन निर्दोषे समे ब्रह्मण्येवा
स्थितो नान्यत्रेति ब्रह्मणि स्थितो जीवन्मुक्तः स्थितप्रज्ञ इत्यर्थः एतादृश
स्य द्वैतदर्शनाभावात् प्रहर्षोद्वेगौ न भवत इत्युचितमेव साधकेन तु द्वैत
दर्शने विद्यमानेपि विषयदोषदर्शनादिना प्रहर्षविषादौ त्याज्याविति भि
प्रायः २० [illegible]
[illegible]
[illegible]
[illegible]

[illegible] ॥

सदानंदी टीका

स्वाभाविके हि विरति जीवन्मुक्तशरीरिणां समत्वभिरन्वेष्टयमिति व
क्ति हर्षे लिङ्गा १ अद्वैतदर्शिनोभिन्नप्रियादिप्राप्तयोगतः नास्य हर्ष
विषादौ तद्धितकौ भवतः क्वचित् २ स्थिरा वेदान्तवाक्योत्था बुद्धिर्ब्रह्म
णि यस्य सः असंमोहशून्यो ब्रह्मावबोधवान् ३ ब्रह्म
ण्येव स्थितो नित्यं समाधिपरिपाकतः ४ २० ॥

नीलकंठी टीका

न प्रहृष्येदिति यस्मान्निर्दोषं समं ब्रह्म तस्मात्प्रियं पुत्रादिं प्राप्य न
प्रहृष्येत् अप्रियं शत्रुं दुःखं वा प्राप्य नोद्विजेत् बुद्धिस्थितिरवद्वेनानुष्ठेये
ति ज्ञापयितुमुभयत्र लिङ्प्रयोगः स्थिरबुद्धिः प्रत्यागैहेतिश्रुतियुक्ति
भ्यां स्थिरीकृतप्रज्ञः असंमूढो ध्यानजमालाकारेण निर्गतमोहः अ
त एव ब्रह्मवित् ब्रह्मभावस्य लब्धा ब्रह्मभावं गत इत्यर्थः ब्रह्मण्येव अ
त्यगाह्वये सुप्त्यानावस्थायामपि स्थितः सर्वं ब्रह्मत्येव पश्यन्नित्यर्थः २०

ब्रह्मस्थितानां लक्षणमुपसं
आनन्दी टीका

हरति – प्रोक्तयुक्त्या ब्रह्मणि स्थितः ब्रह्मवित्सम्यग्भिज्ञातात्मस्वस्वरूपः असंमू
ढो विगतमिथ्याज्ञानः स्थिरा कर्मोपभोगलयीकृता या बुद्धिर्यस्य
प्रियं बालकादिदेहं प्राप्य न प्रहृष्येत् अप्रियं श्वपाकादिदेहं च प्राप्य नो
द्विजेत् अथ च मात्रास्पर्शास्तु कौंतेय शीतोष्णादिप्रमात्रास्पर्शसहनस्यल
क्षणी यस्मात्तु गमेस्यस्य [illegible] पवार्थः २० ॥

रामकंठी टीका

यो ब्रह्मविदागमतो यथोक्तब्रह्मतत्त्ववेदी स्थिरतत्त्वबुद्धिः प्रबलैरपि
विकल्पैरप्रकम्प्यमतिरत एवासंमूढो हेयोपादेयवस्तुनोरसत्त्वनि
र्णयबुद्धिः संन्यासिनां ब्रह्मासाधिगते ब्रह्मणि परमात्मनि स्थितः सतता
परिशीलनाद्धिष्णातः सप्रियाप्रियप्राप्त्या प्रहर्षोद्वेगौ विषमदर्शिना
त्वपिस्थितो संसारिणुकस्ताविति नो न भजते ततो ब्रह्मणा गवादिषु पंडिता :

गी॰
टी॰ पं॰

समदर्शिनः इत्युक्तम् ईदृशी च ब्रह्मणि स्थितिः सर्वथा ह्यात्मविषय
परिहारेणैव भवतीति केवलज्ञानवादिनां पुनः सहवीक्षोपपत्त्यान
संभवति कथंचिद्वासंभवन्नपि सत्त्कलइति [illegible]
[illegible] २०

102

अथब्रह्मभावेशामस्यलक्ष लाभिसेती [illegible] टीका

एमाह — योह्यागमतोगुरूपदेशतोवाब्रह्मविद्ब्रह्मतत्त्ववेदी स्थिरबुद्धिःस्थि
राविकल्पैरविकल्पाबुद्धिर्ब्रह्मबुद्धिर्यस्यसः असंमूढःचेतनःसब्र
ह्मणिस्थितः सततपरिशीलनाद्ब्रह्मण्येवविश्रांतः एवंविधोब्रह्म
वित्प्रियंप्राप्यनहृष्यति अप्रियंप्राप्यनविषीदति स्वभमस्यशरीभूत
स्यापि प्रियाप्रियप्राप्त्याहर्षविषादराहित्यम् तद्यात्मतयैवकमसंमू
ढइति [illegible] २०॥

पैचोलीटीका

ब्रह्मणःसमस्यलक्षणमाह ब्रह्मणिस्थितासर्वकर्मसंन्यासीसा
मबुद्धिःस्थिराबुद्धिर्यस्यसः असंमूढः मोहवर्जितः प्रियंप्राप्यन
प्रहृष्येतचपुनः अप्रियंप्राप्यनोद्विजेत २०॥

ममावीरसमिद्बोधिनी॥

नप्रहृष्येदिति ब्रह्मविद्ब्रह्मवेदनवनोब्रह्मणिनत्स्मतिपायेषुद्दे
स्थितःसन् प्रियंप्रीतिपात्रंपुत्रमित्रादिकंप्राप्यनप्रहृष्येत् आद्रि
चितोनभवेत् अप्रियंद्वेष्यंचप्राप्यनप्रहृष्येत् आद्रिचितोनभवेत्
अप्रियंद्वेष्यंचप्राप्यनोद्विजेत् उद्वेगंभयसंचलनंचनेयात् यतः
स्थिरबुद्धिर्दृढनिश्चयोतएवासंमूढोनलसः कियावान्नित्यर्थः
२०॥

मधमाष्य

२०॥

भाषा अनुवाद

अब ब्रह्म भाव प्राप्त पुरुष का लक्षण कहते हैं कि।
ब्रह्मज्ञानी होके जो ब्रह्म मे स्थित हैं वे कोई प्रिय वस्तु पा
य के हर्षित नहीं होते हैं और अप्रिय प्राप्त होने से भी
विषाद नहीं करते हैं क्यों कि वेलोग स्थिर बुद्धि औ मोह
रहित हैं २० ॥

दोहा

हर्ष नहि प्रिय पायके क्रोध न अप्रिय पाय स्थिरप्रज्ञा वि
नसंसय ब्रह्मवेत्ता ब्रह्ममाय २० ॥

103

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखं
सब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते २१

शांकरभाष्यं

किंच ब्रह्मणि स्थितः बाह्येति बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः स्पृश्यन्त इति स्पर्शाः शब्दादयो विषयास्तेषु बाह्यस्पर्शेषु असक्त आत्मान्तःकरणं यस्य सोयमसक्तात्मा विषयेषु प्रीतिवर्जितः स विन्दति लभते आत्मनि यत्सुखं तद्विन्दतीत्येतत् सब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिर्ब्रह्मयोगस्तेन ब्रह्मयोगेन युक्तः समाहितस्तस्मिन् व्यापृत आत्मान्तःकरणं यस्य सब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते प्राप्नोति तस्माद्बाह्यविषयप्रीतेः क्षणिकाया इन्द्रियाणि निवर्तयेदात्मन्यक्षयसुखार्थीत्यर्थः ॥ २१

आनंदगिरिकृतटीका

शब्दादिविषयप्रीतिप्रतिबन्धान्न कस्यचिदपि ब्रह्मणि स्थितिः सिध्येदित्याशंक्याह किंचेति नकेवलं पूर्वोक्तरीत्या ब्रह्मणि स्थितो हर्षविषादरहितः । किन्तु वियात्तरेणापीत्यर्थः यावद्यावद्विषयेषु रागरूपमावरणं निवर्तते तावत्तावदात्मसुखरूपमभिव्यक्तं भवतीत्याह बाह्येति नकेवलमसक्तात्मा आत्मवशादेव सुखं विंदते किन्तु ब्रह्मसमाधिना समाहितान्तःकरणः सुखमनन्तं व्याप्नोतीत्याह सब्रह्मेति नवश्वर्वार्द्धं व्याचष्टे बाह्येति समाधानानन्तरसम्यग्ज्ञानद्वारा निरतिशयसुखप्राप्तिमुत्तरार्द्धव्याख्यानेन कथयति ब्रह्मणीत्यादिना शब्दादिविषयविमुखस्यानन्तसुखाभिसंभवात्तदर्थिना प्रयत्नेन विषयवैमुख्यं कर्त्तव्यमिति शिष्यशिक्षार्थमाह तस्मादिति २१ ॥

स्वामिकृतटीका

इति

मोहनिवृत्त्या ब्रह्मस्थैर्ये हेतुमाह बाह्यस्पर्शेष्विति इन्द्रियैः स्पृश्यन्ते इति स्पर्शा बाह्येन्द्रियविषयेषु असक्तात्मा अनासक्तचित्तः आत्मन्यन्तःकरणे यदुपशमात्मकं केसुखं सात्विकं सुखं तद्विन्दति लभते स चोपशमसुखं लब्ध्वा ब्रह्मणि योगेन समाधिना युक्तस्तदैक्यं प्राप्त आत्मा यस्य सः अक्षयं सुखमश्नुते प्राप्नोति नित्यप्रियविषयभोगानामपि निवृत्तेः कथं मोक्षः प्रवृत्त्यर्थः स्यात् तत्राह २१ ॥ विषयाः

गी॰
टी॰पं॰

पिशाचभाष्यं

किंच ब्रह्मणि स्थितः सन्नित्याह बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च स्पृश्यन्त इति स्पर्शाः शब्दादयो विषयास्तेषु बाह्यस्पर्शेषु असक्तात्मा अन्तःकरणं यस्य सोऽयमसक्तात्मा विषयेषु प्रीतिवर्जितः सन्विन्दति लभते आत्मनि यत्सुखं तद्विन्दतीत्येतत् स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिर्ब्रह्मयोगस्तेन युक्तः समाहितोऽन्तःकरणं यस्य स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते प्राप्नोति तस्मात् बाह्यविषयेषु प्रीतेः क्षणिकायाः इन्द्रियाणि निवर्तयेत् २१ ॥

रामानुजभाष्यं

बाह्यस्पर्शेष्विति एवमुक्तेन प्रकारेण बाह्यस्पर्शेष्वात्मव्यतिरिक्तविषयानुभवेष्वसक्तमना अन्तरात्मन्येव यः सुखं विन्दति लभते स ब्रह्माभ्यासं विहाय ब्रह्मयोगयुक्तात्मा ब्रह्माभ्यासयुक्तमना ब्रह्मानुभवरूपमक्षयं सुखं प्राप्नोति २१ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थमू

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखं स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते २१ यत्नस्वलक्ष्यमित्यानः प्राणुमिश्रादि विलोपितपात्र वस्त्र समाधये मेलः स्वलनिश्चयात् बाह्यस्पर्शेषु विषयासक्तिसमीर्यस्मात् लिप्सायेवमप्यनतस्याह २१

परमार्थप्रपा टीका

अथ बुद्धिस्थैर्यहेतुमाह बाह्येति बहिरिन्द्रियैः स्पृश्यन्त इति स्पर्शाः बाह्येन्द्रियविषयास्तेषु असक्तः आत्मा मनो यस्य स तथाभूतः आत्मन्यन्तःकरणे उपशमात्मकं यत्सुखं विन्दति प्राप्नोति तेन ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगेन समाधिना युक्तः सदैकं प्राप्त आत्मा यस्य सः अक्षयं निरतिशयं सुखमश्नुते प्राप्नोति २१ ।

वनमालीटीका

ननु बाह्यविषयस्यानेकजन्मानुभूतत्वेन प्रबलतानुरागसक्तचित्तस्य कथमलौकिके ब्रह्मणि चित्तस्थितिरित्यत आह बाह्येति बाह्येन्द्रियैः स्पृश्यन्त इति स्पर्शाः शब्दादयः तेषु तेषु बाह्याश्चानात्मधर्मत्वात् तेष्वसक्तात्मानासक्तचित्तः ।

आत्मनि स्वस्मिन्निंद्रियांतःकरणादिविक्षेपाभावात् समाधावनुभ-
यत्कृतात्मकालिकं यत्सुखं विंदति ब्रह्मयोगः ब्रह्मदारात्मब्रह्मसंबंधले
न युक्त आत्मा स्वरूपं यद्वा ब्रह्मणि योगस्तैलधारावदविच्छिन्नाध्योलांतः
करणावृत्तिलयायुक्त आत्मा चित्तं यस्य स कदाचिदिंद्रियाणां विक्षेपेणावह
दृष्टायां कदाचित् कदाचिद्विस्फुरति नरे वा लयं चिह्नतावरणमनवरतमेति
ष्कते सैवैव स्वरूपभूते न तावनेन स्वयोग्यतया ह्यानंदमनुभवतीत्यर्थः
तस्मादात्मीयानंदस्यवानुभवार्थी सन् बाह्यविषयप्रीतेः तरुणिकायाम-
ह्यानरकानुबंधिन्याः सकाशादिंद्रियाणि निवर्तयेत् तावतैव ब्रह्मणि स्थि-
तिर्भवतीति भावः २१॥

उत्तमवैजयन्तीटीका

एवंभूतस्य किं स्यादेवं स्यादित्यपेक्षायामाह बाह्यस्पर्शेष्विति उक्तप्रकारे-
णैव बाह्यस्पर्शेषु प्राकृतविषयानुभवेषु असक्तात्मा निर्लिप्तमनाः
आत्मनि अंतरात्मन्येव यं स्वविस्वस्वरूपानुभवरूपं विंदति लभते स ब्रह्म-
योगयुक्तात्मा ब्रह्मणि परमेश्वरे योगः समाधिस्तस्मिन् युक्तः प्रकृत्या-
भ्यासेन युक्तात्मा युक्त आत्मा मनो यस्य स तथा प्रकृत्याभ्यासेन युक्तो ब्रह्मस-
माधियुक्तमनाः सन् नलयमविनाशिमहदनुभवरूपं सुखं तदस्तुते लभते २१

मधुसूदनीटीका

+ननु बाह्यविषयप्रीतेरनेकजन्माभ्यस्तत्वेनातिप्रबलत्वात्तदासक्तचित्तस्य कथमलौकिके ब्रह्मणि दृष्टसर्वसुखरहिते स्थितिः स्यात् न च ब्रह्मणि परमानंदत्वात् तत्र स्थितिः स्यादिति वाच्यं तदानंदस्याननुभूतचरत्वेन चित्तस्थितिहेतुत्वाभावात् तदुक्तं वार्तिके आत्मानंदः श्रुतः साक्षात्मानेनाविषयीकृतः दृष्टानंदाभिलाषं स न मंदः कर्तुमप्यलमिति तत्राह+

+इंद्रियैः स्पृश्यंत इति स्पर्शाः शब्दादयः तेच बाह्या अनात्मधर्मत्वात् तेषु
असक्तात्मा अनासक्तचित्तस्तृष्णाशून्यतया विरक्तः सन् आत्मन्यंतःकरण
एव बाह्यविषयनिरपेक्षं यदुपशमात्मकं सुखं तद्विंदति लभते निर्मलसत्व
वृत्त्या तदुक्तं भारते यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षय
सुखस्यैते नार्हतः षोडशीं कलामिति अथवा अन्तरात्मनि त्वंपदार्थे यत्
सुखं स्वरूपभूतं सुषुप्तावनुभूयमानं बाह्यविषयासक्तिप्रतिबंधाल्लभमानेन
देवतस्माल्लभते न केवलं त्वंपदार्थसुखमेव लभते किंतु तत्पदार्थैक्या-
नुभवेन पूर्णं सुखमपीत्याह स तत्साक्षात्कर्ता ब्रह्मणि परमात्मनि योगः स-
माधिः तेन युक्तस्तस्मिन् व्यापृतः आत्मांतःकरणं यस्य स ब्रह्मयोगयुक्ता-
त्मा अथवा ब्रह्मणि तत्पदार्थे योगेन वाक्यार्थानुभवरूपेण समाधिना यु-
क्तः ऐक्यं प्राप्त आत्मा त्वंपदार्थस्वरूपं यस्य स तथा अक्षयमनंतं सुखमश्नु-

गी॰
टी॰पं॰

पभूतमक्षय्यमप्याप्नोति स्वात्मानुभवरूपमेव सर्वदा भवतीत्यर्थः ॥ त्रि
ष्वपि वस्तुतिस्त्र वियानिहन्त्वभिप्रायेणाथान्वर्थयोगऔपचारिकः ॥ त
स्मादात्मानुभवस्वरूपानुभवार्थी मनुबाह्यविषयप्रीतेः ॥ लापि
कायामहानरकं त्वं वेपिन्याः सकाशादिंद्रियाणि निवर्तयेन्ना
वैतेवत्रलाणिस्थितिर्भवतीत्यभिप्रायः २१ [illegible]
[illegible] दे
[illegible]
[illegible]
[illegible] ॥

सदानन्दी टीका

अनाद्यभ्यासजां भोगप्रीतिं बलवतीं कथं त्यक्त्वात्मलाभ एव स्यादिति
संभवेदिति श्लोकद्वयं १ बाह्याः शब्दादयो भोगा जडत्वमीषिनश्वराः
तेषु नासक्तचित्तः सन् विरक्तः शुद्धमानसः २ योऽन्तःसुखं सदैवा
त्मभोगाकांक्षां विहाय यतते लभते स तु नित्यं सौख्यं नरं तेन महत्सुखे
यश्च कामसुखे लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते
नार्हतः षोडशीं कलां ४ यद्वा यत्नपरार्थेष्वसङ्गोऽभावितमपी
हितं प्रतिबंधादलभ्यं तन्न स्वभावाच्चलभ्यते ५ ब्रह्मण्येका
ग्रसंपन्नं चित्तं यस्य यतात्मनः तत्पदार्थैक्यवाक्ययोगः समाधिस्त
न चैकता ६ गतस्त्वमोपि लक्ष्यार्थोयस्यमोनेतमद्वयं स
स्वरूपसुखं समग्रमाप्नोत्यात्मस्वरूपतः ७ त्रिष्वपि वस्तुनि
श्रीतिः त्राणाभिप्रायतस्तथा औपचारिकथान्वर्थयोगोऽस्तीह
न वस्तुतः ८ बाह्यभोगरुचिं त्यक्त्वा सर्वानर्थाकरी बुधैः
नित्यानंदैकतां प्राप्तुं यत्नमास्थेय आदरात् यत्पादपद्ममकरंद
रसानुभूतिप्रमत्तविलासतः स्वात्मानुभवेन न मार्गः पौरंदरीं श्रिय
मथो वराण्यधीरा स्निह्यंति यत्र सहरिः शरणं ममास्तु ९ २१

नीलकंठी टीका

ननु अनुभूतात्मसुखस्य बाह्यविषयसुखं त्वक्तुमशक्य

मतो न प्रहृष्येदित्यसंगतमतआह बाह्येति बहिर्भवाः बाह्याः स्प
र्शा विषयेंद्रियसंबंधास्तेषु असक्तात्मा अनासक्तचित्तः सन् आत्म
नि प्रत्यगहृयाने देसयुक्तिकाले ध्यिनाय यत्सुखं विंदति लभते सतदेव
सुखं विधेयापेतं युक्तं कस्तत्सुखं यो ब्रह्मयोगे ब्रह्मणि योगः समा
धिस्तद्युक्तो योजित आत्मा बुद्धिर्येन सः ब्रह्मयोगयुक्तात्मा ब्रह्मविदि
त्यर्थः ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः ब्रह्मयोगयुक्तात्मा तदेव सुखं
विंदतीति वक्तव्ये ब्रह्मविदेव तत्सुखमिति तस्य सुखाभिन्नत्वविवक्ष
याइदमुक्तं ननूभयत्रएकमेव सुखं चेत्कः समसमाधिस्थयोर्विशेष
इत्याशंक्याह सुखमिति अक्षयं सुखं मोक्षः तेअश्नुते व्याप्नोति द्वैता
दर्शनस्य तुल्यत्वादुभयत्रैकमेव सुखं तथापि योगी मूलाविद्याया नष्ट
त्वादनंतं सुखमश्नुते न समः अविद्यानुच्छेदात् तथा च मोक्षसुखस्य
सुखत्वस्याप्यनुभूतत्वान्न दृष्टं बाह्यं सुखं सुखजमित्यर्थः २१ ॥

आनन्दीटीका

यत्सुखं सुखवशाद्वाक्मनसोनुकूलवेदनीयमस्ति तत्सुखं बाह्या
बाह्येंद्रियग्राह्यास्ते स्पर्शाः शब्दादयो विषयास्तेषु असक्त आत्मा यस्य
सः योगासिद्ध्यर्थं यमनियमसेवी स्वयमेव विंदते सः पुरुषः ब्रह्मणि
योगेन संयमाभ्यासेन चित्तवृत्तिनिरोधेन युक्तो योजित आत्मा येन सः
अव्ययमक्षयं सुखं मोक्षमश्नुते २१ [illegible]

सामकंठीटीका

शास्त्रविहितविषयनिष्ठैव ब्रह्मणि स्थितिः निर्विघ्नवेति सुखं द्वयुपन्तमेव निर्वा
हयितमाह आत्मनि परस्मिन् तत्त्वस्वभावसिद्धयत्सुखं नित्यानन्दलक्षणो यमस्त
न्नाह्यस्पर्शेष्विंद्रियार्थेषु शब्दादिषु विरुद्धेषु असक्तात्मा सम्यग्ज्ञानवशा
दात्मैकनिष्ठत्वे सत्यनिमग्नांतःकरणो योगी विंदत्युपलभते सयोगा
युक्तात्मा योगकर्मसमाधौ युक्तात्मा ज्ञाननिष्ठतया नित्यनिमग्नांतःक
रणः सुखमक्लेशेनाव्ययमविच्छिन्नं कृत्वा ब्रह्म परमकरणमश्नुते २१ [illegible]
[illegible]

गी॰
टी॰ पं॰
स्यायोगकस्याधिकृततरित्य तआह ॥
106

[illegible]माह २१ ॥

नन्वीदृशं ब्रह्मभावाय नामकी वनमाली टीका

योयोगी बाह्यस्पर्शेष्विन्द्रियार्थेषु विषयेष्वसक्तात्मा आत्मैकवि
षक्तया निमग्नान्तःकरणः आत्मनि प्रत्यगात्मनि यदनिर्वाच्यं सुख
मानंदं विंदत्युपलभते सएव योगयुक्तात्मा योगे कर्मसमाधौ युक्ता
त्मावहितांतःकरणः सुखमक्लेशेनाभ्यासातिरेकेणात्यन्तमक्षयं
ब्रह्मपरमकारणमश्नुते स्वात्मतया व्याप्नोति अथवात्यन्तं सुखमिति
ब्रह्मविशेषणम् २१ [illegible]
[illegible] २१ ॥

पंचोलीटीका

मोहनिवृत्त्या बुद्धिस्थैर्यमाह बाह्यस्पर्शेष्विन्द्रियविषयेष्वसक्तात्मा प्री
तिमनाः आत्मनि ब्रह्मणि यत्सुखं परमानंदलक्षणं विंदति लभते
स ब्रह्मयोगयुक्तात्मा परं ब्रह्मणि समाधियुक्तस्तैकाग्र्यमात्मा य
स्य सः सर्वतो व्यावृत्तचित्तः अक्षयं सुखमश्नुते प्राप्नोति २१ ॥

रत्नबीरसमिद्धायिनी ॥

बाह्यस्पर्शेष्विति बाह्याः श्रोत्रादयस्तेषु स्पर्शा रागाद्यात्मकाः
संबंधास्तेषु नसक्त आत्मा मनो यस्य स कर्मयोगी तत्सुखं विंदति
आत्मनि परमात्मनि यत्सुखं विद्यते इति शेषः ब्रह्मसायुज्यप्राप्ते
र्ब्रह्मसुखाभिन्नं सुखं तस्याव्यभिचारीतिभावः यत्तदेव हि वैदं सु
खमिति न्यायाद्धर्षयितुं पुनरपि विशिनष्टि सब्रह्मेति सच ब्रह्म
णि यद्वेदप्रतिपाद्ये युक्ते योयोगः समाहितस्तेन युक्तः समाहित आ
त्मा मनो यस्य सतादृशः अक्षयं प्राप्तं तत्सुखं ब्रह्मसायुज्यलक्षण
मश्नुते व्याप्नोति यद्वा आत्मनि स्वचित्तशुद्ध्यादिव्यापारलक्षणे प्र
यत्ने कृते सति सर्वकर्मफलत्यागः कर्मयोगी यत्सुखं विंदते लभते

कीदृशो बाह्यस्पर्शेष्वाह्येष्वत्र मिष्टादिविषयेषु स्पर्श इंद्रियसन्निकर्षणोत्यन्तरागादयस्तेष्वसक्तात्मा मनो यस्येति सत्यपींद्रियार्थसन्निकर्षे प्रोक्तलक्षणैरागाद्यैः प्रहत्यंतरायभूतैरगृहीतांतःकरण इत्यर्थः तदेव नित्यं सुखं ब्रह्मयोगयुक्तात्मा ब्रह्मणा परमात्मना सह योयोगो योजनमेकीभावस्तद्युक्तः समाहितमात्मांतःकरणं यस्य सोष्टांगयोगारूढोऽश्नुते व्याप्नोति ब्रह्मयोगी यत्सुखमश्नुते तदेव कर्मयोगीति वक्तव्ये तथोक्तिः कर्मयोगिनो ब्रह्मयोगिनः सकामत्वाद्वैशिष्ट्यप्रतिपादनार्था वैशिष्ट्यं चात्र कर्मयोगस्य सुकरत्वेन संभवादैहिकामुष्मिकोभयभोगसंभवाच्चेति ध्येयं ॥२१॥

अथभाष्य

बाह्यस्पर्शेष्विति कामरहितमात्मनि यत्सुखं विंदति स एव ब्रह्मयोगयुक्तात्मा चेत्तदेवाक्षयं सुखं विंदति ब्रह्मविषयो योगो ब्रह्मयोगः ध्यानादिस्तद्युक्तस्यैवात्मसुखमक्षयं अन्यथा नेत्यर्थः संन्यासार्थं कामभोगान्निंदयति ॥२१॥

107

भाषा अनुवाद

मोह निवृत्त मात्र होने से बुद्धि स्थिर होती इस का हेतु कहते हैं कि बाह्य इन्द्रियों के विषय मे अनाशक्त चित्त पुरुष अपने अन्तःकरण मे विक्षेप रहित शांति युक्त जो सात्विक सुख सो अनुभव करते और वही पुरुष शांति सुख प्राप्त होके ब्रह्मयोगयुक्त आत्मा कहे समाधिके द्वारा परमात्मा के साथ एकता प्राप्तिरूप जो अक्षय सुखसो भी लाभ करते हैं २१

दोहा

बाह्यविषयनसक्तमन प्राप्तआत्मसुखजोय सो ब्रह्मयोग
युक्तमन अक्षयसुखवतिहहोय २१ ॥

108

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः २२

शांकरभाष्यं

इतश्च निवर्तयेत् ये हीति ये हि यस्मात् संस्पर्शजा विषयेन्द्रियसंस्पर्शेभ्यो
जाता भोगा भुक्तयो दुःखयोनय एव ते अविद्याकृतत्वात् दृश्यन्ते ह्याध्यात्
मिकादीनि दुःखानि तन्निमित्तान्येव यथेहलोके तथा परलोकेपीति गम्य
ते एवशब्दात् न संसारे सुखस्य गंधमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिका
यो इंद्रियाणि निवर्तयेत् न केवलं दुःखयोनय आद्यंतवन्तश्च आदिर्विषये
न्द्रियसंयोगो भोगानामन्तश्च तद्वियोग एव अत आवन्तोऽनित्या मध्यक्षणभा द्यन्त
वित्वादित्यर्थः कौंतेय न तेषु रमते बुधो भोगेषु विवेकी अवगतपरमार्थतत्वो
ऽत्यन्तमूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनां २२

आनन्दगिरिकृतटीका

तत्रैव हेत्वन्तरपरत्वेनोत्तरश्लोकमवतारयति इतश्चेति विषयेभ्यः सकाशा
दिन्द्रियाणीति शेषः वैराग्यार्थमेव वैषयिकानि सुखानि दूषयति ये हीति
ननु विषयेंद्रियसंप्रयोगसंभूतेषु भोगेषु जन्तूनामभिरुचिदर्शनात्कुतस्ते
षां दुःखयोनित्वमित्याशंक्याविवेकिनां तेषु संगेपि न विवेकिनामित्याह
आद्यन्तवन्त इति यस्मादाधिव्याधिजरामरणादिसहितेभ्यः समागमनादि
क्लेशरूपभागिभ्यश्च विषयेंद्रियसंबंधेभ्यो भोगाः सुखलवानुभवा जायन्ते
तस्मात्ते दुःखहेतवो भवन्तीति योजना अविद्याकार्यत्वाद्दुःखानां कुतो भोग
जन्यत्वमित्याशंक्य भोगानामविद्याप्रयुक्तत्वात्तन्निबन्धनत्वं दुःखानां युक्त
मित्यभिप्रेत्याह अविद्येति भोगानां दुःखयोनित्वे मानमनुभवमुपन्यस्यति
दृश्यन्ते हीति ऐहिकानां भोगानां दुःखनिमित्तत्वेपि नामुष्मिकाणां त
थात्वमनुभवाभावादित्याशंक्यावधारणसामर्थ्यसिद्धमर्थमाह यथेति
पूर्वार्द्धस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह नेत्यादिना इतश्च विषयेभ्यः सका

गी॰
टी॰ पं॰

109

घ्राणादीन्द्रियाणि निवर्तयितव्यानीत्याह नकेवलमिति आद्यन्तवत्त्वेन
अल्पकालवर्तित्वेन क्षणभङ्गुरत्वादुपपत्तीयत्वे भोगानां सिध्यति अस्ति
हि तेषां क्षणभङ्गुरत्वे क्षणिकविषयाकारमनोवृत्तित्वं गणादितिमन्वानः
सन्नाह अतइति बुद्धिपूर्वकारिणां विवेकवतां भोगेषूपेक्षोपलब्धेश्च ।
तेषामाभासत्वे श्रुतिर्भातीत्याह नतेष्विति प्रतीकोपादानमाचमिदं पु
नर्व्याख्यानमितिनपुनरुक्तिः ननुकेषांचिद्भोगेष्वभिरुचिरुपलभ्यते त
त्राह आद्यन्तवन्तेति २२॥

स्वामिकृतटीका

नन्वप्रियविषयभोगानामपि निवृत्तेः कथं मोक्षः पुरुषार्थः स्या
त्तत्राह येहीति संस्पृश्यन्त इति संस्पर्शा विषयास्तेभ्यो जाता ये भोगाः सुखानि ते व
र्तमानकालेपि स्पर्धासूयादिव्याप्तत्वात् दुःखस्यैव योनयः कारणभूताः तथा
आदिमन्तोन्तवन्तश्चातो विवेकी तेषु न रमते २२

पिशाचभाष्यं

येहिसंस्पर्शजा भोगा ये हि यस्मात्संस्पर्शजाः विषयेन्द्रियसंस्पर्शेभ्यो जाताः
भोगा भुक्तयः दुःखयोनय एव ते अविद्याकृतत्वात् दृश्यन्ते ह्याध्यात्
मिकानि दुःखानि तन्निमित्तान्येव यथेहलोके तथा परलोके पीतिग
म्यते एवशब्दात् न संसारे सुखस्य गन्धमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णि
काया इन्द्रियाणि निवर्तयेत् नकेवलं दुःखयोनयः आद्यन्तवन्तश्च आदिर्वि
षयेन्द्रियसंयोगो भोगानामन्तश्च तद्वियोगभावः अत आद्यन्तवन्तः अनित्या
मध्यक्षणभावित्वादित्यर्थः कौन्तेय न तेषु रमते बुधो विवेकी अवगत पर
फा मार्थतत्त्वः अत्यन्तमूढानामेव विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनां २२

रामानुजभाष्यं

प्राकृतस्य बाह्यसुखस्पर्शस्य सुत्यजतामाह येहीति विषयेन्द्रियस्पर्शजा
ये भोगाः दुःखयोनयस्ते दुःखोदर्का आद्यन्तवन्तः अल्पकालवर्तिन उपल
भ्यन्ते न तेषु आत्मविद्रमते । २२

अभिनवगुप्तकृतटीका

ग्राह्यस्पर्शो विषयात्मनि सक्तिर्यस्य नास्ति सत्त्वपर्वं मन्यत इत्याह

सुधः स एवं भावयति बाह्यविषयभोगाः सर्वे दुःखकारणरूपाः
तथाविधा अप्यनित्याः २२

परमार्थप्रपाटीका

अथैतदेव सुखशान्तेरुपदेशेनाह येहीति सम्यक्स्पृशंतीति
संस्पर्शा विषयास्तेभ्यो जाता ये भोगा विषयसुखभोगास्ते दुःखयोनय ए
व दुःखकारणीभूताः परिणतिविरसत्वात् यद्वा दुःखं देयोनिः कारणं ये
षां ते अर्जनेपि दुःखरूपत्वात्तत एव आद्यंतवंत उत्पत्तिनाशधर्मकत्वात्तद्दुः
खरूपा एव अतस्तेषु बुधो ज्ञाता न रमते विषसंपृक्तान्नवत्त्यजति तदुक्तं
लोकयेषु विषयानुरज्जने दुःखगर्भमपि मन्यते सखेव अमिश्रं वडिशागमे
मध्यहोमोहतो भ्रमतियद्वदंदज्ज इति २२

वनमालीटीका

बाह्यविषयप्रीतिनिवृत्त्या बाह्यात्मान्यसुखानुभवस्तस्मिन्सतिमहानंदा
नुभवेन तदानंदे प्रीतिनिवृत्तेरित्यो(?)न्याश्रयात् कथं सुखरूपानंदानुभ
वः स्यादाशंक्य विषयदोषदर्शनाभ्यासादेव तत्प्रीतिर्भवतीत्याशयेनाह
ये हीति हि यतः ये संस्पर्शजा विषयेंद्रियसंबंधजा भोगाः तत्सुखानु
भवा रहस्यवापरत्र वा रागद्वेषादिव्याप्तत्वात् दुःखयोनय एव ते सर्वेपि ब्रह्म
लोकपर्यंतं दुःखहेतव एव यावतः कुरुते जंतुः संबंधान्मनसः प्रि
यान् तावंतोस्य निखन्यंते हृदये शोकशंकव इति श्रीवैसवोक्तेः एतादृ
शा अपि ते स्थिराः किंतु आद्यंतवंतः आदिर्विषयेंद्रियसंयोगो तस्य अंतः तद्वियो
गस्तौ विद्येते येषां ते अतस्तेषु बुधो विवेकी न रमते परिणामतापसंस्
कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति श्रीपतंजलि
नाप्युक्तं तस्मात्सोरस्याखंगं योस्तीति बुद्ध्वातः सर्वाणींद्रियाणि निवर्तयो
दितिभावः २२

कृष्णमवैजयंतीटीका

ननु बाह्यस्पर्शे सुखमस्ति तस्यं स्यात् तत्सर्वं विहाय मनस्तेषु न सक्तं क
थं कुर्यादित्याशंक्याह तेषु दुःखादिदर्शनात् विवेकिनो मनो न रमते इत्या
ह येहीति हे कौंतेय तत्पसिद्ध्याः ब्रह्महीत्यव्ययर्शकः येपि संस्पर्शजाः

गी॰
टी॰ पं॰

110

विषयेंद्रियसंयोगाद्ये जाता भोगाः सुखानि भवंति ते सर्वेपि दुःखयोन
य एव दुःखहेतव एव सुः ननु सर्वे स्वर्गनराद्योपि संस्पर्शजान् भोगानुभ
वंति यदि ते दुःखयोनयस्तर्हि स्वर्गनरकाद्याः सर्वे जनाः कस्मै भोगा कथं भु नु
ञ्जंतीति चेत्तत्राह आद्यन्तवंतः अल्पकालवर्तिनः तेषां भोगानां सु
खरूपत्वेपि स्वल्पकालवर्तित्वात् दुःखयोनित्वमेव स्वर्गनरकादिषु यो बुधः
नित्यानित्यवस्तुनिर्णयकुशलः आत्मयाथात्म्यस्वरूपज्ञः स तु तेषु भोगे
पुनः रमते आसक्तिं न करोति येन नात्मस्वदेहादिष्वात्माभिमानवंतस्त
एव तेषु रमंत इत्यर्थः २२ ॥+ ननु बाह्यविषयप्रीतिनिवृत्तावात्मन्यनुरागो भ
वतीत्यसिद्धिः सति तत्प्रसादादेव बाह्य विषयप्रीतिनिवृत्तिरितीतरे
तराश्रयत्वशात्रैकमपि सिद्धेदित्याशङ्क्य विषयदोषदर्शनाभ्यासेनैव तत्प्री

मधुसूदनी टीका

।निवृत्तिर्भवतीति परिहारमाह +

+हि यस्मात् ये संस्पर्शजा विषयेंद्रियसंस्पर्शजा भोगाः क्षुद्रसुखलवा ।
भवाः इह वा परत्र वा रागद्वेषादिव्याप्तत्वेन दुःखयोनय एव ते सर्वेपि
ब्रह्मलोकपर्यंतं दुःखहेतव एव तदुक्तं विष्णुपुराणे यावतः कुरुते जंतुः सं
बंधान्मनसः प्रियान् तावंतोस्य निखन्यंते हृदये शोकशंकवः इति ए
तादृशा अपि न स्थिराः किंतु आद्यंतवंतः आदिर्विषयेंद्रियसंयोगोंतश्च त
द्वियोग एव तौ विद्येते येषां ते पूर्वापरयोरसत्त्वान्मध्येपि स्वप्नवदाविर्भूताः
क्षणिका मिथ्याभूता तदुक्तं गौडपादाचार्यैः आदावंते च यन्नास्ति वर्त
मानेपि तत्तथेति यस्मादेवं तस्मात्तेषु बुधो विवेकी न रमते प्रतिकूलवे
दनीयत्वान्न प्रीतिमनुभवति तदुक्तं भगवता पतंजलिना परिणामता
पसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति सर्वम
पि विषयसुखं दृष्टमानुश्रविकं च दुःखमेव प्रतिकूलवेदनीयत्वा
द्विवेकिनः परिज्ञातक्लेशादिस्वरूपस्य न त्वविवेकिनः अक्षिपात्रक
ल्पो हि विद्वान् स्वल्पदुःखलेशेनाप्युद्विजते यथोर्णातंतुरक्षिगमा
त्रोर्णादिपात्रे न्यस्तः स्पर्शेन दुःखयति नेतरेषु गात्रेषु तद्वद्विवेकिन एव
मधुविषसंपृक्तान्नभोजनवत्सर्वमपि भोगसमापने कालत्रयेपि क्ले
शानुविद्धत्वात् दुःखेन मृष्टमेव बहुविधं दुःखमसहिष्णोरित्यर्थः ।
तत्र परिणामतापसंस्कारदुःखैरिति भूतवर्तमानभविष्यत्का
लेपि दुःखानुविद्धत्वादौपाधिकं दुःखत्वं विषयसुखस्योक्तं गुणाह

विशेषस्तुखस्योक्तं

तिविरोधाच्चेत्यनेन स्वरूपतो दुःखत्वं तत्र परिणामस्य तापस्य संस्कार।
स्यैतत्रयदुःखानि तैरित्यर्थः इत्थंभूतलक्षणे तृतीया तथाहि रागानुवि
द्ध एव सर्वोपि सुखानुभावः नहि तत्र न रज्यति तेन सुखी चेति संभवति
रागएव [illegible]र्द्वेमनुहृताः सन्तु विषयप्राप्त्या सुखरूपेण परिणमन्ते तस्य च
प्रतिक्षणं वर्धमानत्वेन स्वविषयाप्राप्तिनिबंधनदुःखस्यापरिहार्यत्वात्
दुःखरूपतैव यादृभोगेष्विंद्रियाणामुपशांतिः परितृप्तत्वान्नत्वावे
याल्लौल्यादनुपशांतिस्तद्दुःखं न चेंद्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्तुं।
शक्यं यतो भोगाभ्यासमनुविवर्धंते रागाः कौशलानि चेंद्रियाणां स्मृति
श्च न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भू
य एवाभिवर्धत इति तस्माद्दुःखात्मकरागपरिणामत्वाद्विषयसुखमपि
दुःखमेव कार्यकारणयोरभेदादिति परिणामदुःखत्वं तथा सुखानुभव
कालेन स्मृतिकलानि दुःखसाधनानि द्वेष्टि न चानुपहत्य भूतान्युपभोगः
संभवतीति भूतानि च हिनस्ति द्वेषश्च सर्वाणि दुःखसाधनानि मा भूव
न्निति संकल्पविशेषः न च तानि सर्वाणि कश्चिदपि परिहर्तुं शक्नोति
अतः सुखानुभवकालेपि तत्परिपंथिनं प्रति द्वेषस्य सर्वदैवावस्थि
तत्वान्नित्यदुःखं दुष्परिहार्यमेव तापो हि द्वेषः एवं च दुःखसाधनानि
परिहर्तुमशक्नोम्युत्पतिचेति मोहदुःखतापि व्याख्येया तथा चोक्तं
योगभाष्यकारैः सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्ता।
पानुभव इति तत्रास्ति द्वेषजः कर्माशयः सुखसाधनानि दुःखसाध
नानि च निवर्तयमानः प्रार्थयमानश्च एते कायेन वाचा मनसा च प
रिस्पंदते ततः परमनुगृह्णाति उपहंति चेति परानुग्रहपीडाभ्यां धर्मौवु धमा
पचिनोति स कर्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते
तथा वर्तमानः सुखानुभवः स्वविनाशकाले संस्कारमाधत्ते स च सु
खस्मरणं तच्च रागं स च मनःकायवचनचेष्टां सा च पुण्यापुण्यकर्मा
शयौ तौ च जन्मादीनि संस्कारदुःखता एवं तापमोहयोरपि संस्कारो व्या
ख्येयौ एवं कालत्रयेपि दुःखानुबंधाद्विषयसुखं दुःखमेवेत्युक्ता स्वरूप
तोपि दुःखतामाह गुणवृत्तिविरोधाच्च गुणाः सत्वरजस्तमांसि तेषां च

सुखस्य

गी॰ टी॰ पे ने४ दुःखमोहात्मकः परस्परविरुद्धस्वभावा अपि तैलवर्त्यग्नयश्चवद्दीपे गुण
षभोगप्रयुक्तं त्र्यात्मकमेकं कार्यमारभन्ते नत्वेकस्य प्राधान्ये द्वयोर्गुणा
भावात् प्रधानमात्रव्यपदेशेन सात्त्विकं राजसं तामसमिति त्रिगुणमपि
कार्यमेकेन गुणेन व्यपदिश्यते तत्र सत्त्वोपभोगरूपोऽपि प्रत्यय उद्भूतस
त्त्वकार्यत्वेऽपि अनुद्भूतरजस्तमःकार्यत्वात्त्रिगुणात्मक एव तथा च सात्त्वि
त्मकत्वं दुःखात्मकत्वं विषादात्मकत्वं च तस्य एवमिति दुःखमेव स
र्वं विवेकिनः नचैतादृशोऽपि प्रत्ययः स्थिरः यस्माच्चलं च गुणवृत्तमिति ति
प्रपरिणामि चित्तमुक्तं नन्वेकः प्रत्ययः कथं परस्परविरुद्धसुखदुःख
पा४ मोहात्मक इष्यते इति चेन्न उद्भूतानुद्भूतयोर्विरोधाभावात् सम
वृत्तिकानामेव हि गुणानां युगपद्विरोधो न विषमवृत्तिकानां यथा धर्म
ज्ञानवैराग्यैश्वर्याणि लब्धवृत्तिकानि लब्धवृत्तिकैरेवाधर्माज्ञानावैराग्य
नैश्वर्यैः सह विरुध्यन्ते न तु स्वरूपमात्रैः प्रधानस्य प्रधानेन सह विरोधो
न तु दुर्बलेनेति हि न्यायः एवं सत्त्वरजस्तमांस्यपि परस्परं प्राधान्यमात्रे यु
गपन्न सहन्ते न तु सद्भावमपि एतेन परिणामतापसंस्कारदुःखेष्वपि।
रागद्वेषमोहानां युगपत्सद्भावो व्याख्यातः प्रसुप्ततनुविच्छिन्नोदार
रूपेण क्लेशानां चतुरवस्थत्वात् तथा हि अविद्यास्मितारागद्वेषाभि
निवेशाः पञ्च क्लेशाः अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणा
अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या दृग्
दर्शनशक्त्योरेकात्मतैवास्मिता सुखानुशयी रागः दुःखानुशयी द्वेषः
मोहा४ स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः ते प्रतिप्रसवहेयाः सूक्ष्मा
ध्यानहेयास्तद्वृत्तयः क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः स
ति मूले तद्विपाको जात्यायुर्भोगाः इति पातञ्जलानि सूत्राणि तत्रात
स्मिंस्तद्बुद्धिर्विपर्ययो मिथ्याज्ञानमविद्येति पर्यायः तस्या विशेषः संसा
रनिदानं तत्रानित्ये नित्यबुद्धिर्यथा ध्रुवा पृथिवी ध्रुवा सचन्द्रतारका
द्यौरमृता दिवौकस इति अशुचौ परमबीभत्से काये शुचित्वबुद्धिर्यथा
नवेव शशांकलेखा कमनीयेयं कन्या मध्वमृतावयवनिर्मितेव चं
द्रं भित्वा निःसृतेव ज्ञायते नीलोत्पलपत्रायताक्षी हावभावगर्भाभ्यां

लोचनाभ्यां जीवलोकमाश्वासयतीवेति कस्यकेन संबंधः स्थानाद्बीजादु
पष्टंभान्निःष्यंदान्निधनादपि कायमाधेयशौचत्वात्पंडिता ह्यशुचिं विदुरिति
वैयासिकः श्लोकः एतेनापुण्येपुण्यप्रत्ययोऽनर्थे चार्थप्रत्ययो व्याख्यातः
दुःखे सुखख्यातिं वक्ष्यति परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुः
खमेव सर्वं विवेकिन इति अनात्मन्यात्मख्यातिर्यथा शरीरे मनुष्योऽहमित्यादिः
इयं चाविद्या सर्वक्लेशमूलभूतात् तमः इत्युच्यते उदिष्ठकृतयोरभेदाभिमानो
ऽस्मिता मोहः साधनरहितस्यापि सर्वस्य स्वजातीयेभ्यः स्यादिति विपर्यया
विशेषो रागः स एव महामोहः दुःखसाधनेऽविद्यमानेऽपि किमपि दुःखं मे
माभूदिति विपर्ययविशेषो द्वेषः स तामिस्रः आयुःस्वभावेष्वेतैः शरीरेंद्रिया
दिभिर्नित्यैरपि वियोगो मे माभूदित्याविद्वदंगनाबालस्वाभाविकः सर्वेषा
णिसाधारणो मरणत्रासरूपो विपर्ययविशेषोऽभिनिवेशः सोऽन्धतामि
स्रः तदुक्तं पुराणे तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः अविद्यापं
चपर्वैषा प्रादुर्भूता महात्मन इति एते च क्लेशाश्चतस्र अवस्था भजंते तत्रा
सत्ताप्यनुत्पन्नेरनभिव्यक्तरूपेणावस्थानं प्रसुप्तावस्था अभिव्यक्तस्यापि सह
कार्यत्वाभावात् कार्याजननं तन्ववस्था अभिव्यक्तस्य जनितकार्यस्यापि
केनचिद्बलवताऽभिभवाद्विच्छेदावस्था अभिव्यक्तस्याप्तसहकारिसंपत्ते
रप्रतिबंधेन स्वकार्यकरणमुदारावस्था एताश्चतस्रोऽवस्थाश्च तस्य विशिष्टानाम
स्मितादीनां चतसृणां विपर्ययरूपाणां क्लेशानामविद्यैव सामान्यरूपा क्षे
त्रंप्रसवभूमिः सर्वेषामपि विपर्ययरूपत्वस्य दर्शितत्वात् तेनाविद्यातिह
तैव क्लेशानां निवृत्तिरित्यर्थः तेच क्लेशाः प्रसुप्ताः यथा प्रकृतिलीनानां
तनवः प्रतिपक्षभावनया तनूकृता यथा योगिनां तदुभयेऽपि सूक्ष्माः प्र
तिप्रसवेन मनोनिरोधेनैव निर्बीजसमाधिना हेयाः ये तु स्थूलमहत्त्वयस्तत्
कार्यभूताः स्थूला विच्छिन्ना उदाराश्च विच्छिद्य विच्छिद्य तेन तेनात्मना
पुनः प्रादुर्भवंतीति विच्छिन्नाः यथा रागकाले क्रोधो विद्यमानोऽपि तत्रा
दुर्भूत इति विच्छिन्न उच्यते एवमेकस्यां स्त्रियां चैत्रो रक्त इति नान्यासु विरक्तः
किंत्वेकस्यां रागो लब्धवृत्तिरन्यासु च भविष्यद्वृत्तिरिति स तदा विच्छिन्न उ
च्यते ये यदा विषये लब्धवृत्तयः तेन तदा सर्वात्मना प्रादुर्भूता उदारा उच्यं

गी॰ तेनदुःखभयेप्यतिस्थूलत्वात्कुदृष्टमतमयेनभगवद्ध्यानेनतद्ध्यानमनोनिरोधम
टी॰पं॰ पेक्ष्यंतेमनोनिरोधहेयाक्लनिकाप्रवृत्तथाचपरिणामतापसंस्कारदुःखै
र्गुणवृत्तमतनुविच्छिन्नरूपेण सर्वेक्लेशाः सर्वदासंतिउदारतानुकदाचित्क
स्यचिदितिविशेषः एतेचबाधनालक्षणंदुःखमुपजनयंतः क्लेशाः प्रा
बाल्याभवंति यतः कर्माशयोधर्माधर्माख्यः क्लेशमूलकएवसतिचमूल
112 भूतेक्लेशेतस्यकर्माशयस्यविपाकः फलंजन्मायुर्भोगश्चेतिसचकर्मा
शयः इहपरत्रच स्वविपाकारंभकत्वेनदृष्टादृष्टजन्मवेदनीयः एवंक्लेश
संततिर्निर्दीर्घंदुःखदंनिशमावर्ततेअतः समीचीनमुक्तं येहिसंस्पर्शजा
भोगादुःखयोनयएवते आद्यंतवंतइतिदुःखयोनित्वंपरिणामादिभिरु
ण्णवृत्तिविरोधाच्च आद्यंतवंतंगुणवृत्तस्यचलत्वादितियोगमतेव्याख्या
तौपनिषदानांतुअनादिभावरूपमज्ञानमविद्या अहंकारधर्मोध्यासोऽस्मि
तारागद्वेषाभिनिवेशास्तद्वृत्तिविशेषाः तन्मूलत्वात्सर्वेप्यविद्यात्मकाते विद्या
नमिथ्याभूतारज्जुभुजंगाध्यासवन्मिथ्यात्वेपिदुःखयोनयः सुषुप्तादिवद्
दृष्टिसृष्टिमात्रत्वेनाद्यंतवंतश्चेतिअतोधिष्ठानसाक्षात्कारेणनिवृत्तभ्रम
का स्तेषुनरमतेमृगतृष्णास्वरूपज्ञानवानिवतत्तोदकार्थीनप्रवर्ततेनमंसा
वेस्तावस्पृगंधमात्रमप्यस्तीतिबुद्ध्वाततःसर्वाणींद्रियाणिनिवर्तयेदित्य
र्थः २२ [illegible]
[illegible]
हं [illegible] ॥

सदानंदी टीका

ननुबाह्यरूपविषयत्यागेसुखाभावप्रसंगोभवेत् तस्मिन्सतिभवेद्बाह्यरूपविषया
रामक्तत्त्वयोः १ अन्योन्याश्रयतादोषान्नैकंसिध्येदपीतिचेत् शृणुबाह्यरू
पविषयत्यागेदोषदृष्टिर्हिकारणं २ विषयेंद्रियसंबंधजन्यायेत्वहंपिणः सु
खांशानुभवाभोगाइहलोकेपरत्रच ३ रागद्वेषादिविद्धत्वात् दुःखहेतवए
वते विषयेंद्रियसंयोगआदिवंतस्ततत्त्वयः ४ तदंतःस्वाप्नवन्मध्येप्या
दुर्भूतास्वप्नात्मकाः आद्यंतवंतेचयतोनाक्लिवर्तमानेपितत्तथा ५ इतिन्यायेन
तेमिथ्यात्वलिंगकानेरकारिणः यस्मादेवंततस्तेषुरमतेमतिनपंडितः ६
रज्जुसर्पवदाभ्यासाभोगामिथ्याभ्रमाकराः स्वप्नवद्दृष्टिसृष्टित्वादविद्यासु

लकाजडः ७ अधिष्ठानावबोधेननष्टाविद्याभ्रमोऽभयः नतेषुरमतेयद्व
त्रस्तुरुषरवारिषु ८ नसंसारेसारवस्यालिंगेधीष्यहानतःसुधीः बाह्य
भोगफविंत्यक्ताखस्वाबाउभवोभवेत् ९ २२ ॥

नीलकंठीटीका

ननुसुखमिलितुल्यमोलस्यावस्यार्थेकः प्राममेवबाह्यदिस्पर्शस्यत्रपानगी
नवायादिस्पर्शजंसुखंत्यजेदित्याशंक्याबाह्यस्पर्शसुखमनित्यत्वात्त्यजेदिति येहीति संस्प
र्शजाः विषयसंबंधजाः दुःखयोनिरिति हेतुः आद्यंतवंतः इति जातेषुत्रेयतत्सु
खेनश्यंतिनष्टेनश्यतिदुःखंचमहत्प्रयच्छतीतितेषुभोगेषुबुधः परिपाकदर्शी
नरमते २२ ॥

एतद्यतिरेकमाह ॥

आनंदीटीका

आदिमत्त्वात् अप्राप्तेप्रार्थनादिदुःखम् अंतवत्वाद्विनाशाशंकादुःखं २२

स्वात्मनयाव्याप्नोति कथंबाह्यस्पर्शेष्वा रामकंठीटीका त्वावर्तिसुखंयोगीविंदतीतिप्रतिपादयित

माह हिप्राह्येहेतौयस्मात् येसंस्पर्शजाः ग्राह्यादिविषयसंपर्कजन्मानोभोगाः
कामाः तेजन्मविनाशयुक्तत्वादनित्याः संतः प्राप्तेषुसत्स्वपि वियोगजस्य
दुःखस्याव्यभिचारादप्राप्तेषुच प्रार्थनात्मकस्यदुःखस्याव्यभिचाराद्दुःख
योनयएवदुःखमेवतेजनयंति ततस्तेषुबुधोज्ञानवान्नरमतेनप्रीति
मनुभवंति किमनेनोक्तंभवति कर्मयोगीसन्संसारिवत्कृपवादिद्विषे
विषयान्भजते नततज्जनितेनसुखेनात्मोत्सवितोभवतिसहिस्वाभावि
कात्मसुखनिरवमनुभवतीति [illegible]
[illegible] २२ ॥

ननुहष्टविषयभोगसुखस्य लासिधी वंशधरीटीका पेत्यजनोहष्टमात्मसुखंपरित्याज्यमित्या

शंक्याह हियस्मात् संस्पर्शजाः विषयसंपर्कजातायेभोगाः आदिमत्वादंतवत्वाच्च
अनित्याः तेदुःखयोनयएव प्राप्तेषुसत्स्वपि वियोगदुःखस्याभिचारादप्रा
प्तेषु प्रार्थनादुःखस्याव्यभिचाराच्च दुःखस्यैवजनकाः अतस्तेषुभोगेषुबु
धउत्पन्नात्मबोधोनरमतेनप्रीतिंभजते [illegible]
[illegible] २२ ॥ ॥

113

ननुप्रियविषयभोगानपिनिहतेः कथंमोक्षःफलार्थी इत्यत आह ये
हीति हियस्मात् येसंस्पर्शजाविषयेंद्रियसंयोगजाः भोगाः तेआ
द्यंतवंतः उत्पत्तिनाशवंतः दुःखयोनयएव दुःखहेतवः हेकौंते
यतेषुभोगेषुबुधोविवेकीनरमते २२ ॥

इतिवीरसमिद्बोधिनी ॥

एवंबाह्यस्पर्शासंगस्यराज्यस्वर्गभोगब्रह्मसायुज्यलक्षणं त्रि॰
विधंसुखात्मकंफलमुक्त्वातत्संगस्यनरकादिलक्षणं दुःखात्म
कं तत्कथयंतस्ततः सकामान्निहंतिमनुष्यानिति येहीतिहिप्रसिद्धौ
निश्चये संस्पर्शजाभोगाइत्येकंपदं अभोगा आभोगाइत्यन्यतर॰
च्छेदआर्षःसंधिर्वा संस्पर्शोबाह्यपुरुमित्राद्यविषयेइंद्रियाणांस
न्निकर्षस्तस्माज्जायतेयो विक्षेपजनकोनेकविधविकल्पात्मको
मानसिकोव्यापारस्तस्माद्धेतोर्येभोगाः भोगःभुजपालनाभ्यव
हारयोरितिधात्वनुसारात् स्वधर्मपालनं तद्विपर्ययोभोगःस्व
धर्मत्यागः अथवाभोगोराज्यभोगानंगीकारः अथवाभोगःपरव
र्गोचितभिक्षापानादिलक्षणाउत्सितभोगस्वीकारः तेत्रयोपि
नरकादिदुःखकारणान्येवभवंति तथापिचतेआद्यंतवंतोनित्याः
अतश्चतेषुविषयेषुबुधोदीर्घदर्शीनरमते नरमेत नासक्तोभवे॰
दित्यर्थः यद्वा संस्पर्शोनप्रोक्तलक्षणादिंद्रियार्थसन्निकर्षाज्जाय
ते ये आभोगा विस्तारा अर्थात्कथंभीष्ममहंसंख्येइत्यादिग्रंथेनअ॰
प्रतिपादितस्वरूपविक्षेपकविकल्पानां ते दुःखप्रदाएव तेचाद्यं
तवंत उत्पत्तिविनाशशालित्वेननविभुमवस्थायिनः अतस्तेषु॰
विषयेषुयोवक्ष्याप्यात्यवेत्तानरमते तद्वशोनभवेदित्यर्थः
एतेनचद्वितीयाध्यायेमात्रास्पर्शास्त्वित्यत्रसूचितोर्थोविवृतः २२॥

मथभाष्य
येद्दीति तत्परित्यागं प्रशंसति ॥२२॥

114

भाषा अनुवाद

प्रिय जो विषय भोग तिन के निवृत्त होनेसे फेरि मुक्ति पुरुषार्थ अ
र्थात् परम प्रिय कैसे है इस संशय पर कहते हैं कि जो स्पर्श आ
दि विषय और उन विषयों से प्रगटजो सुख सो भोग समय मे सु
हो कहे और का अधिक सुख देवि इच्छा की वृद्धि औ आपदी हो
भव हैं और भोग पीछे कुछ नहीं हैं खाली चिंता मात्र करते हैं इन
सब हेतु वोंसे केवल दुख के कारण हैं और उन का आदि अन्त
भी है इस से हे कौंतेय विवेकी लो उस विषय सुख भोग मे नहीं र
मित होते है २२

१क

दोहा

बाह्य विषय के भोगजो दुखदायक यह होय होते नाशों
ऊंतिसन तिंह बुध रमत न सोय २२॥

115

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्ष
णात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

शांकरभाष्यं

अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवार्यश्चे
ति तत्परिहारे यत्नाधिक्यं कर्तव्यमित्याह भगवान् शक्नोतीति शक्नोत्यु
त्सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणात् आ
मरणात् इत्यर्थः मरणसीमाकरणं जीवतोऽवश्यंभावी हि कामक्रोधोद्भ
वो वेगः अनंतनिमित्तवान् हि स इति यावन्मरणं तावन्न विश्रंभणीय इत्य
र्थः कामः इंद्रियगोचरप्राप्ते इष्टे विषये श्रूयमाणे स्मर्यमाणे वानुभूते सुख
हेतौ या गर्धिः तृष्णा स कामः क्रोधश्चात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्य
मानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधः तौ कामक्रोधौ उद्भ
वो यस्य वेगस्य स कामक्रोधोद्भवो वेगः रोमांचनप्रहृष्टनेत्रवदनादिलिङ्गोऽंतः
करणप्रक्षोभरूपः कामोद्भवो वेगः गात्रप्रकंपप्रस्वेदसंदष्टौष्ठपुटरक्तनेत्रा
दिलिंगः क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवं वेगं य उत्सहते सोढुं सहितुं यु
क्तः स युक्तो योगी सुखी चेह लोके नरः ॥२३॥

उक्तश्लोकस्य तात्पर्यमाह अयं चेति श्रेयोमार्गप्र
सर्वेति प्रयत्नाधिक्यस्य कर्तव्यत्वे हेतुं सूचयति

आनन्दगिरिकृतटीका

तिपक्षत्वे कष्टतमत्वे हेतुत्वेनैव हेत्वन्तरमाह
दुर्निवार्य इति प्रसिद्धं हि कामक्रोधोद्भवस्य +

यावदिति कामक्रोधोद्भवं वेगं व्याख्यातुमादौ कामं मनोविकारविशेषत्वेन
व्याचष्टे काम इति कथमस्य मनोविकारविशेषत्वं तदाह इंद्रियेति कामोऽ
भिलाषस्तृष्णेति पर्यायाः अंतःकरणमनोविकारविशेषे पर्यवस्यतीत्यर्थः ।
क्रोधस्य मनोविकारविशेषत्वं दर्शयति क्रोधश्चेति तमेव क्रोधं स्फुटयति
आत्मन इति एवं कामक्रोधौ व्याख्याय तयोः कारणत्वं वेगस्यात्मनो वेगस्य ।
ताभ्यामुत्पत्तिमुपन्यस्यति ताविति यथोक्तवेगावगमोपायमुपदिशति रो
मांचनप्रहृष्टनेत्रेत्यादिना उभयविधवेगं यो जीवन्नेव सोढुं शक्नोति तं प्रकर्ष
धौरेयत्वेन स्तौति तमित्यादिना ॥२३॥

स्वामिकृतटीका

+ वेगस्य दुर्निवारत्वं येन मातरमपि चाधिरोहति पितरमपि हन्ति तमवश्यं परिहर्तव्यं दर्शयति शक्नोतीति यथोक्तं
वेगं बहिरनर्थरूपेण परिणामात्प्रागेव देहान्तरुत्पन्नं यः सोढुं क्षमते तं स्तौति स युक्त इति मरणसीमाकरणस्य
तात्पर्यमाह मरणेति प्रसिद्धो हि शब्दः तत्र हेतुमाह अनन्तेति व्याध्युपहतानां वृद्धानां च कामादिवेगा न भव
न्तीत्याशंक्याह इति ॥ +

गी॰
टी॰ पं
११६

तस्मान्मोक्ष एव परः पुरुषार्थः तस्य च कामक्रोधवेगोऽतिप्रतिपक्षः अत
स्तत्सहनसमर्थ एव मोक्षभागीत्याह शक्नोतीति कामात्क्रोधाच्चोद्भव
तीति वेगो मनोनेत्रलोमादिलक्षणो लिंगैः इहैव तदुद्भवसमय एव यो नरः सोढुं प्र
तिरोद्धुं शक्नोति तद्विनशनमात्रे किं तु शरीरविमोक्षणात्प्राक् [illegible] देहपातादि
त्यर्थः य एवंभूतः स एव युक्तः समाहितः सुखी चेति भवति नान्यः यद्वा मरणादू
र्ध्वं विलसंतीभिरालिंग्यमानोऽपि पुत्रादिभिर्दह्यमानोऽपि यथा प्राणशून्यः काम (युवतिभि)
क्रोधवेगं सहते तथा मरणात्प्रागपि जीवन्नेव सहते स एव युक्तः सुखी चेत्य (यः)
र्थः तदुक्तं वसिष्ठेन प्राणे गते यथा देहः सुखं दुःखं न विंदति तथा चेत्प्रा
णयुक्तोऽपि स कैवल्याश्रयो भवेत् २३ ॥

पिशाचभाष्यम्

अयं च श्रेयोमार्गप्रतिपंथी कष्टतमो दोषो दुर्वारश्च अतस्तत्परिहारे यत्नः क
र्तव्य इत्याह भगवान् शक्नोतीति शक्नोति सहते इहैव जीवन्नेव यः सोढुं प्रस
हितुं प्राक् पूर्वं शरीरविमोक्षणात् मरणात् मरणसीमाकरणाज्जीवतोऽवश्यं
भावी हि कामक्रोधोद्भवो वेगोऽनंतनिमित्तवान् हि यस्मात् तस्माद्यावन्मरणं तावत् न
विस्रंभणीय इत्यर्थः कामश्चेंद्रियगोचरप्राप्ते इष्टे विषये हृष्यमाने श्रूयमाणे
वानुभूते सुखहेतौ या गृध्नुस्तृष्णा स कामः [illegible] रोमांचप्रहृष्टवदननेत्रा
लिंगोऽन्तःकरणप्रभवः कामोद्भवो वेगः गात्रप्रकंपप्रस्वेदसंदष्टोष्ठपुटर
क्तनेत्रादिलिंगः क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवं वेगं यः प्रसहते सोऽत्र यु (ढुं सहितुं)
क्तो योगी सुखी च इह लोके नरः २३ ॥

क्रोधश्चात्मनः प्रतिकूले
ऽदुःखहेतुषु दृश्यमानेषु
श्रूयमानेषु स्मर्यमाणेषु वा यो
द्वेषः स क्रोधस्तौ कामक्रोधौ
उद्भवो यस्य वेगस्य स काम
क्रोधोद्भवो वेगः

रामानुजभाष्यम्

शक्नोतीति शरीरमोक्षणात्प्रागेव साधनदशायामेवात्मानुभवप्रीत्या
कामक्रोधोद्भवं वेगं सोढुं निरोद्धुं यः शक्नोति स युक्तः आत्मानुभवायार्हः
एवं शरीरविमोक्षणोत्तरकालमात्मानुभवसुखं संपत्स्यते २३ ॥

अभिनवगुप्तकृतटीका

तच्चैतद्दुःशकं शरीरान्तकालं यावत् क्रोधकामजो वेगः तन्मा
मात्रे यदि मनसानेन दत्तं तत्कौसुखप्राप्तिः २३

परमार्थप्रपा टीका

अथ स्वरूपानन्दाभिव्यञ्जकसामग्रीमाह शक्नोतीति यः पुरुष इहैव वर्त
६ मानेदेहे कामक्रोधोद्भवं वेगं सोढुं शक्नोति कामक्रोधाभ्यामुद्भवो यस्या ६
सौ मनोवेगस्तत्सहनशीलः तदपि नैरंतर्येणोत्पादस्यागीति शरीरविमो
क्षणात् प्राक् यावद्देहपातमित्यर्थः एवंभूत एव युक्तः स एव नरः स्वावीपु
रुषार्थी च भवति २३ ॥

वनमाली टीका

संन्यासविरोधी महाननर्थो वासिद्धेतः कामो महतां जेय इत्याह शक्नोतीति
आत्मनोनुकूलेषु सुखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु तद्गु
णानुसंधानाभ्यासेन योजायते आत्मकोभिलाषो लोभः स कामः यद्वा स्त्री
भोगतृष्णा कामः धनतृष्णा लोभः अत एव कामः क्रोधस्तथा लोभ इति पृ
न्या थक्वदन्ति इहतु तृष्णासामान्याभिप्रायेण कामशब्दप्रयुक्त इति लोभः पृथ
ग्नोक्तः एवमात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु तद्दोषानुसंधाना
भ्यासेन तु यः प्रज्वलनात्मको द्वेषो मन्युः स क्रोधः तयोर्लौकिकवेदविरोधप्रति
संधानप्रतिबंधकतया प्रहृष्टतनुरुहत्वनयनरूपनदीवेगसाम्येन वेग इत्युच्यते
यथा नद्या वेगो वर्षासु अतिप्रबलतया विरोधप्रतिसंधाने नानिष्टं तमपि गर्ते
पातयित्वा मज्जयति चाधो नयति च तथा कामक्रोधयोरपि वेगो विषयाभि
ध्यानाभ्यासेन वर्षाकालस्थानीयेनातिप्रबललोकवेदविरोधप्रतिसंधानेनानि
निष्टतममपि गर्ते पातयित्वा संसारसमुद्रे मज्जयति चाधो महारौरवं नयति चे
ति वेगपदप्रयोगेन सूचितं एतादृशं कामक्रोधोद्भवं वेगमन्तःकरणक्षो
भरूपं स्तम्भस्वेदाद्यनेकबाह्यलिंगं शरीरविमोक्षणात् शरीरविमोक्षणा
पर्यन्तमनेकनिमित्तवशात् सर्वदा संभाव्यमानत्वेनाविश्रंभणीयमन्तरुत्पन्न
मात्रे इहैव बहिरिंद्रियव्यापाररूपकार्यजननात् प्रागेव यो धृतिधीरस्तिमिं
गिल इव नदीवेगं विषयदोषदर्शनाभ्यासेन वशीकारसंज्ञावैराग्येण सोढुं त
दनुकूलकार्यासंपादनेनानर्थकं कर्तुं शक्नोति समर्थो भवति स एव युक्तो यो
गी स एव नरः पुमान् पुरुषार्थसंपादनात् इहोत्पन्नयोः कामक्रोधयोर्वेग
सहनेऽशक्तेन तयोरनुमतिमात्रेण नष्टोत इति २३

उत्तमवैजयन्ती टीका

ज्ञानयोगस्यनिरतिशयप्रतिपत्तः संसारप्राप्तिहेतुतमः कामादिजनितवेग
स्त्वतिशयप्रयत्नेनैवज्ञानाभ्यासवताऽसोढव्य इत्याह शक्नोतीति योज्ञाना
योगीहैवज्ञानसाधनदशायामेवशरीरविमोक्षणात् प्रागेवमरणात्पू
सहितः र्वमेवशरीरेऽपिवसाधनसिद्धिस्यादतः शरीरविमोक्षणात्प्रागित्युक्तम् यद्वा
शरीराद्विमोक्षणंतस्मात् यावदात्मनः कामाद्यनलज्वालयाऽऽपीडितस्यशरी
117 राद्विमोक्षणंतस्मात्प्रागेवकामक्रोधोद्भवंकामोऽनुकूलविषयत्स्मात्क्रोधः
केनचिद्विघ्नेनकामस्याभिघातात्तेनामनुस्ताभ्यामुद्भवोजातस्तंवेगंमनोने
त्रादिक्षोभरूपंस्वस्वरूपानुभवात्प्रच्यावनरागेनसोढुंनिरोद्धुंशक्नोतिसनरः सएव
मनुष्याणामः सचयुक्तः आत्मानुभवयोग्यः सचसर्वासुखस्वरूपानुभव
वेवानुभवतीत्यर्थः २३ ॥

मधुसूदनीटीका

सर्वानर्थप्राप्तिहेतुर्दुर्निवारोऽयंश्रेयोमा र्गप्रतिपक्षःकष्टतमोदोषमह
तायत्नेन मुमुक्षुणानिवारणीयइतियत्ना धिक्यविधानायपुनराह ॥

आत्मनोऽनुकूलेषुसुखहेतुषुदृश्यमानेषुश्रूयमाणेषुस्मर्यमाणेषुवात
धा द्गुणानुसंधानाभ्यासेनयोरत्यात्मकोगर्धोऽभिलाषस्तृष्णालोभः सकामः
स्त्रीपुंसयोः परस्परव्यतिकराभिलाषेवर्ततेनिरूढः कामशब्दः एतदभि
प्रायेणकामः क्रोधस्तथालोभइत्यत्रधनतृष्णालोभः स्त्रीव्यतिकरतृष्णा
म कामइतिकामलोभौपृथग्गृहीतौ इहतुतृष्णासामान्याभिप्रायेणकामशब्दप्र
युक्तइतिलोभःपृथङ्नोक्तः एवमात्मनः प्रतिकूलेषुदुःखहेतुषुदृश्यमा
नेषुश्रूयमाणेषुस्मर्यमाणेषुवातद्दोषानुसंधानाभ्यासेनयः प्रज्वल
नात्मकोद्वेषोमन्युःसक्रोधः तयोरुत्कटावस्थालोकवेदविरोधप्रतिसं
धानप्रतिबंधकतया प्रवृत्त्युन्मुखत्वरूपानदीवेगसाम्येन
वेगउच्यते यथाहिनद्यावेगोवर्षास्वतिप्रबलतयालोकवेदविरोधप्रतिसं
ज्ञनं धानेनानिच्छंतमपिगर्तेपातयित्वामज्जयतिचाधोनयतिच तथाकामक्रो
धयोरपिवेगोविषयाभिध्यानाभ्यासेनवर्षाकालस्थानीयेनातिप्रबलो
लोकवेदविरोधप्रतिसंधानेनानिच्छंतमपिविषयगर्तेपातयित्वासंसारस
मुद्रेमज्जयतिचाधोमहानरकात्प्रापयतिवेगपदप्रयोगेणसूचितं एतच्चाध्या
येनप्रकरणेऽपिविवृतं तमेतादृशंकामक्रोधोद्भवंवेगमंतःकरण
प्रक्षोभरूपंस्तंभस्वेदाद्यनेकबाह्यविकारलिंगमाशरीरविमोक्षणात् श
रीरविमोक्षणपर्यंतमनेकनिमित्तवशात्सर्वदासंभाव्यमानत्वेनाविश्व

भणीयंमंतःकरणमात्रमिहैवबहिरिंद्रियव्यापारानुपरतेपलनात्प्रागेवयो
यतिधीरःक्षिमिमिलःश्वक्तदीवेगंविषयदोषदर्शनाभ्यासजेनवशीकारसं
ज्ञावैराग्येणसोढुंतत्स्वरूपकार्यसंपादनेनानर्थकंकर्तुंशक्नोतिसमर्थो
भवतिसएवयुक्तोयोगीसएवसुखीसएवनरः पुमान्पुरुषार्थसंपाद
नात् तदितरस्त्वाहारनिद्राभयमैथुनादिपशुधर्ममात्ररतत्वेनमनुष्या
कारः पशुरेवेतिभावः प्राक्शरीरविमोक्षणादित्यत्रामरणादित्यव्याख्याने यथा
युवतिभि मरणादूर्ध्वंविलपंतीभिरालिंग्यमानोपिपुत्रादिभिर्दह्यमानोपिप्राणशू
न्यत्वात्कामक्रोधावेगंसहतेतथामरणात्प्रागपिजीवन्नेवयः सह
तेसयुक्तइत्यादि अत्रयदिमरणवज्जीवनेपिकामक्रोधानुत्पत्तिमात्रेणु
यात्तदैतत्फलंस्यात् यथोक्तंवसिष्ठेन प्राणेगतेयथादेहःसुखंदुःखंनविं
दति तथाचेत्प्राणयुक्तोपिसकैवल्याश्रमेवसेदिति इहतुतयोः का
मक्रोधयोर्वेगसहनेप्रसक्तेतयोरनुत्पत्तिमात्रेनदृष्टांतइतिकिमतिनिर्बंधेन २३

सदानंदी टीका

सर्वानर्थकरःश्रेयोमार्गशत्रुश्चरोषभूः समस्तप्राणितियत्नेनवारणी
यायमित्यजः १ यत्नाधिकविधानायपुनराहवचोमृतं स्वानुकूले
षुभोगेषुदृश्यमानेष्वनेकधा २ स्मर्यमाणेषुवाश्रूयमाणेषुवामृषि
केषुयः शोभनत्वगुणाध्यासोगर्द्धोरत्यात्मकःसच ३ कामस्तस्यादिप
र्यायः सर्वानर्थकरोनृणां आत्मनःप्रतिकूलेषुदुःखहेतुषुवस्तुषु ४
दृश्यमानेषुवाश्रूयमाणेषुस्वांतगेषुच तावदोषानुसंधानाभ्यासात्
प्रज्वलनात्मकः ५ द्वेषोमन्युःसचक्रोधस्तज्जोवेगस्तयोर्द्वयोः याचा
स्यतल्केदावस्यालोकवेदविरोधिनि ६ मार्गप्रवृत्तिहेतुत्वाद्वेगोनया
दयोयथा नद्यावेगोपिवर्षास्वप्रावल्पाल्लोकवेदयोः ७ विरोधिन्याय
निकेतंकूलगर्तेपातयत्ययः तथाकामादिजोवेगोलोकवेदविरोधिनि ८
भोगगर्तेध्यनिकेतंतिरयपातयत्ययः वितप्रक्षोभरूपेतंसंभवेद्वादिलिं
गकं ९ आमृत्याजीवमात्रेयइहैवएततन्मात्रया तद्दोषदर्शनाभ्यासज्ञा
नवैराग्यतेजसा १० सोढुंकर्तुंसमर्थोस्तिसयोगीससुखीनरः पुरुषार्थै स्ती
कनिष्ठत्वात्सएवपुरुषःस्मृतो ११ अन्यस्त्वाहारनिद्रादिपशुधर्मैकतत्प
रः नराकारःपशुर्ज्ञेयःपुरुषार्थपराङ्मुखः १२ मंदस्मितंकविरकांतिवि

गी
टी·पं

118

लाभसंतोषाभिलाषाभावि कामक्रोधरम्याकारमशोभयं ध्यानेस्वयेश्रितवतोरमया
नुचिंतश्रीकर्मनने व्रजति नाशमयेज्जदोषः १३ २३ ॥

नीलकंठी टीका

कः पुनर्मुख्यः सुखीत्याह शक्नोतीति इहैव जीवन्नेव देहे प्राक्शरीरवि
मोक्षणात् यावद्देहपातं मया कामक्रोधौ जितावितिविस्रंभेन कर्त्तव्य इत्य
र्थः कृते दृष्टे अनुमिते वा विषये योगादेः स्वस्मादूपोऽन्तर्मिश्वस कामः क्रोधा
त्तादृश एव विषये द्वेषस्तौ कामक्रोधौ उद्भवो यस्य वेगस्य स रोमांचहृष्टनेत्र
वक्त्रलिंगोऽन्तःकरणप्रलोभरूपः कामोद्भवो वेगः गात्रप्रकंपप्रस्वेदसंदष्टौ
ष्ठपुटरक्तनेत्रादिलिंगः क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवं वेगं सोढुं यः श
क्नोति स एव युक्तो योगी मुख्यः सुखी च नान्यः २३ ॥

आनंदी टीका

य इहैवास्मिन्नेव जन्मनि देहपातादर्वाक् देहस्थितिपर्यंतं कामोद्भवं वे
गमप्राप्तेप्राप्तेनार्थे परम् क्रोधोद्भवं वेगं प्रशमस्य नाशे विन्नज्वलं तं प्र
सोढुं शक्नोति स एवंविधो योगी योगारूढो भवति स एव सुखी अव्यय
सुखमोक्षसुखस्य भाजनं भवति २३ ॥

वुयस्यैवंविधस्यैव योगित्वं च सुखित्वं च प्रति रामकंठी टीका पादयितुमाह ॥
य इहैवास्मिन् शरीरे तिष्ठन्तदव्यभिचारविषयसंबंधवशादागहेषादिजं सं
रंभमात्मैकनिष्ठतया सोढुमवधीरयितुं देहत्यागादर्वागेव शक्नोति
प्रभवति स योगी समाहितः स च सुखी निरुद्धानंदलक्षणसमाधिफ
लवान् यतस्तत्त्वविदोऽपि केवलज्ञानवादिनो विषयेभ्यः पलायमाना
नायोगमभ्यस्यन्ति तेषामेतत्प्रेप्सुस्तु तेषां ततत्तायितुमतस्तु इहैव देहे
दुर्लभो योगस्तत्फलं चेति यदि परं तेन देहत्यागेन तदवाप्स्यन्ति यस्तु क
र्मयोगी स तस्मिन्नेव विषयेषु विलसमानः स्थितिः सजीवन्नेव सक्त इति स एव
च योगी सुखी चेत्युक्तम् २३ ॥ ॥

एवं विधस्यात्मज्ञानमबोधस्य क लासिकी वनराणी टीका मयोगावहितस्यापि विर्षुतान्मा
नंदस्य च लक्षणमाह ॥ यो योगी इहैव जीवन्दशायामेव शरीरत्यागात्प्रागेव कामात्क्रोधाच्चोत
पन्नं वेगं संरंभं मनोनेत्रक्षोभादिलक्षणीयं आत्मैकनिष्ठतया सोढु
मवधीरयितुं शक्नोति स युक्तः ध्यानेऽपि समाहितः स एव सुखी निरा

पकालेनिरूपणेनदृष्टरूपसमाप्ति फलभाक् नान्यः तदुक्तं प्रागोगते
यथादेहःस्वदेहःस्वंनविन्दति तथाचैतन्यागाफलोपिसकैवल्यासंयेभ
वेदिति येतुविषयेभ्यःपलायनपरायोगमभ्यस्यंति तेषांदुलीभोयोगम
न्फलंचेति [illegible] २२

पंचोलीटीका

अथैवमोक्षमार्गप्रतिबंधकः सर्वानर्थहेतुः दुर्निवार्यश्चकामक्रो
धोद्भववेगः अतस्तन्निरोधयत्नाधिक्यंकर्तव्यमित्याह शक्नोती
ति यः प्रमान् इहैवजीवन्नेवशरीरविमोक्षणात्पूर्वंकामक्रोधोद्भवं
वेगमनुभूतेदृष्टेश्रुतेस्मृतेवासुखहेतौविषयेयादृशीतृष्णासकाम
मः तथादृष्टेश्रुतेस्मृतेवादुःखहेतौविषयेआत्मनःप्रतिकूलोयो
द्वेषःसःक्रोधः वेगःरोमांचहृष्टनेत्रवदनलिंगोन्तःकरणप्रक्षोभ
रूपःसकामजोवेगः गात्रप्रकंपप्रस्वेदसंदष्टोष्ठपटव्याकरक्तनेत्रादि
लिंगचित्तप्रक्षोभरूपःसक्रोधोद्भववेगः तंकामक्रोधोद्भवंवेगंसोढुं
प्राक्नोतिसनरःयुक्तःयोगीसुखीच २३ ॥

रागावीरसमिहोधिनी ॥

अथयंदिनत्रयपर्यंतंयेतेइत्येतत्सर्वंविहायावंमान्सदनोपायंतत्फलं
चाह प्राप्नोतीति एवपाठोभिन्नक्रमः प्रागित्यनेनसंबध्यते यःप्र
मान् इहास्मिन्नुदेहशरीरविमोक्षणान्निष्क्रियत्वेनपात्रुभिरित्यक्ता
इत्याहुतोर्थःक्षरीरस्यदेहस्यविमोक्षणंत्यागस्तस्मात्प्रागेवपूर्वंका
लएव यावन्नरिपुभिरेत्यनिहन्यतेतावदेवेत्यर्थः कामक्रोधोद्भवं
वेगं कामप्रपंचक्रोधप्रपंचइत्यचनिरूपितस्वरूपोकामक्रोधौवासनं
स्पर्शजौ ताभ्यामस्यवेगमभोगलक्षणंविलासलक्षणंवासंमोहल
क्षणंवासोढुं प्राप्नोतिसमर्थोभवति सयुक्तः समत्वंयोगउच्यत
इत्युक्तेरुक्तलक्षणसमतात्मकयोगवान् योगःकर्मसुकौशलमि

युक्तेस्य प्रहृतिमत्वलक्षणकर्मयोगविशिष्टस्य निश्चयप्रवृत्तिह
यथानित्यर्थः अंतःसुखएवनरः सुखी येहिकामुष्मिकानंदप्राप्ति
स्यभवेदित्यर्थः २३॥

अथभाष्य

शक्नोतीति कामक्रोधोद्भवंवेगंसोढुंशक्नोति शरीरविमोक्ष
णात्प्राक् यथामनुष्यशरीरे सोढुंशक्यंतथानान्यत्रेतिभावः
ब्रह्मलोकादिस्वर्जितकामानामेवभवति तानिलक्षणंप्रपंचय
न्नुत्तरैः श्लोकैः आरामः परदर्शनादिनिमित्तं सुखं अत्र तत्परमा
त्मदर्शनादिनिमित्तं तत्सुखवत्प्रद्वन्द्वयेव्यक्तं अत्रतकामादि
त्वयव्यक्तमात्मसुखं स्वयंज्योतिष्ट्वाद्भगवतस्तद्यकेरंतर्ज्योतिः
सर्वेषामंतर्ज्योतिष्टेपिव्यक्तेविशेषः असंप्रज्ञातसमाधीनांबाह्य
दर्शनात् दर्शनेप्यकिंचित्करादेवप्राह्य उक्तंचैतत् दर्शनस्पर्श
संभाषाप्यसुखंजायतेनृणां आरामः सुखविस्तेयः सुखंकाम
त्वयोदितमितिनारदीये स्वज्योतिष्ट्वान्महाविष्णोरंतर्ज्योतिरुच्यत
इत्युक्तइतिच अंतःसुखत्वादेःकारणमाह ब्रह्मनिर्वाणमितीति पाप
क्षयाद्वैतद्भवतीत्याह २३॥

भाषा अनुवाद

इस से मुक्तिही परम पुरुषार्थ है और काम क्रोध से उत्पन्न जो लोभ सोई मुक्तिका प्रति पक्ष हैं अतएव उस वेग को जो सहि सके सोमुक्ति भागी होयगा यही कहते हैं कि शरीर रहते अथवाशरीर सामर्थ्य रहते हुये जो काम क्रोध केवेग को सहिलेने सके सोई नरयुक्त कहै आत्मरूप और सुखीहै २३

दोहा

देह विनाशसें पूर्वहि सहने समर्थ इहां जोय कामक्रोध
भव वेगकहुं सुखीयुक्तनर सोय २३॥

120

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः
सयोगीब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति २४

शांकरभाष्यं

कथंभूतश्च ब्रह्मणिस्थितोब्रह्मप्राप्नोतीत्याह भगवान् यइति योऽन्तरात्मनि। सुखंयस्य सोऽन्तःसुखस्तथान्तरेवात्मन्यारामः क्रीडायस्य सोऽन्तरारामस्तथैवान्तरात्मैव ज्योतिःप्रकाशोयस्यसोऽन्तर्ज्योतिरेव यईदृशः सयोगीब्रह्मनिर्वाणंब्रह्मणि निर्वृतिं मोक्षमिहजीवन्नेव ब्रह्मभूतःसन्नधिगच्छति प्राप्नोति २४

आनंदगिरिकृतटीका

ज्ञानस्यान्तरंगसाधनमात्मनिष्ठत्वं दर्शयन् प्रकृतं ब्रह्मविदमेव विशिनष्टि कथंभूतश्चेति यथान्तरेवसुखंन बाह्यैर्विषयैस्तथान्तरेव ज्योतिर्न श्रोत्रादिभिरतोविषयानन्तरविज्ञानरहित इत्याह तथेति यथोक्तविशेषणसमाधिमान् जीवन्नेव मुक्तिमधिगच्छतीत्याह सयोगीति आत्मन्यन्तरेव सुखमिति बाह्यविषयनिरपेक्षत्वं विवक्षितमन्तरारामत्वम् इन्द्रियादिविषयापेतामन्तरेण क्रीडाप्रयुक्तफलभाक्त्वमभिमतमिंद्रियादिजन्यप्रकाशाभ्युपगमात्मज्योतिष्ट्वमिष्टं यथोक्तविशेषणोसंपन्नः समाहितश्च जीवन्नेव ब्रह्मभावं प्राप्नोतिब्रह्मणि पर्यवसानेनिर्वृतिं सर्वानर्थनिवृत्त्युपलक्षितास्थितिमनतिशयानंदाविर्भावलक्षणात् प्राप्नोतीत्याह यईदृशइति २४

स्वामिकृतटीका

नकेवलंकामक्रोधवेगसहनसमर्थएवमोक्षंप्राप्नोति अपितु योऽन्तइति अन्तरात्मन्येवसुखंयस्यनविषयेषु अन्तरेवारामःक्रीडायस्यनबहिः अन्तरेवज्योतिर्दृष्टिर्यस्यनगीतनृत्यादिषु सएवंब्रह्मभूतः ब्रह्मणिभूतःस्थितः सन्ब्रह्मणिनिर्वाणंलयमधिगच्छतिप्राप्नोति २४

पैशाचभाष्यं

कथंभूतश्चब्रह्मणिस्थितोब्रह्मप्राप्नोतीत्यत्राहभगवान् योऽन्तइति यःअन्तःआत्मनिसुखंयस्यसोऽन्तःसुखस्तथान्तरेवात्मनिआरामःक्रीडायस्यसोऽन्तरारामस्तथान्तरात्मैवज्योतिःप्रकाशोयस्यसोऽन्तर्ज्योतिर्यईदृशःसयोगीब्रह्मनिर्वाणंब्रह्मनिर्वृतिमिहजीवन्नेवप्राप्नोतीत्यत्राहभगवान् ।

गी॰ योंतःसुखः [illegible] अंतःसुखो [illegible] अंतरारामः
टी॰ पं॰ क्रीडा यस्य सोंत [illegible] तथैव ज्योतिः [illegible] ज्योतिर्दृष्टि
र्यस्य स योगी [illegible] निर्वाणं [illegible] ब्रह्मभूतः सन्नधिगच्छति
प्राप्नोतीति २४

रामानुजभाष्यं

121 य इति यो बाह्यविषयानुभवं सर्वं विहाय अंतःसुखः आत्मानुभवैकसुखः।
अंतरारामः आत्मैकारामः स्वगुणैरात्मैव सुखवर्द्धको यस्य स तथोक्तः।
तथांतर्ज्योतिरात्मैकज्ञानो यो वर्त्तते स ब्रह्मभूतो योगी ब्रह्मनिर्वाणमात्मा-
नुभवसुखं प्राप्नोति २४

अभिनवगुप्तकृतटीका

अंतःसुखोंतरेव बाह्यानपेक्षि सुखं तत्रैव रमते तत्र चास्य प्रकाशः व्यवहारे
तु मूढमिव उक्तं च जडवद्विचरेद्वादमतिरिति २४

परमार्थप्रपाटीका

अथ न केवलं कामक्रोधसहनमात्रेण मोक्षः अपि तु योंतरिति यः पुरुषो
अंतःसुखः आत्मसुखवान् तथा अंतरारामः क्रीडा यस्य न बहिः स तथा अंत
र्ज्योतिः दृष्टिर्यस्य न बहिर्निमीलिताक्षः स योगी ब्रह्मभूतः ब्रह्मस्वरूपः सन्
ब्रह्मण्येव निर्वाणं लयं प्राप्नोति तदेवमंतस्तदुद्भवामः इति श्रुतेः २४

वनमालीटीका

जीवन्मुक्तस्य लक्षणमाह योंत इति अंतर्बाह्यविषयनिरपेक्षमंतरेवा-
भिव्यक्तस्वरूपसुखं यस्य सोंतःसुखः उक्तायतोंतः आत्मन्यभिव्यक्तस्वरूपा-
नंद एवारामो रमणं क्रीडा यस्य न तु बाह्यविषयेषु सुखसाधनेषु सोंतरारामः
उक्तमेवार्थमाह अंतर्ज्योतिरेव यः अंतरेवात्मनि ज्योतिर्विज्ञानं न बाह्येंद्रिये
यस्य सोंतर्ज्योतिरेवकारो विशेषणत्रयेपि संबध्यते असंप्रज्ञातसमाधौ प्र-
तिभासकाभावात् बाह्यादीनामननुभवः व्युत्थानकाले बाह्यदर्शनेपि वि-
क्षेपाभावाद् ब्रह्मदर्शनापेक्षया बाह्यदर्शनस्य दग्धपटन्यायेन वर्तमा-
नस्यापि प्राचुर्याभावात् इति स योगी ब्रह्मणि परमानंदघने स्वस्वरूपे निर्वाणं
समाप्तिं निवृत्तिरूपं सुखस्वरूपं ब्रह्माधिगच्छति ननु ब्रह्मभूतस्य कथं ब्र-
ह्मभावाप्तिः ब्रह्मभूते अज्ञानस्य सहकृतगुणाकलनमेव तन्निश्चयात् यथा ह्यनस्या

विद्यानाशेन तदाविर्भूतिर्भवति ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः य
था मृगतृष्णाकीटो भृंगो भवति तद्वत् अन्येषां तु चिन्मात्रस्य सदा
स्फुरणात् ब्रह्मत्वस्याहतस्य पश्चादाविर्भावनीयस्य विशेषस्याभावा
दसंगतमेवार्थद्वयः ॥ २४ ॥

ऊत्तमवैजयन्तीटीका

यस्यानुभवानुरागेण कामक्रोधजं वेगं सोढुं समर्थो भवेत्तमेवाह
य इति योऽन्तःसुखः बाह्यविषयान् शब्दादीन् विहायान्तरात्मनि स्वस्व
रूपे एव सुखमानो यस्य स तथा नान्येषु पत्नीपुत्रादिषु यथान्त
रारामः अन्तरात्मनात्मस्वरूपेणासहारामः क्रीडा यस्य स तथा नान्यै
नृत्यगानवादित्रादिना तद्वदङ्गनाजनेन वा तथान्तैरेव प्रकारेण यः अन्तर्ज्यो
तिरेवान्तरात्मन्येव ज्योतिर्दृष्टिर्ज्ञानाकारदृष्टिरवलोकनं यस्य स तथा ना
न्यस्मिन् प्राकृते विषयादौ दृष्टिरित्यर्थः स योगी फलानुसंधानरहितः
कर्मयोगवान् ब्रह्मभूतः सन् लब्धशुद्धस्वस्वरूपः सन् ब्रह्मनिर्वाणमा
त्मस्वरूपानुभवसुखमधिगच्छति सर्वथैव प्राप्नोतीत्यर्थः २४ ॥

मधुसूदनीटीका

कामक्रोधवेगसहनमात्रेणैव मुच्यत इति न किंतु अंतर्बाह्यविषयनिर
पेक्षमेव स्वरूपभूतं सुखं यस्य सोऽन्तः सुखो बाह्यविषयजनितसुखस्व | न्य इत्यर्थः कुतो बाह्यसुखाभावः
रूपेण आरामक्रीडा यस्य सोऽन्तरारामः त्यक्तसर्वपरिग्रहत्वेन बाह्यसुख | तत्राह अन्तः आत्मन्येव न तु स्त्र्यादि
साधनशून्य इत्यर्थः ननु त्यक्तसर्वपरिग्रहस्यापि यतेर्यदृच्छोपनतैः । | विषये बाह्ये सुखं यस्य
कोकिलादिमधुरशब्दश्रवणमंदपवनस्पर्शनचंद्रोदयमयूरनृत्यादिद
र्शनातिमधुरशीतलगंगोदकपानकेतकीकुसुमसौरभाघ्राणादि
भिर्ग्राम्यैः सुखोत्पत्तिसंभवात्कथं बाह्यसुखतत्साधनशून्यत्वमिति
तत्राह तथान्तर्ज्योतिरेव यः यथान्तरेव सुखं न बाह्यैर्विषयैस्तथान्तरेव
ज्योतिर्ज्योतिर्विज्ञानं न बाह्यैरिंद्रियैर्यस्य सोऽन्तर्ज्योतिः श्रोत्रादिजन्यशब्दा
दिविषयविज्ञानरहितः एवकारो विशेषणत्रयेपि संबध्यते समाधि
काले शब्दादिप्रतिभासाभावात् व्युत्थानकाले तत्प्रतिभासेपि मिथ्या
त्वनिश्चयान्न बाह्यविषयैस्तस्य सुखोत्पत्तिसंभव इत्यर्थः य एवं यथोक्त

विशेषणसंपन्नः सयोगी समाहितो ब्रह्मनिर्वाणं ब्रह्मपरमानंदरूपं का
ल्पितद्वैतोपशमरूपत्वेन निर्वाणं तदेव कल्पितत्वाभावव्याप्तिष्ठानात्मकत्वा
त् अविद्यावरणनिवृत्त्यापि गच्छति नित्यप्राप्तमेव प्राप्नोतीत्यर्थः सर्वदैव ब्र
ह्मभूतो नान्यः ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेः अवस्थितेरिति काशकृत्स्न
इतिन्यायाच्च २४ ॥

122

सदानन्दीटीका

एवं सर्वोपद्रवमूलं नाशपत्वेनाभिधायाथैव भूतब्रह्मानन्दप्राप्तिसाधन
मुच्यते १ आत्मन्येवं तः सुखं यस्य क्रीडा यस्यांतरात्मनि यस्यात्मन्येव विज्ञा
नेन बाह्येंद्रियैर्जैः २ वैषयिकं सुखं तस्य साधनेन तन्मात्रित्याख्या एतत्र
यं परित्यक्तं यस्य सर्वभाविकं मलं ३ भूमिकात्रितयेन दर्शितं इति
स्फुटं पंचम्यादित्रितयोंतेवासिष्टकृतनिर्णयं ४ समसमाहितयोगी ब्रह्म
सच्चिदानंदमद्वयं प्राप्य स्वैतशून्यत्वान्निर्वाणमागतागतं अविद्याकृ
तिबाधेन प्राप्तं प्राप्नोतीति तद्रूपः यद्यानितो विषयसारविचारणोत्थवै
राग्यदार्ढ्यात्समाधिसाधनानुभूतिः विस्मारयत्यखिलबाह्यसुखं विशुद्धं
तत्त्वं श्रीमत्कृदमानिशं हृदि भावयेहम् ९ २४ ॥

नीलकंठीटीका

कोसौ योगी यो न्यायः सुखी इत्युक्तं तत्राह य इति स्वांतं विषयसंगजाप्रीति
आरामः प्रीतिहेतुः स्त्र्यादिभिः सह क्रीडा ज्योतिः क्रीडोपकरणानां प्रका
शः तदेतत्त्रयं यस्यांतरेव सोंतःसुखोंतरारामोंतर्ज्योतिश्च न तु बहिरिंद्रिय
द्वारकमिति एवकारार्थः य एवंभूतः स योगी किमतोऽयमेवं ब्रह्मनि
र्वाणं गत्वा प्राप्य परमानंदं ब्रह्मरूपं इहैवाधिगच्छति यतो ब्रह्मभूतो जीव
न्नेव ब्रह्मदर्शनेन ब्रह्मभावं गतः २४ ॥

आनंदीटीका

तदेवस्याभाह – बाह्यस्पर्शेष्वसंगादंतः संयमेनैव भूमिजयेन सुखं यस्य सः तथैवां
तः जितायां भूमिकायामेवारामो भोगार्थो विश्रामो यस्य तथैवांतरे
व ज्योतिः प्रज्ञालोको यस्य सः योगी सः एम् २४ ॥

रामकंठीटीका

अतएव तत्स्वरूपमाह ॥

सुखंतत्क्रियाफलमभुक्तानिवृत्तिरारम्यतेस्मिन्नारामः सुखावहमवाधि
करणाज्योतिस्तदुभयव्यक्तिहेतुप्रकाशस्तत्त्रितयमप्यंतरात्मन्येवयस्य
मतादृशः सर्वत्रसंवेद्यमानेवस्तुनिविमलितोत्मप्रत्ययेनएवब्रह्मभू ता✓
ब्रह्मभूतो✓ तोब्रह्मपरमात्मस्वरूपंप्राप्तः परमेयोगंनिरुत्तरंसमाधिंगच्छतिप्राप्नो
ति [illegible] २४

अस्यैवयोगिनोभ्यासक्रमेण [illegible] टीका ज्ञानकाष्ठाधिरोहमाह ॥
सुखंबुद्धिवृत्तिसंवेद्यं आरामइतस्ततोभ्रमणंमनोवृत्तिः ज्योतिर्ज्ञाने
न्द्रियवृत्तिर्यस्यैतानि अंतरात्मन्यात्मन्येवनविषयेषुएवमभ्यासक्रमे
णब्रह्मभूतोजीवन्नेव ब्रह्मात्मभावंप्राप्तःसन् ब्रह्मणिनिर्वाणंलयं
प्राप्नोतिमुच्यतेइत्यर्थः नतुहियोगाय्यतमोमितयोगी तथाचश्रुतिः
ब्रह्मैवसन्ब्रह्माप्येतीति [illegible]
[illegible] २४ ॥

पंचोलीटीका

कथंभूतश्चब्रह्मणिस्थितोब्रह्मप्राप्नोतीत्याह योंतरिति आत्
मन्येवांतः आत्मन्येवसुखंयस्यनविषयेषुसः अंतरारामः अंत
आत्मन्येवारामःक्रीडायस्यनबहिःसः यः अंतर्ज्योतिः आत्मन्येव
ज्योतिःप्रकाशोयस्यनसूर्यादिषुसः योगीब्रह्मरूपःसन्ब्रह्मनि
र्वाणंब्रह्मणिनिवृत्तिंमोक्षंगच्छति २४ ॥

रणवीरसंक्षिप्तबोधिनी ॥

योंतःसुखइतियः अंतर्मनसिसुखंयस्यसशुद्धेसंतुष्टमनाइत्य
र्थः तथांतरारामः अंतर्बुद्धावेवासमंतादरमते आसक्तिंकरोती
त्यंतरारामः तथांतर्ज्योतिः अंतोनिश्चयात्मकांतःकरणमेव
ज्योतिःकार्याकार्यप्रकाशकंयस्यसयोगी सिद्ध्यसिद्धिविषय
विक्षेपराहित्यलक्षणसमतात्मकयोगारूढोविद्याविनयेत्यत्र
लक्षितसाम्ययोगारूढश्चकर्मकौशललक्षणयोगविशिष्ट

स्वब्रह्मभूतः ब्रह्मयजुर्वेदो भूः प्रहाणिकारणं यस्य स ब्रह्मभूः सम
रस्तस्माद्धेतोः ब्रह्मणि यजुर्वेदे भूर्निष्ठा तस्माद्धेतोर्वा ब्रह्मनिर्वा
णं परमेश्वरसायुज्यस्वरूपमधिगच्छति प्राप्नोति ब्रह्मभूत इति प्रथ
मांतं वा ब्रह्मणि यजुर्वेदप्रतिपाद्ये शुद्धे भूतः समः समं व्यवहर
त्रित्यर्थः युक्तेक्ष्मादौ हृते भूतं प्राणिनोते समे त्रिष्वित्यमरः २४

मथभाष्य

२४॥

भाषा अनुवाद

और केवल काम क्रोध का वेग जीतने हीसे मुक्त नहीं होय है औ र भी कहते हैं कि जो अपने अन्तरात्मा मे सुखी औ विषय भोग मे सुखी नहीं है और जो पुरुष आत्माराम होके आत्माही मे विहार करता औ बाहर के व्यापार से विरत तथा अन्त प्रकाश है अथवा आत्माही मे दृष्टि औ नृत्यगीत आदिक विषयों मे दृष्टि नहीं र खता है सोई योगी इह करके जीवतेही ब्रह्मरूप ब्रह्म मे लीन होता है २५

दोहा

अंतर सुखी अंतररमें त्यों अंतर ज्योति जोय योगी ब्रह्म निर्वाण
कहुं ब्रह्म होय मिलसोय २५॥

लभंतेब्रह्मनिर्वाणमृषयःक्षीणकल्मषाः ।
छिन्नद्वैधायतात्मानः सर्वभूतहितेरताः २५ ।

शांकरभाष्यं

किंचलभन्तइति लभन्तेब्रह्मनिर्वाणंमोक्षं ऋषयःसम्यग्दर्शिनः सन्न्या
सिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नद्वैधाः छिन्नसंशयाः य
तात्मानः संयतेंद्रियाः सर्वभूतहितेरताः सर्वेषांभूतानां हिते आनुकूल्येरता
अहिंसकाइत्यर्थः २५ ॥

आनंदगिरिकृतटीका

मुक्तिहेतोर्ज्ञानस्य साधनान्तरमाह किंचेति यज्ञादिनित्यकर्मानुष्ठाना
त्पापादिलक्षणं कल्मषंक्षीयते ततश्च श्रवणाद्यावृत्तेः सम्यक् दर्शनं जाय
ते ततोमुक्तिरप्रयत्नेनभवतीत्याह लभन्तइति ज्ञानप्राप्त्युपायान्तरं दर्शय
ति छिन्नेति श्रवणादिनासंशयनिरसनं कार्यकारणनियमनञ्च दयालुत्वे
नाहिंसकत्वमित्येतदपि सम्यक्ज्ञानप्राप्तौकारणमित्यर्थः अक्षरव्याख्या
नं स्पष्टत्वान्न व्याख्यायते २५ ॥

स्वामिकृतटीका

किंचलभंतइति ऋषयः सम्यग्दर्शिनः क्षीणंकल्मषंयेषांछिन्नं द्वैधंसंशयोये
षांयतः संयतआत्माचित्तंयेषांसर्वेषांभूतानांहितेरताःकृपालवः तेब्रह्म ये
निर्वाणंमोक्षंलभंते २५ ॥

पिशाचभाष्यं

किंच लभंतेब्रह्मनिर्वाणंमोक्षमृषयःसम्यग्दर्शिनःसन्न्यासिनः क्षीणकल्म
षाः षाःक्षीणपापादिदोषाः छिन्नसंशयाः यतात्मानःसंयतेंद्रियाः सर्वभूतहि
ते रताःसर्वेषांभूतानांहितेऽनुकूल्येरताः अहिंसकाइत्यर्थः २५ ॥

रामानुजभाष्यं

छिन्नद्वैधाःशीतोष्णादिद्वंद्वैर्विमुक्ताःयतात्मानः आत्मन्येवनियमितमनसः
सर्वभूतहितेरताः आत्मवत्सर्वेषांभूतानांहितेषुनिरताः ऋषयःद्रष्टारः आ
त्मावलोकनपराः यएवंभूतास्तेक्षीणाशेषात्मप्राप्तिविरोधिकल्मषाः ब्रह्म

निर्वाणंलभंते २५

अभिनवगुप्तकृतटीका

एतच्चैतेषामेवयेषांभेदसंशयरूपौग्रंथीविनष्टौ २५ ॥

परमार्थप्रपाटीका

अत्राधिकारिणमाह लभंतइति ऋषयः सम्यक्दर्शनात्क्षीणकल्मषाः शुद्ध
चित्ताः छिन्नद्वैधंसंशयोयेषांतेयतात्मानः संयतआत्मायेषांतेतथा सर्वेषां
भूतानांसुखावबोधनांतारतम्यवर्जंहितेरताः एवंविधाब्रह्मनिर्वाणंलभंते २५

वनमालीटीका

पापक्षयादेवपरमात्मदर्शनंज्ञानंभवतीत्याह लभंतइति प्रथमंनिःकामकर्मा
भिःश्रवणापनवृत्तैः क्षीणकल्मषाः ततोंतःकरणशुद्ध्याऋषयः सम्यग्व
स्तुविवेकसमर्थाः संन्यासिनस्ततः श्रवणादिपरिपाकेणछिन्नद्वैधाःनिवृ
त्तसर्वसंशयास्ततोमननिदिध्यासनाभ्यांसंयतात्मानः परमात्मन्येवैका
ग्रचित्ताः सर्वभूतेषुभगवतोंतर्यामिणोदृष्टात्मसमदर्शनात्स्वेनेनमुक्तानां
बहुत्वंस्पष्टमुक्तम् २५ ॥

वा सर्वभूतहितेरताः सर्वहित
वत्सर्वभूतहितंवाञ्छंतीत्यर्थः
एतादृशाः ब्रह्मनिर्वाणंब्र
ह्मणिनिर्वृत्तिंलभन्ते लभंत इ॰

ऊसमवैजयन्तीटीका

एवंभूतेनसाधनेनबहवः सिद्धाब्रह्मनिर्वाणंप्राप्ताइत्याह लभंतइति छि
न्नद्वैधाः छिन्नानिश्वाकल्लीकृतानिद्वैधानिशीतोष्णादिद्वन्द्वानियैस्तेतथा
आत्मसाक्षात्कारभवेनतत्तेवतेषांमनसिकिंचिदपिनास्तिविषयेष्वित्यर्थः सर्वभू
तहितेरताः स्वस्वरूपवत्सर्वेषांभूतानांहितेसदैवरताः प्रीतिशक्ताः ईदृ
शा ऋषयस्तत्वद्रष्टारः क्षीणकल्मषाः क्षीणानिक्षयंनीतानिकल्मषा
णिचिरकालसंचितानिपापानियैस्तेतथाएवंभूताः संतः ब्रह्मनिर्वाणंस्व
स्वरूपंलभंतेप्राप्नुवंति २५ ॥

मधुसूदनीटीका

मुक्तिहेतोर्ज्ञानस्यसाधनांतराणिविवृण्वन्नाह प्रथमंयज्ञादिभिःक्षीण
कल्मषाः ततोंतःकरणशुद्ध्याऋषयः सूक्ष्मवस्तुविवेचनसमर्थाःसंन्या
सिनः ततःश्रवणादिपरिपाकेनछिन्नद्वैधाः निवृत्तसर्वसंशयाः ततो
निदिध्यासनपरिपाकेनसंयतात्मनः परमात्मन्येवैकाग्रचित्ताः एतादृ॰

शाश्वद्वैतादर्शित्वेन सर्वभूतहिते रताः हिंसाशून्या ब्रह्मविदो ब्रह्मनि
र्वाणं लभंते यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः तत्र को मो
हः कः शोक एकत्वमनुपश्यत इति श्रुतेः बहुवचनेन तयोर्योर्देवानामि
त्यादिश्रुत्युक्ताः नियमदर्शनार्थं २५ [illegible]
[illegible] ॥

सदानंदीटीका

मुक्तिहेत्वात्मबोधस्य साधनांतरमुच्यते आद्वैतीक्षीणमलाः यद्वैश्छिन्न
संशयात्मदर्शने १ समर्थास्तत आत्मैक्यविचाराच्छिन्नसंशयाः निदि
ध्यासनदार्ढ्येन ब्रह्मण्येकाग्रचेतसः २ अद्वैतात्मधियापीरा सर्वभूत
हिते रताः हिंसाशून्या ब्रह्मविदो लभंते ब्रह्मनिर्वृतिं ३ २५ ॥

नीलकंठीटीका

लभंत इति ऋषयः सम्यग्दर्शिनः छिन्नद्वैधाः छिन्नसंशयाः यतात्
मानो जितचित्ताः २५ ॥

आनन्दीटीका

ऋषयो यथार्थदर्शिनो योगिनः क्षीणं नाशितं तात्त्वभूमिषु संयमेन त
पितं कल्मषं कर्मबंधनं यैः छिन्नं प्रकाशावरणान्नया हिगतं द्वैतं संश
यविपर्ययज्ञानं येषां ते महात्मनः प्रधानजयपर्यंत याः योगसिद्धा
हस्तं स्वातंत्र्यं प्राप्तमात्मा येषां अत एव सर्वभूतहिते रताः निर्वाणं प्रशा
न्तं ब्रह्मपरं तत्त्वं लभन्ते २५ [illegible] २५ ॥

रामकंठीटीका

यस्मात् — ये महात्मनश्छिन्नद्वैधाः सदितद्वैतप्रत्ययात्मकसंसारबंधशृंखलाः य
तः क्षीणकल्मषाः विनष्टाविलतानमयमहापातकाः ऋषयः सम्य
ग्दर्शिनः अत एव स्वरूपव्यतिरिक्तं वस्तुजातमपश्यंतः सर्वभूताना
मात्मन इव हिते उत्कलेव सततनिरताः अभिनिविष्टास्ते निर्वाणं नापवर्ग
येणासंस्पृष्टत्वात् प्रशान्तं ब्रह्मपरं तत्त्वं लभन्ते प्राप्नुवंति न तु येऽव्यतिरि
क्तत्वेन विषयात्मस्वमानास्तेभ्यः पलायंते ते हि द्वैतवन्त्वात् निर्मग्ना एव २५
[illegible] २५ ॥

नकेवलमागमसिद्धः पुरान लाभिन्न मधुसूदनी टीका नायमर्थः किंतुवर्तमानकाले

अतएव सिद्धोपीत्याह ॥

ऋषयोवहवः सम्यग्दर्शिनः सर्वभूतहितेरता मैत्र्यादिसंस्कारसंपन्नाः तदुक्तं मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति अतएव यतात्मानः परामर्शेन स्वीकृतस्वभावास्ततश्छिन्नद्वैधा ब्रह्मभावाभ्युत्थानुदितद्वैतप्रत्ययाः अतएव क्षीणकल्मषा विनष्टसर्वपहेतुकर्माणः एवंविधाश्च यापि ब्रह्मनिर्वाणं ब्रह्मणि लयं लभंते तदुक्तं नारदसंग्रहे यथाग्निभर्जितं वीजं नेह भूयः प्ररोहति [illegible] २५ ॥

126

पंचोलीटीका

किंच लभंत इति ऋषयः सम्यग्दर्शिनः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेंद्रियाः कायवाङ्मनोभिः सर्वानुकूलेरताः ब्रह्मनिर्वाणं मोक्षं लभंते २५ ॥

रणवीरसमिद्धोधिनी ॥

लभंत इति ऋषयो राजर्षयो ब्रह्मनिर्वाणमुक्तलक्षणं लभंते तत्र हेतुः क्षीणं स्वधर्माचरणेन नष्टं कल्मषमनेकजन्मार्जितं पापं येषां ते क्षीणकल्मषाः अत्रापि हेतुः छिन्नद्वैधाः छिन्नं दूरीकृतं द्वैधं भेदसंशयरूपं यैस्ते अमे गुरुपितामहादयो न हंतव्या इति विशेषदर्शनं भेदः जयो भवेन्न वेत्येवं रूपः अयं तु दुर्मार्गो हितः स्यान्न वेत्यादिरूपश्च संदेहः अत्रापि हेतुः यतात्मानः निगृहीतांतःकरणाः अत एव ते सर्वेषां सतामसतां चाहिते रताः प्रवृत्ताः तु इदमनेन निरुपद्रवीकरणं सतां हितं असतां पापयेन पापार्जितपापैककारिदेहविनाशनेन स्वर्गादिप्रापणं तदितिभावः २५

मध्वभाष्य

लभंतइति क्षीणकल्मषाभूत्वाछिन्नद्वैधायतात्मानः द्वैधा
भावोद्वैध्यं संशयोविपर्ययोवा तदुक्तं विपर्ययः संशयोवा
यद्वैध्यमेवंकृतात्मनो ज्ञानासिनाहतंछित्वामुक्तसंगः परंव्रजे
दिति छिन्नद्वैधास्तएवयतात्मनः दीर्घमनसः सर्वज्ञाइत्यर्थः
तएवछिन्नद्वैधाः तदुक्तम् क्षीणपापामहात्मानोनाशयंते
गतसंशयाइति छिन्नद्वैधायतात्मनइतिवा लभंतेचतेषां
ब्रह्मेत्याह २५ ॥

127

भाषा अनुवाद

मुक्ति का हेतु जो ज्ञान तिस की साधन उपाय प्रकारान्तर केहि दूसरी तरह से कहते हैं कि ऋषि कहे सम्यक् दर्शी सन्यासी लोग जो यज्ञ आदि नित्य नैमित्तिक कर्म करि क्षीण कल्मष कहे निःपाप औ निःपापहो के श्रवण आदि से ज्ञानके द्वारा छिन्न द्वैध कहे संशय रहित होगये है और जिन का चित्त औ इन्द्रियगण वशीभूत है औ प्राणियों के हितकारी दयालस्वभाव अर्थात् हिंसा रहित है वेई ब्रह्म मे लयरूप मोक्ष पावते है २५॥

दोहा

पावें ब्रह्मनिर्वाण कहुंऋषिहुं भए गतपाप छीणहुंद्वैतमन वशसभी भूतहिते रतआप २५॥

128

कामक्रोधवियुक्तानां यतीनां यतचेतसां
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां २६

शांकरभाष्यं

किंचकामेति कामक्रोधवियुक्तानां कामश्चक्रोधश्च कामक्रोधौ ता
भ्यां वियुक्तानांयतीनां संन्यासिनां यतचेतसांसंयतान्तःकरणानां अ
भित उभयतोजीवतां मृतानांचब्रह्मनिर्वाणं मोक्षोवर्तते विदितात्मनां
विदितोज्ञात आत्मायेषांते विदितात्मानस्तेषांविदितात्मनांसम्यग्दर्शिनामित्यर्थः २६

आनन्दगिरिकृतटीका

पूर्वंकामक्रोधयोर्वेगः सोढव्योदर्शितः संप्रतितावेववर्ज्यावित्याह किं
चेति ननुदर्शितविशेषवतां मृतानामेव मोक्षो न तुजीवतामिति चेन्नेत्या
ह अभितइति अस्मदादीनामपि तर्हि प्रभूतकामादिप्रभावविधुराणां
किमिति मोक्षो न भवतीत्याशंक्यसम्यग्ज्ञानवैशेष्याभावादित्याह वि
दितेति उक्तेऽर्थेश्लोकान्तराणामनुयमाचष्टे कामक्रोधेत्यादिना २६ ॥

स्वामिकृतटीका

किंचकामक्रोधेति कामक्रोधाभ्यांवियुक्तानां संन्यासिनांसंयतचित्तानां यतीनां
ज्ञातात्मतत्त्वानामभितउभयतोमृतानांजीवतांचनदेहान्तएवतेषां
ब्रह्मणिलयः अपितुजीवतामपिवर्तत इत्यर्थः २६ ॥

पैशाचभाष्यं

कामक्रोधवियुक्तानां कामश्चक्रोधश्चतौकामक्रोधौताभ्यांवियुक्तानां। यतीनांसंन्यासिनां
यतचेतसांसंयतान्तःकरणानामभितउभयतः जीवतांमृतानांचब्रह्म
निर्वाणंमोक्षोवर्ततेविदितात्मनांविदितोज्ञातः आत्मायेषांतेविदितात्मा
नस्तेषांसम्यग्दर्शिनामित्यर्थः अस्मत्पूर्वेषांसंन्यासिनां [illegible]
[illegible]
[illegible] भगवान्चेदव्यो
इत्याहच २६ ॥

कामक्रोधवियुक्तानां यतीनां यतचेतसां
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां २६

शांकरभाष्यं

किंच कामेति कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ता
भ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानां अ
भित उभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते विदितात्मनां
विदितो ज्ञात आत्मा येषां ते विदितात्मानस्तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः २६

आनन्दगिरिकृतटीका

एवं कामक्रोधयोर्वेगः सोढव्यो दर्शितः संप्रति तावेव वर्ज्यावित्याह किं
चेति ननु दर्शितविशेषवतां मृतानामेव मोक्षो न तु जीवतामिति चेन्नेत्या
ह अभित इति अस्मदादीनामपि तर्हि प्रसृतकामादिप्रभावविधुराणां
किमिति मोक्षो न भवतीत्याशंक्य सम्यग्ज्ञानवैशिष्ट्याभावादित्याह वि
दितेति उक्तेऽर्थे श्लोकाक्षराणामन्वयमाचष्टे कामक्रोधेत्यादिना २६ ॥

स्वामिकृतटीका

किंच कामक्रोधेति कामक्रोधाभ्यां वियुक्तानां संन्यासिनां संयतचित्तानां यतीनां
ज्ञातात्मतत्त्वानामभित उभयतो मृतानां जीवतां च न देहान्त एव तेषां
ब्रह्मणि लयः अपितु जीवतामपि वर्तत इत्यर्थः २६ ॥

पिशाचभाष्यं

कामक्रोधवियुक्तानां कामश्च क्रोधश्च तौ कामक्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां
यतचेतसां संयतान्तःकरणानामभित उभयतः जीवतां मृतानां च ब्रह्म
निर्वाणं मोक्षो वर्तते विदितात्मनां विदितो ज्ञातः आत्मा येषां ते विदितात्मा
नस्तेषां सम्यग्दर्शिनामित्यर्थः [illegible]
[illegible]
[illegible] भगवान्प्रदर्शयती
त्याह च २६ ॥

गी॰ उक्तगुणानां ब्रह्मात्मैतत्सुलभमित्याह कामक्रोधवियुक्तानामिति य
टी॰पं॰ तीनां यतशीलानां यतचेतसां नियमितमनसां जितात्मनां विविक्तमन
सां ब्रह्मनिर्वाणमभितो वर्त्तते एवंभूतानां हस्तस्थं ब्रह्मनिर्वाणमित्यर्थः २६

129

अभिनवगुप्तकृतटीका

तेषां सर्वतः सर्वास्ववस्थासु ब्रह्मसत्ता या पारमार्थिकी न निरोधकालेऽप्रवर्तते २६

परमार्थप्रपाटीका

किंच कामेति कामक्रोधाभ्यां परमवैरिभ्यां वियुक्तानां यतचेतसां नियमितमनसां यतीनां संन्यासिनां विदितात्मनां ज्ञातात्मतत्त्वानां अभितो जीवतां मृतानां वा ब्रह्मनिर्वाणं वर्तते २६ ॥

वनमालीटीका

पूर्वं कामक्रोधयोरुत्पन्नयोरपि वेगः सोढव्य इत्युक्तमधुना तयो
रुत्पत्तिप्रतिबंध एव कर्तव्य इत्याह कामेति कामक्रोधयोर्योगस्तद्वृत्त्यु योर्वि
त्पत्तिरेव तद्वियुक्तानां कामक्रोधवियुक्तानां यतचेतसां संयतचित्तानां
नां यतीनां यत्नशीलानां संन्यासिनां विदितात्मनां साक्षात्कृतपरमात्
मनां अभितः उभयत्र जीवतां मृतानां च तेषां ब्रह्मनिर्वाणं मोक्षो वर्तते २६

उत्तमवैजयन्तीटीका

एवंभूतानां ज्ञानवतां योगिनां करामलकवद्ब्रह्मनिर्वाणं भवतीत्याह । कामक्रोधवियुक्तानामिति कामक्रोधवियुक्तानां कामक्रोधाभ्यां विरहितानां यतचेतसां आत्मनियतानि उपरतानि चेतांसि येषां ते तथा। तेषां विदितात्मनां विदितो ज्ञात आत्मा स्वस्वरूपं यैस्ते तथा तेषां विज्ञाततत्त्वयाथात्म्यस्वरूपाणामित्यर्थः ईदृशानां यतीनामात्मदर्शनाय यत्नपराणामभितः सर्वतः सर्वास्ववस्थासु जाग्रदादिषु जन्मजराजीवनमरणादिषु वा ब्रह्मनिर्वाणमात्मस्वरूपं वर्तते एवंभूतानां हस्तगतफलवद्ब्रह्मनिर्वाणं भवतीत्यर्थः २६ ॥

मधुसूदनीटीका

पूर्वं कामक्रोधयोरुत्पन्नयोरपि वेगः सोढव्य इत्युक्तमधुना तु तयोरुत्पत्तिप्रतिबंध एव कर्तव्य इत्याह ॥

कामक्रोधयोर्वियोगस्तद्वन्तस्तैरेव तत्कृतानां कामक्रोधवियुक्तानां
यत अत एव यतेन्द्रियाणां संयतचित्तानां यतीनां यत्नशीलानां संन्यासिनां विदिता
त्मनां साक्षात्कृतपरमात्मनां अभित उभयतो जीवतां मृतानां च तेषां
ब्रह्म[illegible] निर्वाणं मोक्षो वर्तते नित्यत्वात् न तु भविष्यति साध्यत्वाभावात् २६
[illegible] सर्वभावस्य [illegible] कारणानि [illegible]
[illegible] स्वरूपस्य [illegible] भगवान्
[illegible] निर्वाणम् [illegible]
चित्तदेशमवकाशे [illegible] भगवान् एवं यानेव हि
स्थानीयः [illegible] विवक्षति [illegible] योगम्
वते [illegible] परमात्मना [illegible] विवेकः ॥ ॥

मधुसूदनी टीका

पूर्वमुत्पन्नयोर्वेगः सोढव्यः कामक्रोधयोः उक्तोऽधुना तयोर्जन्मप्रति
बन्धार्थमुच्यते १ कामक्रोधवियोगस्तदनुत्पत्तिर्विगलिता तद्वतां यत्न
शीलानां समाहितधियां सतां २ साक्षात्कृतात्मतत्त्वानां मृतानां
जीवतामपि तेषां हि वर्तते मोक्षो नित्यत्वात् स्वस्वरूपकः ३ २६ ॥

नीलकंठी टीका

किंच कामेति अभितो जीवतां मृतानां च विदितात्मनां ज्ञातात्मतत्त्वानां २६

आनन्दी टीका

एतदेव विशिनष्टि ॥
यतीनां निर्जितेन्द्रियग्रामाणां तथा यतं संयमनिश्चलीभूतं चेतो ये
षां अभितः सर्वेषु महत्त्वेन व्यापकत्वेन प्रकाशावरणाद्याहितः
ज्ञात आत्मा ब्रह्मस्वरूपः यैस्तेषां विदितात्मनाम् २६ ॥

रामकंठी टीका

एतदेव विशिनष्टि ॥
ये रागद्वेषादिदोषविवर्जितत्वेन यतचेतसो निगृहीतान्तःकरणा अनन्तविषय
विमुखत्वेन तेषां विदितात्मनां विज्ञातपरमकारणस्वरूपाणां मुख्यल
क्षणयुक्तानां यतीनां परमयोगिनां यथोक्तं निर्वाणं ब्रह्माभितः सा
मुख्येन वर्तते [illegible]
पादयितुमाह २६ ॥

+ विकल्पक्षीणचित्तस्य तथाभूयो न संसृतिरिति न केवलमीदृशां महात्मनां विदेहमुक्तिरेव यावज्जीवन्मुक्तिरपीत्याह ॥ [illegible]टीका

गी॰

टी॰चं॰ + विदितात्मनाम् विज्ञातपरमार्थानाम् यतचेतसाम् व्युत्थानेपि आत्मप्रत्यवमर्शेन नियमितान्तःकरणानाम् यतीनां ध्यानयोगाभ्यासपाटवेन प्रयत्नशीलानाम् अत एव कामक्रोधवियुक्तानां अभितो जीवतां मृतानां वा ब्रह्मनिर्वाणं वर्तते जीवन्त एव मुक्ता इत्यर्थः [illegible] २६ ॥

130

पंचोलीटीका

किंच कामक्रोधेति कामक्रोधवियुक्तानां संन्यासिनां संयतान्तःकरणानां अभित उभयथा जीवतां मृतानां वा ब्रह्मनिर्वाणं मोक्षं वर्तते विदितात्मनां आत्मविदां २९ ॥

रणवीरसमिद्धोधिनी ॥

कामक्रोधेति उक्तलक्षणकामक्रोधरहितानां यतीनां निर्जितेन्द्रियग्रामाणां यतचेतसां स्वायत्तीकृतान्तःकरणानां विदितात्मनां विदिताः सर्वैर्ज्ञाताः प्रसङ्कटा इति यावत् आत्मानो यत्नदृष्टि बुद्धिस्वभावा येषां तेषामभितः संमुखं समीप एव वा ब्रह्मनिर्वाणं मोक्षसुखं वर्तते २६ ॥

मध्वभाष्य

कामक्रोधेति अभितः सर्वतः आनप्रकारमाह २६ ॥

भाषा अनुवाद

और काम क्रोधसे विमुक्त ज्ञानी जन संन्यासी यतचित्त लोग विदित है आत्मा जिन को ते जीवित औ मृत दोनो अवस्था मे मुक्त है ऐसा नहीं कि देहान्त मे वे मुक्ति पावें गे वे जीवते भी ब्रह्म के साथ एकरूप होय जीवन्मुक्त ऐसे प्रसिद्ध होते है २६॥

दोहा

काम क्रोधसें रहित जो यती जित चित जोहि भासे ब्रह्मनिर्वाण सम लहि स्वरूप जिनको हि २६॥

131

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २७

शांकरभाष्यं

सम्यग्दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता कर्मयोगश्च ईश्वरा
र्पितसर्वभावेनेश्वरे ब्रह्मण्याधाय क्रियमाणः सत्वशुद्धिज्ञानप्राप्तिसर्
वकर्मसंन्यासक्रमेण मोक्षायेति भगवान् पदेपदेऽब्रवीद्वक्ष्यति च अथ
इदानीं ध्यानयोगं सम्यग्दर्शनस्यांतरंगं विस्तरेण वक्ष्यामीति तस्य सू
त्रस्थानीयान् श्लोकानुपदिशति स्म भगवान्वासुदेवः स्पर्शानिति स्प
र्शान् शब्दादीन् कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणांतर्बुद्धौ प्रवेशिताः शब्दा
दयो विषयास्तानचिंतयतः शब्दादयो बाह्या बहिरेव कृता भवंति तानेवं ।
बहिः कृत्वा चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते तथा प्राणापानौ नासाभ्य
न्तरचारिणौ समौ कृत्वा २७ ॥

आनंदगिरिकृतटीका

वृत्तमनूद्योत्तरश्लोकत्रयस्य तात्पर्यार्थमाह सम्यग्दर्शनेति ईश्वरार्पित
सर्वभावेनेति भगवति परस्मिन्नीश्वरे समर्पितः सर्वेषां देहेंद्रियमनसां
भावश्चेष्टा विशेषेण क्वचिदपि विशिष्टो व्यापारस्तेनेत्यर्थः कर्मयोगस्य ।
तत्फलस्य चाभिधानानंतरमित्यर्थः शब्दार्थः स्वतो बाह्यानां विषयाणां कु
तो बहिष्करणमित्याशंक्याह श्रोत्रादीति तेषां बहिष्करणं कीदृगित्याशंक्या
ह तानिति २७ ॥

स्वामिकृतटीका

सयोगी ब्रह्मनिर्वाणमित्यादिश्लोकेऽयोगी मोक्षमाप्नोतीत्युक्तं तमेव योगं दर्शय
न्नाह स्पर्शानिति द्वाभ्यां बाह्या एव स्पर्शा रूपरसादयो विषयाश्चिंतिताः स
न्तोंऽतः प्रविशंति तांस्तच्चिंतापरित्यागेन बहिरेव कृत्वा चक्षुश्च भ्रुवोरंतरे भ्रूम
ध्य एव कृत्वा अत्यंतं नेत्रयोर्निमीलने निद्रया मनो लीयते उन्मीलने च बहिः
प्रसरतीति तदुभयदोषपरिहारार्थमर्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः ।
उच्छ्वासनिःश्वासरूपेण नासिकयोरभ्यंतरे चरंतौ प्राणापानौ ऊर्ध्वाधोगतिनि

गी·
टी·पं·

रोधेन समौ कृत्वा कुंभयित्वेत्यर्थः यद्वा प्राणो यथा बहिर्न निर्याति यथा वा
पानो नं तनं प्रविशति किं तु नासामध्य एव द्वावपि यथा चरतः तथा मंदाभ्यामु
च्छ्वासनिःश्वासाभ्यां समौ कृत्वेति २८ ॥

पैशाचभाष्यम्

अथेदानीं सम्यग्दर्शनांतरंगं ध्यानयोगं विस्तरेण वक्ष्यामीति तत्र सूत्र
स्थानीयान् श्लोकानुपदिशति स्पर्शानिति स्पर्शान् शब्दादीन् कृत्वा बहिर्बा
ह्यान् श्रोत्रादिद्वारेणांतरे बुद्धौ प्रवेशिताः शब्दादयो विषयास्तानचिंतयतो बा
ह्या बहिरेव कृता भवंति तानेव बहिः कृत्वा चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते

तस्य पूर्णानन्दिष्टानां संन्या-
सिनां सद्यो मुक्तिरुक्ता कर्म
योगस्त्वीश्वरार्पितसर्वभा
वेनेश्वरे ब्रह्मण्याधाय क्रि
यमाणः सत्त्वशुद्धिज्ञान
प्राप्तिसर्वकर्मसंन्यासक्र
मेण मोक्षायेति भगवान्न्य
पदेवोचदिहस्थितिच

प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २८

रामानुजभाष्यं

उक्तं कर्मयोगं स्वलक्ष्यभूतयोगशिरस्कमुपसंहरति स्पर्शानिति द्वाभ्यां बाह्या
न्विषयस्पर्शान् बहिः कृत्वा बाह्येंद्रियव्यापारं सर्वमुपसंहृत्य योगयोग्यासने ऋजुका
य उपविश्य चक्षुषी भ्रुवोरंतरे नासाग्रे विन्यस्य नासाभ्यंतरचारिणौ प्राणापानौ
समौ कृत्वोच्छ्वासनिश्वासौ समगती कृत्वा आत्मावलोकनतत्परस्य २८

अभिनवगुप्तकृतटीका

बाह्यस्पर्शान् बहिः कृत्वा नेत्रीकृत्य भ्रुवोर्वा मध्ये तिष्ठत् दृष्टिः ज्ञोपरमाख्य
कयोरंतरे तद्रहितस्थानविशेषे वृत्तरूपलक्षितानि सर्वेंद्रियाणि विधाय
प्राणापानौ धर्माधर्मौ वितर्कौ अभ्यंतरे साम्येनावस्थाप्यासीत न मनते कादि
लेना साम्येन ज्ञात्वा दिवशाद्यवहरतीति नासा विज्ञवृत्तिः एतदेव वाचि २८

परमार्थप्रपाटीका

अथ तमेव योगं संक्षेपेणाह स्पर्शानिति द्वाभ्यां स्पर्शानिति बाह्यान्विषयान् श
ब्दादीन् बहिरस्मरणाद्विषयान् कृत्वा हृदयतो विसृज्य तथा भ्रुवोरंतरे भ्रूमध्ये
चक्षुः कृत्वा अत्यंतं नेत्रनिमीलनेन निद्रा भवति उन्मीलनेन च बहिः प्रसरति
तदुभयदोषपरिहारार्थमर्धनिमीलनेन भ्रूमध्ये दृष्टिं न्यायेत्यर्थः तदुक्तं
योगमार्तंडे भ्रुवोरंतर्गता दृष्टिर्मुद्रा भवति शांभवी २८ ॥

वनमालीटीका

परमेश्वरार्पितकर्मणां ततः करणशुद्धिस्ततः श्रवणादिजन्यज्ञानेन ततः सं

132

म्यासस्ततो विविक्तिमस्तेद्रूपूर्वकभगवदाराधनेनततः प्रसादस्ततो मोक्ष
इत्युक्तं अथुनासयोगीब्रह्मनिर्वाणमित्यत्रसूचितंध्यानयोगंसम्यग्दर्शना
नस्यांतरंगसाधनंविस्तरेणावक्ष्यमाणस्यानीयांस्त्रीन्श्लोकानाह सप्तमषष्ठप्रपंच
स्यैवप्रपंचः तत्रद्वाभ्यांसंक्षेपेणसांख्ययोगउच्यते तृतीयेनतत्फलंपर
मात्मज्ञानमित्याशयेनाहस्पर्शानिति स्पर्शान्शब्दादीन्वाह्यान्बहिर्भ
वानपिश्रोत्रादिद्वारान्तदाकारांतःकरणवृत्तिभिरंतःप्रविष्टान्पुनर्बहि
रेवकृत्वापरवैराग्यवशेनतत्तदाकारांतःकरणवृत्तिमनुत्पाद्येत्यर्थः अ
तःस्वभावानामपायसहस्रेणापिबहिर्भावोनसंभवतिस्वभावभेदप्रसं
गात् वाह्यानांरागतोंतःप्रविष्टानांवैराग्येणपुनर्वहिर्भावःस्यादितिद
र्शयितुंवाह्यानित्युक्तं वैराग्यमुक्त्वाभ्यासमाह चक्षुश्चैवांतरेभ्रुवोः कृ
त्वेत्यनुषंगः अत्यंतनिमीलनेहिनिद्राख्यालयात्मिकावृत्तिरेकाभवेत्
प्रमाणेतुप्रमाणविपर्ययविकल्पस्मृतयश्चतस्रोविक्षेपात्मिकावृत्त
योभवेयुः पंचापिह्येतायोनिरोद्धव्याःइत्यर्धनिमीलनेनभ्रूमध्येचक्षुषोनि
धानेनतथाप्राणापानौसमौतुल्याहृर्ध्वाधोगतिविच्छेदेननासाभ्यंतरचा
रिणौकुंभकेनकृत्वेत्यर्थः २७ ॥

उत्तमवैजयन्तीटीका

एवंखलुज्ञानस्यस्वात्मप्राप्तिलभोपायभूतस्ययोगस्यश्रेष्ठत्वमुक्तमि
दानींकर्मयोगमुपसंहरन्समाधिप्रकारमाह द्वाभ्यामस्पर्शान्कृत्वेति
वाह्यान्वहिस्थान्स्पर्शान्शब्दादिविषयान् तद्रूपादिचिंतनेनचित्त
स्यान्वहिःकृत्वातच्चिंतनपरित्यागंकृत्वाचैलाजिनकुशोत्तरमितिवक्ष्य
माणप्रकारेणयोगयोग्ये आसनेऋजुकायशिरोग्रीवइतिवक्ष्यमाणप्र
कारकोयोगीउपविश्यभ्रुवोर्भ्रूकुट्योरंतरेमध्येचक्षुःचक्षुषीकृत्वानेत्रयोः
प्रोन्मीलनेसतिमनसोवहिःप्रसारःसंनिमीलनेचनिद्रयानस्यलयस्या
दतस्तदुभयोर्निवारणायार्धनिमीलनेनभ्रूमध्येदृष्टिंनिधायेत्यर्थः त
थैवनासाभ्यन्तरचारिणौनासिकायाःअभ्यंतरेचरितुंशीलंययोस्तौ
तथाप्राणापानौ ऊर्ध्वाधोगतिरूपेणनिरोधेनसमौतुल्यौकृत्वाकुंभयित्वे
त्यर्थः २७ ॥

मधुसूदनीटी॰

एवमीश्वरार्पितसर्वभावस्यकर्मयोगेनांतःकरणशुद्धिस्ततःसर्वकर्मसन्यासः ततःश्रवणादिपर
स्यतत्त्वज्ञानंमोक्षसाधनमित्युक्तं अधुनासयोगीब्रह्मनिर्वाणमित्यत्रसूचितंध्यानयोगंसम्य

ग्दर्शनस्यांतरंगसाधनं विस्तरेण वक्ष्यंस्तत्सूत्रस्थानीयांस्त्रीन् श्लोकानाह भगवान् एतेषामेव वृत्तिस्थानीयः कृत्स्नः षष्ठाध्यायो भविष्यति तत्रापि द्वाभ्यां संक्षेपेण योग उच्यते तृतीयेन तत्फलं परमात्मज्ञानमिति विवेकः ॥+

मधुसूदनीटीका

+ स्पर्शान् शब्दादीन् बाह्यान् बहिर्भवानपि श्रोत्रादिद्वारा तत्तदाकारांतःक
रणवृत्तिभिरंतः प्रविष्टान् बहिरेव पुनः कृत्वा परवैराग्यवशेन तत्तदाकारां
वृत्तिमनुत्पाद्येत्यर्थः यद्येते श्रोत्रादिद्वारा नांतःप्रविशेयुः तदा स्वत एव बहि
निःस्युः स्वभाववैरंगसंगात् तेषामांतरंगवशादंतः प्रविष्टानां वैराग्येण

बा ५

बहिर्गमनं संभवतीति बहिरेव बाह्यानिति विशेषणेन सूचितं वैराग्यमुक्त्वा
133 ध्यानमाह चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते अत्यंतनिमीलने
हि निद्राख्यो लयात्मिका वृत्तिरेका भवेत् प्रसारणे च प्रमाणविपर्य
यविकल्पस्मृतयश्चतस्रो विक्षेपात्मिका वृत्तयो भवेयुः पंचापि तु वृ
त्तयो निरोधव्या इति अर्धनिमीलनेन भ्रूमध्ये चक्षुषो निधानेन तथा प्राणा
पानौ समौ तुल्यावूर्ध्वाधोगतिविच्छेदेन नासाभ्यंतरचारिणौ कुंभकेन कृत्वा २७

सदानंदीटीका

ईश्वरार्पितचित्तस्य धीशुद्धिः कर्मयोगतः ततः स्यात्कर्मसंन्यासः श्रवणा
दिपरस्य च १ मोक्षहेतुर्ज्ञानमविज्ञाने भवतीति प्रबोधिते इदानीं ब्रह्मनिर्वा
णं सयोगीत्यत्र सूचिते २ विज्ञानसाधने ध्यानयोगे समाध्येय विस्तरात्
वक्ष्यं त्रीन्सूत्रस्थानीयान् श्लोकानाह जगद्गुरुः ३ वृत्तिस्थानीय एतेषां
षष्ठाध्यायो भविष्यति द्वाभ्यां संक्षेपतो योगस्तृतीयेन तत्फलं स्मृतम् ४
बाह्याः शब्दादयो ये तु द्वारैरिंद्रियैः संप्रवेशिताः वैराग्येणैव तान्बाह्यान्बहिः
कृत्वा प्रयत्नतः ५ यद्येते चांतरः स्युर्वै नैवापायसहस्रकैः बहिर्नेयाः
स्वभावस्य भंगः कर्तुं न शक्यते ६ बाह्यास्त्वंतः प्रविष्टाः स्युस्तान्रागाद्वशाद्ब
हिस्तदा कर्तुं शक्यान्विरागेण बाह्यानिति विशेषणात् ७ वैराग्यमेत
देवेनोक्त्वा प्राहाभ्यासमथोत्तमः अत्यंतमीलने निद्राप्रसारे विभ्रमोद
यः ८ अतोऽर्धमीलनेनैव भ्रूमध्ये चक्षुषोः स्थितिः ऊर्ध्वाधोगतिविच्छे
दान्नासाभ्यंतरचारिणौ ९ कुंभकेन समौ कृत्वा प्राणापानौ विचक्षणः २७.२८

नीलकंठीटीका

एवं सम्यग्दर्शननिष्ठानां सद्योमुक्तिरुक्ता कर्मयोगस्य संगफलत्यागेन ई

स्वःश्रीत्यर्थमनुष्ठितः सत्वशुद्धिज्ञानप्राप्तिद्वारेण मोक्षाय भवतीत्युक्तं ।
अथेदानीं सम्यग्दर्शनस्यांतरंगसाधने ध्यानयोगे विस्तरेण वक्ष्यामीति त
त्सूत्रभूतांस्त्रीन् श्लोकानुपदिशति स्पर्शानिति अत्र उत्तरार्धेन प्राणायाम उ
क्तः स्पर्शान्कृत्वा बहिर्बाह्यानिति प्रत्याहार उक्तः भ्रुवोरंतरे चक्षुः कृतेति धा
रणा उक्ता विगतेच्छाभयक्रोध इति साधनभूताः फलभूताश्च द्विविधा यम
नियमाश्चोक्ताः यतेंद्रिय इति वितर्काद्यः संप्रज्ञातः यतमन इति विचाराद्य
यतबुद्धिरित्यानंदास्मितारव्यौ मोक्षपरायण इत्यसंप्रज्ञात उक्तः शेषेण
योगफलमिति विभागः पाठक्रममनादृत्यार्थक्रमेणात्रार्थः स्पष्टी
क्रियते तत्र विगतेच्छो विगतभयो विगतक्रोध इति संबंधः यो हि इच्छावान्
स इष्टसिद्ध्यर्थं हिंसानृतस्तेयस्त्रीपरिग्रहानिच्छेत् अतो विगतेच्छपदेन त
द्विपर्ययान् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा इति सूत्रोक्तान्यमान्
लक्षयति तथा भयं सोद्वेगं शंका तया शुद्धिज्ञानशौचसंतोषतपः स्वा
ध्यायेश्वरप्रणिधानानि नियमा इति सूत्रोक्तान्नियमान् स्वीकर्तुमिच्छतो
विगतभय इत्यनेन तेषां ग्रहणं तथा क्रोधात्क्रोधो मैत्र्यादीन्भावयितुमश
क्यश्चित्तप्रसादनं कर्तुं न शक्नोति तत्र मैत्रीकरुणामुदितोपेक्षाणां सुखदुः
खपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति सूचितं तत्र विगतक्रोधः
शांतप्रकृतित्वात्सुखितेषु मैत्रीं परस्येष्टेन ममैवेष्टमिदं जातमिति भावये
त् तथा दुःखितेषु करुणां पुण्यवत्सु मुदितां पापवत्सूपेक्षां च भावयेत्
न चैतेन प्रसादनेन विना चित्तादर्शस्य नैर्मल्यं भवति एवं साधनावस्थायां
यमनियमचित्तप्रसादनानां सिद्ध्यर्थं विगतेच्छाभयक्रोधत्वमीप्सितम्
एवं फलावस्थायामपि तदीप्सितं तथा हि संप्रज्ञातसमाधिफलभूतायाम
धुमत्यां योगभूमौ स्थितं योगिनं प्रति दिव्याः कामा उपतिष्ठंते तत्रापि विगते
च्छत्वमिष्टं तथा हि स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगा
दिति सूत्रे स्थानिनो देवाः तैः उपनिमंत्रणे इहास्यतां इह रम्यतां इह स्थीयतामिमा
रम्या रामाः इमानि जरामरणापहराणि रसायनानि इमे वयं किंकराः स्वपु
ण्यार्जितमिदं स्थानं त्वया भुज्यतामिति प्रार्थनायां क्रियमाणायां संगोऽति
स्मात्तत्र न कर्तव्यः नापि तत्राभिमानो महाभागास्ते देवप्रार्थ्यत्वं मत्वा

गी॰ गार्ह्येपि कृतिव्यस्तयोः संगस्पृहयोर्भ्रंशादेकत्वादिति सूत्रार्थः तथाभयमपि
टी॰ ६ द्विविधं योगांतरायजं वितर्कजं च तत्राद्यं व्याधिस्त्यानसंशयप्रमादालस्या
विरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेंतरायाः
134 दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुव इति सूत्राभ्यामुक्तं ।
स्त्यानं अकर्मण्यता अविरतिर्वैराग्यं अंगमेजयत्वं कंपवायुः वितर्का हिंसा
दयस्तज्जं च भयं आद्यस्य निवारणं ईश्वरप्रणिधानेन तथा च सूत्रितं ततः प्र
त्यक्चेतनाधिगमोप्यंतरायाभावश्चेति तत ईश्वरप्रणिधानात् द्वितीयस्य प्र
तिपक्षभावनेन तथा च सूत्रितं वितर्कबाधने प्रतिपक्षभावनमिति वितर्का
हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहमूला मृदुमध्याधिमात्रा
दुःखाज्ञानानंतफला इति प्रतिपक्षभावनमिति च आदिपदादनृतस्तेयाद
यः हिंसादयः प्रत्येकं कृतकारितानुमोदितभेदेन त्रिविधाः तेपि प्रत्येकं लो
भादिमूलकत्वेन त्रिविधाः तेपि मृदुमध्याधिमात्रभेदेन प्रत्येकं त्रिविधाः
ते च मूलभूता वितर्कास्त्रयश्चत्वारः पंच अधिका वा त्रिस्त्रिगुणिता एकाशी
तिरशीतं शतं पंचत्रिंशदधिकं शतं अधिका वा भवंति शाखाप्रशाखाभेदे
नानंताश्च दुःखरूपं अज्ञानरूपं च अनंतफलं येषां ते दुःखाज्ञानानंतफला
इमनया प्रतिपक्षभावनया ते निवर्तनीया इति एवं यमनियमचित्तप्रसा
धनप्रतिपक्षभावनैर्निरंतरायं मृदूकृतचित्तो योगी विविक्ते देश आसी
नः संभवादिति न्यायेन स्थिरसुखमासनमभ्यासीत तत्र देशासने श्रूयते
समे शुचौ शर्करवह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनोनुकू
ले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत् त्रिरुन्नतं स्थाप्य समं
शरीरं हृदींद्रियाणि मनसा संनिरुध्य ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि
सर्वाणि भयावहानीति चक्षुरित्यत्र विसर्गलोपश्छांदसः त्रिरुन्नतं कटिव
क्षःकंधराप्रदेशेषून्नतं ततो जितासनः प्राणायाममभ्यसेत् तेन हि संदग्
धो प्राणो मलितिनदग्निमनोपि चांचल्यं त्यजति नो चेद्धातुविक्षेपणाविति
ष्यते तत्र प्राणजयप्रमाणं प्राणानुपपीड्य हंसपक्ष्मवेष्टः दीर्घप्राणो नासि
कयोच्छ्वसीतेति क्रमक्रममेवमष्टधा नाति प्राणापानौ समौ कृत्वा नासाभ्यं
तरचारिणाविति प्राणापानौ समौ तत्स्थौ ऊर्ध्वाधोगतिविच्छेदेन नासाभ्यं

तत्र चारिणो कुंभकेन कृतेन ततो बाह्यान् बहिर्भवान् स्पर्शान् विषयसंबं
धानिंद्रियद्वाराणि नित्यं श्रोत्रत्वगादीनि क्रियमाणान् येभ्य इंद्रियाणां प्रत्याहरणे
न तान् बहिरेव कुर्यात् ततो विषयेभ्यो व्याहृत्य करणं स्वस्वकाले इवां
तर्मनोमात्रेणावतिष्ठेत इत्यर्थः इमं प्रत्याहारं कर्तुमशक्तस्याविरक्तस्य का
गतिरित्यत आह चक्षुश्चैवांतरे भ्रुवोरिति चशब्दो वार्थे चक्षुरेव वा भ्रुवोरं
तरे कुर्यात् खेचरीमुद्रामभ्यसेदित्यर्थः सा चोक्ता योगसारे लंबिकोर्ध्व
स्थिते गर्ते जि[illegible]ह्वां व्याहृत्य धारयेत् इच्छासनं स्थिरं तिष्ठन्मुद्रैषा खेचरीम
ता भ्रूमध्यदृष्टिश्चैषा महादेवेन कीर्तितेति एवं सर्वोपि बाह्यविषये
भ्यो रोसंयमो यथोक्तं प्रत्याहारमनुष्ठातुमशक्तानुप्रत्येवोपदिश्यत इति
ज्ञेयं २७॥

आनन्दटीका

संयमस्वरूपमेवाह २८

ततो नैष्कर्म्ययोगिनः सकाशात्कर्म रामकंठटीका योगिनो विशेषं प्रतिपाद
यितुमाह — य एवंविधो मुनिर्यतिः सन्मोक्षपरायणः मोक्षं परमेति तत्प्राप्तिकामो
न तु मुक्तः हेयोपादेयतावस्थालंबनविज्ञतया रागद्वेषादिदोषाविर्भावा
वियोगात् यस्य तु इच्छाभयक्रोधाः पूर्वव्याख्याताइत्येवं गतचित्तदोषाः स
दा नित्यमेव निसर्गनिर्दोषस्वात्ममात्रप्रतिष्ठता हि शेषणागुणनारूपत्निला
त्मनोन गताः प्रध्वस्ताः स मतो दृष्टः कर्मयोगी मुक्त एव यतो स्यात्मनः स्वात्मा
त्मतत्त्वाणां स्वभावशुद्धा वशक्तिर्यदा मायावशात्स्वरूपाविमर्शिनी सती
नानादेहाद्यहंप्रत्ययाविरुद्धा हेयोपादेयं वस्तुवमारिणी विषयत्वमनुभव
ति तदा रागादिदोषोपरक्तं चित्तमिति संव्याख्यते यदा तु सैव विद्यावशाद्वि
मुच्यते तदा नित्यानंतानिरुपमनैर्मल्यैकलक्षणां स्वरूपं प्रतिपाद्यमाना
संविन्मात्ररूपैवावशिष्यते यदुक्तं चित्तमेव हि संसारो रागादिक्लेशदूषितं
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते [illegible]
[illegible]
[illegible] २८॥

लाहिकी वमरानीटीका

अथ सम्यग्दर्शनानन्तरमस्य ध्यानयोगस्य षष्ठेध्याये विस्तरेण विवक्षया सूत्रस्थानीयमर्थं
श्लोकमुपक्रमते॥

गी·
टी· पं·

वाह्याः स्पर्शाञ्छब्दादयो विषयाश्चिंतिताः संतोंतःप्रविशंति तांश्च
चिंतनात्यागेन बहिरेव कृत्वा चक्षुश्च भ्रुवोर्मध्ये कृत्वात्यंतं नेत्रयोर्निमील
नेमनोलयापत्तेः उन्मीलने च बहिः प्रसरति तदुभयदोषपरिहारार्थं
देहाहंभावनिमज्जनेन स्वस्वभावोन्मज्जनार्थं च भ्रूमध्ये दृष्टिं संस्तभ्य
तदुक्तं संप्रदायमिमं भक्त्या शृणु सम्यग्वदामि ते कैवल्यं जायते सद्योने
त्रयोस्त्रुमात्रयोरिति नासायाः सव्यापसव्यनाडीद्वयात्मकस्य मु

135

संतो

खावयवस्याभ्यंतरे चरंतौ प्राणापानौ समौ कृत्वा ध्यानयोगबलेन
विषुवद्गतिलंबितौ कृत्वा यद्वा सामान्येन स्वंतं च अग्नीषोमावविलय
गतः कारणं तौ मध्यैः समौ दाने सज्जसि भगवन्नाह हृद्धिकर्मणा
तावेवांतर्विषुवति समौ जडता मात्मवर्क्षौ हावप्यस्तं नयसि युगपन्‌

भा

मुक्तये भक्तिं ज्ञानमिति ॥२७॥ [illegible]

सु

[illegible]
[illegible]
[illegible]
णाविलयन्नुदितम्‌ तथा ध्यानयोगनिष्ठस्य समाधिं प्रवेशतो योगिनः
प्राणापानयोर्मध्यनाड्यां प्रशममापन्नयोर्यानिरिंद्रियप्रदेशेंत
र्मात्रे विश्रांति विषुवत्संज्ञा सैव समतयेह भगवता विवक्षिता
ननूक्तं भवतः [illegible] अथास्मात्कर्मयोगिनः सकाशाद्विलक्षणस्य विशि
ष्टप्रतिपादयति [illegible] ॥

पंचोलीटीका

अथेदानीं ध्यानयोगं सम्यग्दर्शनस्यांतरंगसाधनं विस्तरेण प्रव
क्ष्यामीति तस्य सूत्रस्थानीयान्‌ श्लोकानुपदिशति स्पर्शानिति वा
ह्यान्‌ बहिर्भवान्‌ स्पर्शान्‌ विषयान्‌ शब्दादीन्‌ श्रोत्रद्वारेण बुद्धौ
प्रवेशितान्‌ अचिंतयन्‌ पुनः बहिः कृत्वा च पुनः चक्षुर्भ्रुवोरंतरे कृ
त्वा इत्यनुषज्यते प्राणापानौ उच्छ्वासनिःश्वासरूपौ नासाभ्यंतरचरं
तौ समौ कृत्वा न तु व्यापारनिरोधेन कुंभयित्वा २७ ॥

रणवीरसमिद्धोथिनी॥

श्रेयं स संन्यासं कर्मयोगं फलत्यागात् निरूप्याधुना तत्प्रधान
भूतं वा ज्ञानमोक्षविधिं प्रकृतिदर्शाय यदुक्तदेः सकामान्विर्ग
मन रूपेणायं ब्रह्मसायुज्यरूपेण च फलेन स फलं प्रकटी
कुर्वन्नाह स्पर्शानिति द्वाभ्यां बाह्यांश्चेतसो बहिरेव संभविनः
बहिर्वर्तमानेभ्यः पितृपुत्रमित्रादिभ्य आगतान् न पुनः स्वा
भाविकान् अथ च वक्ष्यो रेक्षाहासान्वाद यिते हृषीकत्वे योग्या
न्स्पर्शान् इंद्रियैः स्पृश्यमानत्वाच्छब्दादीन्विषयान्विक्षेपक
संकल्पानश्च बहिः कृत्वा चेतसः सकाशाद् दूरीकृत्य चेतसा दृ
ष्टीनेतियावत् चक्षुश्चैवांतरे भ्रुवोः साटश्याह नुवोंतरे मध्य एव
कृत्वा वा नासस्य ल स्यादचक्षुत्यर्थमिति शेषः बाह्याल्लक्ष्योन्मु
खं समर्थ्य तु पिसंधायेति यावत् तथा न संते कौटिल्येना
सामान्येन कोयव मां प्रवदरं त्वस्यामिति नासाग्रभूमिः
यद्वा अनासेति च्छेदः आसन मासाग्रकस्य दल इत्यप्रत्ययः
नाविद्यते श्वासो श्वासनं विश्वमोयत्रेत्यनासाग्रभूमिरेव त
स्या अभ्यंतरे मध्ये चरितं शीलं ययोस्तौ नासाभ्यंतरचारिणा
व नसाभ्यंतरचारिणौ वा प्राणापानौ प्राणा अग्रगादयः प्रा
णिनः अपानावर्यादयः तावुभावपि समीकृत्वा विधाय वि
नयेत्यत्र व्याख्यातं ॥ २७॥

मथभाष्य

स्पर्शानित्यादिना बाह्यान्स्पर्शान्बहिः कृत्वा श्रोत्रादीनियो
गेनानियम्येत्यर्थः चक्षुर्भ्रुवोरंतरे कृत्वा भ्रुवोर्मध्यमवलो
कयन्नित्यर्थः उक्तं च नासाग्रे वा भ्रुवोर्मध्ये ध्यानी चक्षुर्निधा
रयेदिति प्राणापानौ समीकृत्वा कुंभके स्थित्वेत्यर्थः ध्येयमा
ह २७॥

136

भाषा अनुवाद

इसी अध्याय के २४ श्लोक मे कहा कि योगी मोक्ष पावै हैं सोई फे
रि संक्षेप से कहते हैं कि शब्दस्पर्श आदि बहिर्विषयों को बाहर
करि के और चक्षु करि दृष्टि को भौंहके मध्य मे राखिप्राण अपान
वायु को सम करि के कुंभकप्राणायाम करैं भ्रूमध्य मे दृष्टि इसलि
ये कहा कि नेत्र बन्द करने से निद्रावश हो मन लय करि लीन हो
जाता और खुले रहने से मन विषयों पर धावता है अध खुले र
खने से भ्रूके बीच निकट दृष्टिरहती है औदोनो वायु सम करि ना-
सिका रन्ध्र से संचार करती है जिसमे प्राण वायु बाहर औ अपान
भीतर संचार न करै इस वास्तेकुंभक प्राणायाम योग करै २७ ॥

दोहा

बाह्य विषयको बहिर्कर नेत्रहुं भृकुटीमांहि ॥
समकर प्राण अपान कहुं नासामे चलताहि २७ ॥

यतेन्द्रियमनोबुद्धि र्मुनिर्मोक्षपरायणः वि
गतेच्छाभयक्रोधो यः सदामुक्तएवसः २८

शांकरभाष्यं

यतेंद्रिय इति यतेंद्रियमनोबुद्धिर्यतानि संयतानिइंद्रियाणि मनोबुद्धिश्च
यस्ससयतेंद्रियमनोबुद्धिर्मननात् मुनिः संन्यासीमोक्षपरायणः एवंदे
हसंस्थानो मोक्षपरायणोमोक्षएवपरमयनं परागतिर्यस्यसोयंमोक्षप
रायणो मुनिर्भवेत् विगतेच्छाभयक्रोध इच्छाचभयंचक्रोधश्च इच्छाभ
यक्रोधास्तेविगता यस्मात्सविगतेच्छाभयक्रोधः यएवंवर्त्तते सदा सं
न्यासीमुक्तएवसन् तस्यमोक्षेऽन्यः कर्तव्योनास्ति २८ ॥

आनंदगिरिकृतटीका

विषयप्रावल्यंपरित्यज्यचक्षुरपिभ्रुवोर्म विक्षेपपरिहारार्थंकृत्वाप्रा ध्ये
णापानौनासाभ्यन्तरचरणशीलौसमौन्यूनाधिकवर्जितौ कुंभकेन
निरुद्धौ कृत्वाकरणानि सर्वाण्येवंसंयम्यप्राणायामपरोभूत्वा किंकुर्या
दित्यपेक्षायामाह यतेंद्रियेति इंद्रियादिसंयमंकृत्वा मोक्षमेवापेक्षमाणो
मननशीलः स्यादित्यर्थः ज्ञानातिशयनिष्ठस्य सर्वदेच्छादिशून्यस्य संन्या
सिनोमुक्तेरनायाससिद्धत्वान्नतस्यकिंचिदपि कर्तव्यमस्तीत्याह विगतेति
पूर्वार्धाक्षराणिव्याकरोतियतेत्यादिना द्वितीयार्धाक्षराणिव्याचष्टेविगतेत्यादिना २८

स्वामिकृतटीका

अनेनोपायेननियताःसंयताःइंद्रियमनोबुद्धयोयस्यमोक्षएवपरमयनं
प्राप्यंयस्यातएवविगताइच्छाभयक्रोधायस्ययएवंभूतोमुनिः स
सदाजीवन्नपिमुक्तएवेत्यर्थः २८ ॥

पिशाचभाष्यं

तथा यतेंद्रियमनोबुद्धिः यतानिइंद्रियाणिमनोबुद्धिश्चयस्यसः यतें
द्रियमनोबुद्धिर्मननान्मुनिःसंन्यासीमोक्षपरायणः मोक्षमेवपरमय
नंपरागतिर्यस्यसः यएवंवर्ततेसंन्यासीसदामुक्तएवनतस्यमोक्षादा

गी॰ न्यः कर्तव्योस्ति २८

टी॰ पं॰ आत्मावलोकनादन्यत्र प्रवृत्त्य

रामानुजभाष्यं

नेंद्रियमनोबुद्धिः अतएव विगतेच्छाभयक्रोधो मोक्षपरायणो मोक्षैकप्रयोजनो मुनिरात्मावलोकनशीलो यः सदा मुक्त एव सः साध्यदशायामिव साधनदशायामपि मुक्त एव स इत्यर्थः २८

अभिनवगुप्तकृतटीका

एवंविधो योगी सर्वव्यवहारान्वर्तयन्नपि मुक्त एव २८

परमार्थप्रपाटीका

नारोगो मरणं तत्र न निद्रा न क्षुधा तृष इति तथा नासाभ्यंतरचारिणौ प्राणापानौ समौ कृत्वा कुंभयित्वेत्यर्थः अनेनोपायेन क्रमेण यतेंद्रियमनोबुद्धिर्मुनिर्मननशीलः मोक्षपरमयनं गतिर्यस्य स तथा अतएव विगतेच्छाभयक्रोधः सदैव मुक्तः जीवन्मुक्तो वा मुक्तः स्यादित्यर्थः तदुक्तं टिप्पणिकायां परमहंसं चिंतयदि भवति बाह्यव्यवहृतेरसक्तायाः मतं कलयति तदाभ्यासवशतः तुर्यातीतं संविष्टः तामनुभवन्नसममशानेमरणमनातौ पङ्गुनरपि च भोक्तुं प्रयतते अथ निरूपितार्थविषये सर्वशास्त्रोक्ताः श्रुतयश्च तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते तद्विष्णोः परमं पदं अत्र एव भाष्यं विष्णोर्व्यापनशीलस्यापि परमात्मनः तस्य परमं पारमार्थिकं पदमभिव्यक्ति[स्था]नं द्विविमूर्द्धमध्ये वर्तते त्रिपादस्यामृतं दिवीति श्रुतेः सत्यज्ञानानंदात्मकं विष्णोः परं तद्विषयं सूरयो महानुभा[त]वाश्चक्षुराततं विस्तृतमिव कतासदा प्रणिधानेन पश्यंति निरंतरं साक्षात्कुर्वंति यद्वा चक्षुरर्थप्रकाशके रवावेव कारार्थे आततमपरिच्छिन्नमेव यथास्यात्तथा पश्यंति तत्तस्माद्विप्रासो विप्राः श्रेष्ठमतयः विपन्यवो मेधाविनः जागरांचक्रुरिति जागृवांसः दृष्टपुण्यं चाद्वैतैकसमानात्मकाः प्राज्ञा जागरे प्रामा इत्यर्थः सोऽकवदनुभूयमानेपरं संसिंधते समृद्धिं नयंति सर्वात्मकत्वेन पश्यंति अत्रैतदुक्तं भवति अभ्यासदशायां स्व

म्नाविवरेणभ्रूमध्येप्रापितयादृष्ट्या तंपश्यंपतिव्यवहारादृष्ट्याप्रापयेत्
सकलविषयप्रतीतिरूपेण तदेवपश्यंतीत्यर्थः अथैतदर्थेमामार-
णकेअन्याश्रुतिरपि चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्या
ग्नेः आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चेति भाष्ये
द्योतयंत्यर्थान्प्रकाशयंतीतिदेवारश्मयस्तासांमध्येचित्रंरूपरसस्य
श्रीगोपथाहृग्राहकंअनीकंतेजः समूहरूपंउदगादुदयंप्राप्तं किंभूतं
मित्रस्यवरुणस्याग्नेश्चतस्यचक्षुः प्रकाशकंतत्तत्कांतिप्रदमित्यर्थः अथै
वंविधोपिनतोलक्ष्येणापरिच्छिन्नः किंतद्यावापृथिवीद्यौः पृथिवीश्चअंत
रिक्षमाकाशंचआप्राः आपूरितवान्व्यापकइत्यर्थः तथासूर्यस्तत्प्र
काशकस्तत्तापकः यतोजगतोजंगमस्यतस्थुषः स्थावरस्यचांतर्यामी
अथप्राणापानावित्यत्रप्रथानपथीश्रुतिः तस्मादेकमेवव्रतंचरेत्प्राण्या
च्चैवापान्याच्चनेन्मापाप्मामृत्युराप्नुवदितिपद्यतुचरेत्समापिपरिषेत्ते
नोपतस्यैदेवतायैसायुज्यं सलोकतांजयतितियएवंवेद भाष्ये अथातो
व्रतमीमांसेत्यादिनाचक्षुरादिव्रतमात्मत्वानोपयोगिनभवतीत्युप
क्रम्यतस्मादित्युपसंहरति तस्मात्कारणादेकमेवव्रतंचरेत् तत्किंप्रा
णनाच्चैवापान्याच्चेति प्राणाज्जातः प्राणः अपानाज्जातोअपानस्तयोय
मभ्यासस्तस्मात्प्राणापानाख्यव्रतंचरेदित्यर्थः अथतत्किंकारणमित्या
ह नेदितिनिपातोनिषेधार्थे पाप्मामृत्युःकोमृत्युर्मांइतिमानेदाप्नु
वत् नागच्छतीति अथउइतिनिश्चित्यपद्यतद्व्रतंचरेत्तर्हिसमापिपरिषे
त्समापिनेतमिच्छेत्यावत्प्राणायामः सिद्ध्येत्तावत्नत्यजेदित्यर्थः
तेनचैवव्रतेनउइतिनिर्धारितयैतस्यैइतिव्रतस्थोपंचमप्रकोभिहितः एत
स्याः मुख्यप्राणदेवतायाः सायुज्यंसलोकतांजयतिप्राप्नोतियएवंवेद
तथा अंतश्चरतिरोचनास्यप्राणादपानतीत्यादिमामासप्यकमपिद्रष्ट
व्यम् २८ ॥

वनमालीटीका

उक्तोपायेनसंयतानिइंद्रियमनोबुद्धयोयेनसः मोक्षपरायणः सर्वविष
यविरक्तः मुनिर्मननशीलः विगतेच्छाभयक्रोधः व्याख्यातप्राक् एतादृ
शोदेहादौवर्तमानोपिमुक्तएवसः २८ ॥

139

कृष्णवैजयन्तीटीका

किंचयतेंद्रियमनोबुद्धिः यतानियमितानींद्रियमनोबुद्धयो येन स तथा
आत्मदर्शनादन्यत्रप्रवृत्त्ययोग्येंद्रियमनोबुद्धिरित्यर्थः मोक्षपरा
यणः मोक्ष एव परमुत्कृष्टमयनं प्राप्यस्थानं यस्य स तथा मोक्षैकप्र
योजन इत्यर्थः विगतेच्छाभयक्रोधो यस्मात्स तथा यद्वा भयं च क्रोध
श्च भयक्रोधौ न भयक्रोधावभयक्रोधौ इच्छा चाभयक्रोधौ चेच्छाभयक्रो
धाः विशेषेण गताः आगताः इच्छाभयक्रोधौ नभयक्रोधौ चाभयक्रोधौ इ
च्छाभयक्रोधौ चेच्छाभयक्रोधाः विगता आगताः इच्छाभयक्रो
धा येन स तथा आत्मप्राप्तीच्छा यमादिभ्यो मरणाद्रूपेभ्यो भयं विमु
कारिभ्यो देवादिभ्यः क्रोधं आगम इत्यर्थः ज्ञात एवंभूतो यतो मुनिरात्म
स्वरूपमननशीलः ईदृशो यो योगी आत्मावलोकनायैवाष्टांगयोगा
भ्यासी स सदैव साधनसिद्ध्यवस्थायामेव मुक्त एव प्रकृतिविभक्ता
कै त्मावलोकनेनैव प्रयोजनतया अन्यविषयप्रयोजनाभावान्मुक्त एवेत्यर्थ :२८

मधुसूदनीटीका

अनेनोपायेन यताः संयता इंद्रियमनोबुद्धयो यस्य स तथा मोक्षपरा
यणः सर्वविषयविरक्तो मुनिर्मननशीलो भवेत् विगतेच्छाभयक्रोध
इति वीतरागभयक्रोध इत्यत्र व्याख्यातं य एतादृशो यः संन्यासी सदा भव
ति मुक्त एव सः न तस्य मोक्षः कर्तव्योस्ति अथवा य एतादृशः स स
दा जीवन्नपि मुक्त एव २८ ॥

सदानंदीटीका

संयता इत्युपायेन यस्येंद्रियमनोधियः विषयान्विषवत्त्यक्त्वा सन्मुनि
र्मोक्षतत्परः १ इच्छादिरहितो योगी जीवन्नेव विमुच्यते २ २८ ॥

नीलकंठीटीका

यतेंद्रियेति यस्मिन्कस्मिंश्चित्स्थूले विषये सूर्ये तद्बिम्बे वा विष्णुप्र
तिमायां वा अन्ताहृतधनो वान्यत्र वा बहुरागायत्तमहारामनो धारयेत् ।
तच्च मनस्तद्विषयाकारतां प्राप्तं तत्रैव स्थिराभ्यासेन विश्रांतं स्वदेहम
पि न पश्यति सेयं महाविदेहा नाम धारणा अस्यां सिद्धायामिंद्रियगणः

स्वेस्वेविषयेनतुगृह्णाति सोयंबहिर्विषयप्रत्याहारः पूर्वोक्तस्त्वांतरइति
भेदः अतएवतयोस्तुल्यफलत्वंसूत्रितं ततःक्षीयतेप्रकाशावरणमिति
ततः अभ्यंतरप्रत्याहारात् तथाबहिरकल्पितावृत्तिर्महाविदेहाततःसंयमात्
प्रकाशावरणक्षयइति यदाचित्तंदेहमविस्मृत्यैवहठेनबहिःस्थितमूर्त्याद्या
कारंक्रियतेतदासाचित्तस्यमूर्त्याकाररूपावृत्तिःकल्पिता यदातुनिरवशेष
गादेहंविस्मृत्यचेतःकेवलंध्येयाकारमात्रंभवतितदासामहाविदेहाना
मधारणा तस्याअपिफलंतदेव तत्संयमात्तस्यांचेतसोनिग्रहात् प्र
काशावरणक्षयोभवतिसोयंवा ह्यविषयःसमाधिः वितर्काख्योद्विवि
धः सवितर्कनिर्वितर्कभेदात् तत्राद्यस्यलक्षणंसूत्रितं शब्दार्थज्ञान
विकल्पैःसंकीर्णासवितर्केति सवितर्कानामसमापत्तिःसमाधिरित्य
र्थः यदाविष्णुप्रतिमादौपूर्वापरानुसंधानेनशब्दार्थोल्लेखेनचभावना
प्रवर्त्ततेतदासवितर्कासमापत्तिः अस्मिन्नेवालंबनेपूर्वापरानुसंधा
नेनशब्दार्थोल्लेखनमंतरेणभावनाप्रवर्त्ततेतदानिर्वितर्कानामसमाप
त्तिः तथाचसूत्रं स्मृतिपरिशुद्धौस्वरूपशून्येवार्थमात्रनिर्भासानिर्वित
र्का स्मृतेःशब्दार्थस्मरणस्यपरिशुद्धौवर्जनेसतिभावयितुःस्वरूपशू
न्यातदाहमिदंभावयामीत्येवमाकाराद्वृत्तिरपिभावयितुर्नास्तीवेतिभा
ति यतोर्थमात्रनिर्भासाध्येयार्थमात्रमस्यांभासतेनत्वन्यदितिसूत्रार्थः
अस्यांसिद्धायांयोगीजितेंद्रियइत्युच्यतेजितमनाइति आभ्यंतरप्रत्याहा
रपूर्वकंयदामनःकल्पितेसूक्ष्मेविषयेपूर्ववत्शब्दार्थोल्लेखपूर्वकंतदुल्ले
खमंतरेणभावनाप्रवर्त्ततेतदातेउभेसमापत्तीसविचारनिर्विचाराख्येभव
तः तथाचसूत्रंएतयैवसविचारानिर्विचाराचसूक्ष्मविषयाव्याख्यातेति
अत्रसूक्ष्मविषयेतिग्रहणात्तयोःस्थूलविषयत्वंगम्यते एतयैवबहिर्वि
षवितर्कसमापत्त्यैवनिर्विचारसमापत्तौदृष्टायांयोगीजितमनाइत्युच्यते
यदातुचेतसोमूर्त्याकारतांपरित्यज्यसत्त्वोद्रेकात्समष्टिमनोमयवि
षयाअहमेवेदंसर्वोस्मीत्येवमाकाराभावनाप्रवर्त्ततेसोयंसानंदःसमा
धिः यदातुतामपिभावनांपरित्यज्यविषयवैरस्यमंतरेणास्मीत्येतावन्
मात्राकाराभावनाप्रवर्त्ततेसास्मिता अस्मिताहंकारयोर्भेदस्तुक्रमेणावि
षयवैरस्यात्तदाभिमानत्वमात्रकृतः यथैकएवपूर्वाभिमानःपश्चादभि

गी० टी० पं०

मुख्यमेतितद्वत् अस्यामवस्थायांयोगीवृद्धितः विविक्तस्यात्मपदार्थस्य
साक्षात्कारात् जितबुद्धिरित्युच्यते तदेतदुक्तं यतेंद्रियमनोबुद्धिरिति ए
तान्येवअभ्यायनानित्रिगुणपर्वाण्युच्यंते तथाचसूत्रं विशेषाविशेषलिंगमा
त्रालिंगानित्रिगुणपर्वाणीति तत्रविशेषाःस्थूलभूतानिएकादशेंद्रियाणि
च अविशेषाःपंचतन्मात्राणिअहंकारश्च लिंगमात्रंमहत्तत्वं अलिंगंप्रधा
नं तत्रविशेषादविशेषंप्रविविक्ततोयोगिनोदेहेंद्रियलयाभ्यासात्समन
140 स्कानींद्रियाणिलीयंतेसलयः बहिर्मुखतोमवबाभवतिसविक्षेपः ए
वंअविशेषेभ्योलिंगमात्रेविविक्ततोपिलयविक्षेपौस्तः लिंगमात्रात्स्वरूप
रूपंप्रविविक्ततोपितौस्तः तावेतौलयविक्षेपौहेयौश्रूयेते लयविक्षेपर
हितेमनःकृत्वात्वनिश्चलं यदायात्युन्मनीभावंतदातत्परमंपदमिति ए
तेषुत्रिषुलीनेषुआद्यःक्रमएव द्वितीयोविगलितदेहाहंकारत्वाद्विदेहसं
ज्ञः तृतीयःप्रकृतिलयइति एतयोःसमाधियौगाः अतएवसूत्रितं भ
१७ वप्रत्ययोविदेहप्रकृतिलयानामिति भवश्चतयोजन्मांतरहेतुरेषांसमा
धिर्भवति यद्यपिजन्मांतरेपितेषांजन्मनेवसमाधिसिद्धिःपक्षिणामाका
शगमनसिद्धिवद्भवतीतिसूत्रार्थः सर्वथापितेषांसयोग्यमुक्तिर्नास्तीति
सिद्धं यदातुअस्मितामात्रस्यापिनिर्विकल्पेचिन्मात्रेलयोभवतितदा
यंविद्वान्कैवल्यंधर्ममेघसमाध्याख्यमनुभवति यमपिकृत्यश्रूयते।
तामेकंक्रतुशतस्यवतः समस्तायत्फलंतदवाप्नोतीति अयमेवमो
क्षाख्यःपरंश्रयतेप्राप्यस्यानेयस्यसमनिर्मोक्षपरायणइत्युच्यते एता
स्यामेवावस्थायांयोगीजीवन्मुक्तइत्युच्यते विगतेच्छाभयक्रोधइति।
पादःप्रागेवव्याख्यातः यएवंभूतःससदामुक्तः बंधप्रतीतिकालेपिस
मुक्तएवास्ति अज्ञानमात्रव्यवधानान्मुक्तेः एतेनाहंकारादेर्बंधस्या
कालत्रयेपिअसत्त्वोक्त्यामिथ्यात्वंदर्शितम् २८ ॥

ठ्यंश्लोकम्

ज्ञानेश्वरीटीका

तत्प्रकाशार्थमिदम् एवंविनिरोधार्थंयोगमभ्यास[illegible]
म ईश्वर[illegible]तिडीनोयम्पायमासत्तयति २८ ॥

रामकंठीटीका

तदेवंसत्त्वेवविषयेषुरागादिशून्येषुशून्यत्वात्परमार्थसमापन्नःकर्मयोगीजीवन्नेवमुक्तः
यत्त्वेतद्ध्यातिरिक्तलक्षणंएवंविधोयोगीसपरंमोक्षप्रवणएवनतुमुक्तःकीदृशः ॥

यतेंद्रियमनोबुद्धिः यतानि निगृहीतानि इंद्रियाणि करणानि मनश्चित्तं सं
कल्पात्मकं बुद्धिरध्यवसायात्मिका येन स तादृशः किं कृत्वैवंविधः बाह्यान्
ग्राह्यत्वेन व्यतिरिक्तान् घ्राणादीन् स्पर्शानिंद्रियैः सूक्ष्ममार्गत्वात्स्पर्शशब्दवा
च्यान् विषयान्बहिः कृत्वेंद्रियैरग्रहणेन चेतसो व्यतिरिच्य तेन तद्विशे
षेणेंद्रियाणां विषयेभ्यः प्रत्याहारलक्षणं योगांगं प्रतिपादितं तेन एवं
भावीन्यासन प्राणजयादीन्यंगान्याक्षिप्तानि अथ तत् किं कृत्वा भ्रुवोरन्त
रे भ्रूमध्ये चक्षुर्दर्शनशक्तिं कृत्वेत्यनेनापि धारणालक्षणं योगांगमुक्तं
भ्रूमध्यलक्षणो देशानेत्रमात्रालंबनतया चित्तस्य बंधो हि अनेनोक्तः
किंच नासाभ्यंतरचारिणो नासायामव्याप्तसव्यनाडीद्वयात्मकस्य सर्व
वयवस्याभ्यंतरे चरितं शीलं ययोस्तौ तथाविधौ प्राणापानसंज्ञौ शारी
रौ मारुतौ समौ योगपथेन तत्स्वरूप तथा वहन्तौ समानौ संपाद्य तेन
नैकर्श्यवृद्धिसंपाद्य ध्यानलक्षणं योगांगमुक्तम् एकवस्त्वालंबनेनत्व
नः करणो ध्यानसंपत्तिस्तद्धलाहिडवत्ततिप्राणापानौ समाश्रयेत
इति त्रिविधेन कर्मणा यतेंद्रियमनोबुद्धिर्योगी प्रत्याहारधारणाध्यान
पर्यंतयोगांगकर्मप्राप्तो भवति न तद्बुद्धेरत्यंततिरोधानाभावात्समाधि
समाधिरूपः समाधिः देहविमुक्तिं विना न सिध्यत्यादेहस्थितेर्बुद्धिवृत्ति
संस्कारशेषस्य सत्त्वाभ्युपगमात् एवं चित्तवृत्तिनिरोधलक्षणायोगाभ्यास
निष्ठस्य योगिनः सकामस्य सदा स्वरूपप्रतिष्ठं सवितर्कमेयो योगी विशिष्टः प्र
तिपादितः २८ ॥

लासिकीटीका

+यस्य विगच्छा भयक्रोधा विगत दोषाः सर्वदा विसर्गतो विशेषेण गतागताः
प्रधस्तः सतादृशो ब्रह्मभूतो मुक्त एव स्यादर्थः २८ [illegible]
[illegible] २८ ॥

पंचोलीटीका

किंच यः मुनिः यतेंद्रियमनोबुद्धिः यतानि इंद्रियाणि मनोबुद्धि
श्च यस्य सः मोक्षपरायणः मोक्ष एव परमा गतिर्यस्य सः विगतेच्छा
भयक्रोधः यः एवंवर्त्तितेसः संन्यासी सदा मुक्त एव २८ ॥

ममदर्शितत्वेन लक्ष्यीकृत्य योमुनिः मनुते गुरुणा शास्त्रोपदिष्टम
र्थयाथार्थ्येन निश्चिनुते इति मुनिः यद्वा किं नो राज्येन गोविंद किं
भोगैर्जीवितेन वा इत्येवंप्रकारानेकविधविकल्पोत्थापकवाक्या
लापे मदादत्वेन जोषंस्थितः अत्रदेवतात्संज्ञान्मंशान्तंस्मरत्वा
यतेंद्रियमनोबुद्धिः यता निस्वायत्तीकृतत्वेन स्वकार्यप्रत्यावक
शब्दादिविषयविक्षेपकसंकल्पसंशयेभ्यः प्रत्यावर्तितानिइंद्रि
याणि चक्षुरादीनि मनः संकल्पात्मकं चित्तं बुद्धिश्च अवसायात्मि
का च येन सः अतएव विगतेच्छाभयक्रोधः इच्छाशुत्रमित्रादिवि
षयःस्नेहः प्रवृत्तिनिरोधकः भयं महाबलेभ्यः परेभ्यःसकाशा
ज्जातं यद्वा कथमहं दुर्देवबंधून्घातयित्वा जीवामीत्येवंरूपस्त्रा
सः क्रोधःसर्वेषांबधादीनांविच्छेदकोयंयुद्धमार्गःकथंहितःस्या
दिति द्वेषः एतत्त्रयेण रहितः केवलं मोक्षपरायणः मोक्ष एव अयन
मोक्षे परायणस्तत्परो भवेत् स सदा मुक्तएव बंधुद्रादेःसकाशाद्वि
धून्घातयित्वा निर्गमः स्यात् न केन चिद्दोषेणाक्रांतः इति भावः अथ
च परब्रह्मसायुज्यं प्राप्तश्च भवेदिति २७ ॥ २८ ॥

मयभाष्य

२८ ॥

भाषा अनुवाद

और इसी उपाय से जिस की इन्द्री औ मन बुद्धि आदि वशीभूत हैं और मुक्ति प्राप्ति के योग्य हैं और जिस ने इच्छा भय क्रोध को दूर किया है ऐसे गुणों से सदा युक्त जो मुनि सो जीवन काल मे भी मुक्त अर्थात् वह कर्म रहित जीवन्मुक्त है २८

दोहा

इंद्रि मनबुद्धि वशाकरे मोक्षयुक्त मुनिजोय इच्छाक्रोधभय
रहित है सदामुक्त यह सोय २८॥

142

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् सु
हृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति २९
इति श्रीभगवद्गीतायां योगशास्त्रे श्रीकृष्णार्जुन
संवादे संन्यासयोगो नाम पञ्चमोऽध्यायः ५

शांकरभाष्यं

एवं समाहितचित्तेन किं विज्ञेयमिति चोच्यते भोक्तारमिति भोक्तारं य
ज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च। सर्वलोकमहेश्वरं सर्वे
षां लोकानां महान्तमीश्वरं सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां सर्वप्रा
णिनां प्रत्युपकारनिरपेक्षतयोपकारिणं सर्वभूतानां हृदयेशयं सर्व
कर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं मां नारायणं ज्ञात्वा शांतिं सर्वसंसारो
परतिमृच्छति प्राप्नोति २९ ॥
इति श्रीभगवद्गीताशांकरभाष्ये पंचमोऽध्यायः ५ ॥ ॥

आनंदगिरिकृतटीका

अधिकारिणो यथोक्तस्य कर्तव्याभावे ज्ञातव्यमपि नास्तीत्याशंक्याप
रिहरति एवमित्यादिना प्रसिद्धं भोक्तारं व्यवछिनत्ति सर्वलोकेति ततो
ऽस्य वस्तुविपर्ययावितिन्यायेन सर्वफलदातृत्वं दर्शयति सुहृदमि
ति उक्तेश्वरज्ञानफलं कथयति ज्ञात्वेति यज्ञेषु तपःसु च द्विधा भोक्तृत्वं
व्यनक्ति कर्तृरूपेणेति हिरण्यगर्भादिव्यवछेदार्थं विशिनष्टि महान्त
मिति स्वपरिकरोपकारिणं राजानं व्यावर्तयति प्रत्युपकारेति ईश्वरस्य
नाहस्यं सुहृदस्येति सर्वभूतानामिति तर्हि तत्र तत्र व्यवस्थितकर्मतत्
फलसंसर्गित्वं स्यादित्याशंक्याह सर्वकर्मेति न च तस्य बुद्धिहानिसंब
न्धोपि वस्तुतोऽस्तीत्याह सर्वप्रत्ययेति यथोक्तेश्वरपरिज्ञानफलमभिद
धाति मां नारायणमिति तदेवं कर्मयोगस्यात्मज्ञानसंन्यासापेक्षया प्रशस्त
त्वेऽपि ततो मुख्यसंन्यासस्याधिक्यात्तद्धेतोर्बहिरंगस्य कामक्रोधा
द्युद्वेगमिहैव मोक्षं शक्तस्य शमदमादिमतो योगाधिकृतस्य त्वंपदार्थो

गी· भिन्नस्य परमात्मानं प्रत्यक्त्वेन जानतो मुक्तिरिति सिद्धं २९ ॥
टी·पं इति श्री आनन्दगिरिकृतटीकायां पंचमोध्यायः ५ ॥

143

स्वामिकृतटीका

नन्वेवमिंद्रियादिसंयममात्रेण कथं मुक्तिः स्यात् न तावन्मात्रेण किं
तु ज्ञानद्वारेणेत्याह भोक्तारमिति। यज्ञानां तपसां च स्वभक्तैः समर्पिता
नां तद्दिक्ष्या भोक्तारं पालकमिति वा सर्वेषां लोकानां महांतमीश्वरं
निरपेक्षोपकारिण सर्वेषां भूतानां सुहृदं मंतर्यामिणं मां ज्ञात्वा मत्प्रसादेन शांतिं मोक्षमृ
च्छति प्राप्नोति २९ विकल्पशंकापोहेन यत्नेनैवं सांख्ययोगयोः सम
न्वयः कृष्णेनोक्तः सर्वज्ञंनोमितंहरिं २९ ॥
इति श्रीभगवद्गीतायां सुबोधिन्यां टीकायां पंचमोध्यायः ५

पैशाचभाष्यं

मि एवं समाहितचित्तेन किं विज्ञेयमुच्यते भोक्तारमिति। यज्ञानां तपसां च
कर्तृरूपेण देवतारूपेण भोक्तारं सर्वलोकमहेश्वरं सर्वलोकानां महां
सर्व तमीश्वरं लोकमहेश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनि
रपेक्षतयाउपकारिणं सर्वभूतहृदयेशं सर्वकर्मफलाध्यक्षं सर्वप्र ये
त्ययसाक्षिणं सकललोकबीजभूतं सदाशुद्धरूपं समस्तं तमविमलं
ज्योतिषां परमात्मानं नारायणं मां ज्ञात्वा शांतिं संसारोपरतिमृच्छति प्रा
प्नोति २९ ॥
इति श्रीपैशाचभाष्ये पंचमोध्यायः ५

रामानुजभाष्यं

उक्तस्य नित्यनैमित्तिककर्मेतिकर्तव्यताकस्य कर्मयोगस्य योगशिरस्क
स्य सुशकतामाह भोक्तारमिति। यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं
सर्वभूतानां सुहृदं मां ज्ञात्वा शांतिमृच्छति कर्मयोगकरणएव सुखमृच्छ
ति सर्वलोकमहेश्वरं सर्वेषां लोकेश्वराणामपीश्वरं तमीश्वराणां प
रमं महेश्वरमिति श्रुतेः मां सर्वलोकमहेश्वरं सर्वस्य सुहृदं ज्ञात्वा मदारा
धनरूपः कर्मयोग एव सुखेन प्रवर्तते इत्यर्थः सुहृदामाराधनाय सर्वे प्रवर्तन्ते २९
इति श्रीभगवद्गीतायां रामानुजाचार्यविरचिते भाष्ये पंचमोध्यायः ५

अभिनवगुप्तकृतटीका

यज्ञफलेषु भोक्तृत्वेन तत्र कलत्वात् एवं तपस्वीदृशो भगवन्तं त्वं विदन्व
शान्तधास्थितोपि मुच्यत इति शिवम् २९ अत्र संग्रहश्लोकः सर्वाण्येवा
त्मभूतानि समत्वेनानुपश्यतः जडवद्व्यवहारोपि मोक्षायैवाविकल्पितः
श्रीमदाचार्याभिनवगुप्तविरचिते श्रीगीतार्थसंग्रहे पंचमोध्यायः ५ ॥

परमार्थप्रपाटीका

अथ महाकार्ये विघ्नानां बाहुल्यात् मनोबुद्धीन्द्रियनिग्रहोपायाश्रयं विनाक
र्तुमशक्यमित्याह भोक्तारमिति । सर्वभूतानां सुहृदं परमप्रेमास्पदमतया
मितं मां ज्ञात्वा शांतिं मोक्षमृच्छति प्राप्नोति अथ तदेवाह किंभूतं सर्वय
ज्ञानां तपसां च भोक्तारं सर्वदेवांतर्यामित्वात् सर्वलोकमहेश्वरं सर्वलो
कानां भूर्भुवः स्वरादीनां महांतमीश्वरं निरतिशयैश्वर्यवंतं मां ज्ञात्वेति अ
स्याध्यायस्यार्थं ज्ञानं संपाद्य सम्यक् कर्म विरच्यतः कर्मणो न्यासमाख्याति सं
न्यासं कर्मयोगं संपादमल्पधियः कर्मकौशल्यमाभ्यां ब्रह्मणापापीयते
यतस्तु कृतस्तत्त्वज्ञा कर्मसर्वेन्द्रियात् प्राणायामेन चित्तं
व्रजति परं पदं पंचमे प्रोक्तमेतत् २९ ॥
इति श्रीमद्देवतपंडितसूर्यविरचितायां भगवद्गीताटीकायां परमार्थ
प्रपायां सन्यासयोगनिरूपकः पंचमोध्यायः ५ ॥

वनमालीटीका

एतादृशा महोपायेन किं स्यादित्यत आह भोक्तारमिति यज्ञानां तप
सां भोक्तारं यज्ञादिरूपां पूजां गृहीत्वा तत्फलदातारमित्यर्थः सर्वेषां
लोकानां महांतमीश्वरं हिरण्यगर्भादीनामपि नियंतारं सर्वेषां भूता
नां प्राणिनां सुहृदं प्रत्युपकारनिरपेक्षतयोपकारिणं सर्वांतर्यामिणं
परिपूर्णसच्चिदानंदैकरसं मां ज्ञात्वा शांतिं मुक्तिमृच्छति प्राप्नोति महेश्व
रमित्यनेन यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभि ति य
संविशंतीत्युक्तं जगदुत्पत्त्यादिकर्तृत्वं सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तं सत्यता
दिकं च सद्गुणाः ज्ञेयमुक्तम् अनेन निर्विकल्पब्रह्मज्ञानेष्कृतिजन्या

गी॰
टी॰ पं॰

मोक्षहेतुरितिवदंतोनिरस्ता नचजगत्कर्तृत्वादिकंशास्त्रबोधितंदृश्यायेनतत
टस्थलक्षणंसत्यत्वमेवस्वरूपलक्षणमितिवाच्यंसत्यत्वादेर्हिस्वरूपमि
न्नत्वेमिथ्यात्वांगीकारेकर्तृत्वतत्पत्वायद्यास्वरूपलक्षणत्वासंभवात्
सत्यत्वेचाद्वैतक्षतेः तेषांब्रह्माभिन्नत्वेलक्षणत्वासंभवात् नहिघटोघ
टस्यलक्षणं शास्त्रोपस्थाप्यवेदगतप्रकृष्टप्रकाशस्यवक्तृत्वाद्युपस्था
प्यस्यधर्मिसमसत्ताकस्यधर्मस्यतत्त्वमतेब्रह्मणाभावेनकर्तृत्वासंभवाच्च
144 श्रुतोयावदद्वयभावित्वंरूपंस्वरूपलक्षणमेव जगदुत्पत्त्याद्युत्कलकतिर
पस्यकर्तृत्वस्यभगवतिसदासत्त्वेपिप्रदानेनतत्संबंधापादकस्यसृष्ट्या
दिकालस्यसदासत्त्वाभावान्नसदासृष्ट्यापत्तिरिति हरेरगाधवैभवेयो
हरिर्नीस्येःकदाचन तत्ज्ञानादेवमुक्तिःस्यात्तात्पर्येणज्ञानवान्हरिः ।
इतिश्रीभगवद्गीतायांवनमालीटीकायांपंचमोध्यायः ५ ॥

...वैजयन्तीटीका

इत्येवमात्मावलोकनपूर्वकंकर्मयोगेस्थितस्यमुमुक्षोर्मतप्राप्तिरनिह
लभेत्याह भोक्तारमिति यज्ञतपसांयज्ञानांपंचयज्ञादीनांतपसांचवांद्रा
यणादीनांचभोक्तारंनत्विंद्रादयोदेवायज्ञेभुक्तपःसचभागंभुंजंतितेपित
न्नद्वारकाःकृतानसंतित्वमेवैकोभोक्तेतिकथंविजानीयामितिचेत्तत्राह ।
सर्वलोकमहेश्वरंसर्वेषांब्रह्मरुद्रेंद्रादीनांलोकानांजनानांमहेश्वरंमहा
श्चासावीश्वरश्चेतिमहेश्वरस्तम् ईश्वराणामपिमहेश्वरमित्यर्थः तमीश्व
राणांपरमंमहेश्वरंतंदेवतानांपरमंचदैवतमित्यादिश्रुतेः ननुयद्येवंत्व
मसितर्हिगुरुगोत्रादिवधरूपमहद्घोरकर्मकर्तृमेमकर्मणाकथंप्रसा
न्नोभविष्यसीतिचेत्तत्राहसुहृदमिति सर्वभूतानांसर्वेषांब्रह्मादिपिपीलि
कांतानांभूतानांप्राणिनांसुहृदंनिरपेक्षोपकारकं सर्वसुहृत्त्वान्ममारा
धनेसर्वेयथाऽकर्वंतितथात्वमपिकुरुत्वत्कर्मणाहंप्रसन्नोभविष्यामी
त्यर्थः ईदृशंमांसर्वेश्वरंसर्वपुरुषार्थप्रदंज्ञात्वाममाराध्योयमेवेत्यनु
भूयशांतिंभगवज्ज्ञावाप्तिंमुक्तिमृच्छतिप्राप्नोति इत्येवंज्ञानगर्भकः क
र्मयोगोमुमुक्षूणामवश्यकमेवकर्तव्यइतिपंचमाध्यायेभगवतापार्थं
सारथिनापार्थायप्रोक्तः कर्मैवावश्यकर्तव्यंज्ञानगर्भंमुमुक्षुभिः इति

श्रोक्रोर्ज्जनो येन पंचमेनेमहाश्रये २९ इतिकृतसन्नसवैजयंत्यांपंचमोध्यायः ५

मधुसूदनीटीका

सर्वेषांयज्ञानांतपसांचकर्तृरूपेणदेवतारूपेणचभोक्तारंभोगकर्त्तारं
पालकमितिवा सर्वेषांलोकानांमहांतमीश्वरंहिरण्यगर्भादीनामपिनि
यंतारंसर्वेषांप्राणिनांसुहृदंप्रत्युपकारनिरपेक्षतयोपकारिणंसर्वांत
र्यामिणंसर्वभासकंपरिपूर्णंसच्चिदानंदैकरसंपरमार्थसत्यंसर्वात्मानंना
रायणंमांज्ञात्वा आत्मत्वेनसाक्षात्कृत्यशांतिंसर्वसंसारोपरतिंमुक्तिंमृच्छ
तिप्राप्नोतीत्यर्थः त्वांपश्यन्नपिकथंनाहंमुक्तःस्यामितिशंकानिवारणायवि
शेषणानि उक्तरूपेणैवममज्ञानंमुक्तिकारणमितिभावः २९ अनेक
साधनाभ्यासनिष्पन्नंहरिणोदितं स्वस्वरूपपरिज्ञानंसर्वेषांमुक्तिसाधनम्
इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्य
श्रीमधुसूदनसरस्वतीविरचितायां स्वस्वरूपपरिज्ञानंनामपंचमोध्यायः ५

सदानंदीटीका

एवंयोगाविनः किंवाज्ञात्वामुच्यंतइत्याहतत्र कर्तृरूपेणसर्वेषांयज्ञानां
तपसांतथा भोक्तारंदेवरूपेणपालकंवाजगत्स्यापि ब्रह्मादीनांसम
स्तानांनियंतारमसेशिनं २ अनपेक्षोपकर्तारंप्रत्युपकारमीश्वरं सर्वेषां
प्राणिनांसर्वबुद्धिहृत्येकसाक्षिणं ३ सर्वावभासकंपूर्णंसच्चिदानंदवि
ग्रहं नारायणंहिमांसम्यकसाक्षात्कृत्यात्मरूपतः ४ संसारोपर
तिरूपांतिंमोक्षाख्यांलभतेजना एवंपश्यन्नहंकथंनानोमुक्तःस्यापवृत्तये ५
विशेषणानितेष्वेवंज्ञानेममुक्तिकारणं ६ निरवधिसुखबोधिंपतिकां
नान्निंतंश्रीमनुखवशानिवासेसर्वयत्तेजमत्लि सकलसदृदसीशंसर्व
वेदांतभूमिंयदुपतिमभिवेदेश्रांतिविच्छेदहेतं ७ २९ निष्कामःकर्मयो
गःसपदिरतिकरोयस्यपादारविंदेज्ञानेवैराग्ययुक्तेभवतिचसलभंयस्य
भक्त्यानराणां कामक्रोधौनिरस्यस्थिरमतिरमितंलभ्यतेयत्प्रसादात्तंसदा
रात्मैकहेतंनवजलदरुचंकृष्णमेवाननोस्मि ॥
इतिभावप्रकाशेश्रीसदानंदविदाकृतेजीवन्मुक्तिफलाख्यानःपंचमोध्यायः ५

नीलकंठीटीका

वै

गी॰ एवंसमाहितचित्तेन किं विज्ञेयमित्यत आह भोक्तारमिति । सोपाधिकेनरूपे
टी॰ पं॰ णयज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च भोक्तारं तथा सर्वेषां भूतानां हिरण्य
गर्भादीनामपि महांतं व्यापकं ईशितारं अंतर्यामिणं सुहृदं सर्वभूतानां प्रा
णिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वप्रत्ययसाक्षिणं नारायणं
मां प्रत्यगभेदेन ज्ञात्वा साक्षात्कृत्य तद्भावं प्राप्य शांतिमनुपाध्यवस्था
145 निरुपाख्यां कैवल्यसंज्ञां ऋच्छति प्राप्नोति एवं च सोपाधिब्रह्मभावप्रा
प्तिपूर्विकैव निरुपाधिप्राप्तिरिति गम्यते यथोक्तं वार्तिककारैः सोपाधि
र्निरुपाधिश्च द्वेधा ब्रह्मविदुच्यते सोपाधिकः स्यात्सर्वात्मा निरुपाख्योनु
पाधिकः जक्षन्क्रीडन्रतिं प्राप इति सोपाधिकस्य तु छांदोग्ये सर्वका
माप्तिः सर्वात्म्यमस्य समीरितं अहमन्नं तथान्नादः श्लोककार्यप्यहं
अहं इति तत्त्वविदः सामगाने सर्वात्मता स्फुटा अज्ञापि च कृद्दृष्टांता
त्सोपाधिस्तत्त्वविच्चुतः अपूर्वानपरागुज्ञा श्रोक्ष्यानेनिरुपादक इति २९
इति श्रीभीष्मपर्वणि नैलकंठीये भारतभावदीपे पंचमोध्यायः ५

स्पर्शान्निरोधात्वियोगे प्राणायामाद्यभ्या श्रीधरीटीका समासूच्ये स्वरूपगिणा यानाद्वेति द्वितीयमुपा

भासूत्रयति भोक्तारमिति मांस्वैदिष्टं वासुदेवाख्यं परं निर्वाणं ब्रह्मशब्देनोक्तमानेयज्ञानामुक्त
पूर्वाणां तपसां च कृतिचोदितानां क्रियाणां ब्रह्मार्पणप्रकारेणानुष्ठीयानां
भोक्तारं सर्वेषां भूतानां प्रकृतिविकृतीनां महांतं मनस्यापि तिष्ठेश्वरं
सर्गस्थितिप्रलयेषु प्रभुं निरुपाधिमसमर्थं सर्वेषां भूतानां सुहृदं हितोप
देशकं ज्ञात्वा शांतिमृच्छति पतेनादिविहीं क्लेशकर्मविपाकाशयैरप
रामृष्टः पुरुषविशेषो निर्माणकायमधिष्ठाय संप्रदायप्रवर्तकेनुग्राह
ज्ञी॰ कश्चेति परमेश्वरत्वं नामसंवेसर्हतम् २९ इति भगवद्गीतायाश्रानं
दीटीकायां पंचमोध्यायः ५ ॥

रामकंठीटीका

सं॰ मां निर्वाणं ब्रह्मशब्देनोक्तमनंतरमपेयं परमात्मानं ज्ञात्वात्मत्वेन प्रा
तिपाद्य शांतिं निःशेषविकल्पतोभविरतिलक्षणां निर्वृतिमृच्छति मत
त॰ स्वरूपज्ञानादेवमुच्यते इत्यर्थः कीदृशं मां ज्ञात्वा यज्ञतपसां भोक्तारमिह
नानायज्ञतपः प्रभृतयः क्रियाः शास्त्रेणानुष्ठीयंते याश्चोदिताः तासामा

ज्ञानमोहिताः अनुष्ठातारः परस्परभिन्नमात्मानं तत्तत्फलभोक्तारं मन्य
न्ते परमार्थविदस्तु कर्तृभेदाभावात्सर्वक्रियाफलनामहमेवैकः कर्ता च
भोक्ता चेति यज्ञतपसां भोक्तारं तथा सर्वलोकमहेश्वरं सर्वस्य कस्यचि
ज्जन्तुजातस्य क्रीडामात्रप्रयोजनतया स्वेच्छामात्रेणैव नानात्वेनावभा
सितस्य महेश्वरं तास्ताः क्रियाः स्वैकविनियोक्तृत्वात् परमं प्रभुम् त
था परमार्थतो भेदाभावात्सर्वेषां भूतानां सुहृदम् सर्वदा निसर्गनिर्दोष
स्वात्ममात्रप्रतिष्ठितत्वात् न कस्यचिद्द्विष्टं नाप्युपरक्तम् एवंविधं मां ज्ञात्वा
मद्देव कर्मसु प्रवर्तमानः कर्मयोगी शान्तिं मुक्तिमाप्नोतीति पूर्वस्मा
द्योगिनो विशिष्टत्वमेवास्य वितत्य प्रतिपादितमित्योम् यत्रैकतायमुन
या गगनापगेव संन्यासधीरुपगता सह योगबुद्ध्या अध्यायमेन समभिग
च्छत सर्वतीर्थसारं प्रयागमिव पंचममात्मसिद्ध्यै ॥ २९ ॥ इति श्रीम
द्रामकण्ठविरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्रनाम्नि भगवद्गीतावि
वरणे पंचमोध्यायः ५ ॥ ॥ ॥ ॥ ॥

अथ ध्यानयोगस्य ब्रह्मभाव [illegible] लासिकी टीका स्वचमूलकारणमाह ॥

मामहं तावत्प्रत्यक्परमात्मानं ज्ञात्वात्मत्वेन प्रतिपाद्य शान्तिं निःशेष
विकल्पोपशमरूपां निर्वृतिं मृच्छति प्राप्नोति मत्स्वरूपज्ञानादेव मु
च्यते इत्यर्थः तथा च कुलार्णवे न वेदाध्ययनान्मुक्तिर्न शास्त्रपठना
दपि ज्ञानादेव हि कैवल्यं नान्यथा वीरवन्दिते इति तथा च श्रुति तमे
व विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति नन्वेवं सात्मत्वप्रत्य
पि कथं नाहं म[illegible]क्तेरन्याशंकानिराकरणाय ऐश्वर्यरूपसूचकानि
विशेषणान्याह सर्वेषां यज्ञानां तपसां च भोक्तारं पालकमिति वा त
था सर्वेषां लोकानां महान्तमीश्वरं ब्रह्मशायुग्रभादीनामपि नियन्तारं
सर्वेषां भूतानां सुहृदं अन्तर्यामिनमित्यो आत्मन्येवैकतानत्वान्तन्
ह्यतिक्रममब्रवीत् संन्यासयोगरूपं यस्मै वन्दे पार्थाय चेतनम् ॥ २९
इति श्रीभगवद्गीतायां [illegible] लासिकी टीकायां पंचमोध्यायः ५ ॥

गी॰
प॰टी॰

146

पंचोलीटीका

एवं समाहितचित्तेन किं ज्ञेयमित्युच्यते भोक्तारमिति। मां यज्ञानां तप
सां कर्तृत्वेन देवतात्वेन च भोक्तारं सर्वलोकमहेश्वरं [illegible]
सर्वलोकानां महांतमीश्वरं सर्वभूतानां सुहृदं प्रत्युपकारनिरपेक्षत
याउपकारिणं एवंविधं मां ज्ञात्वा शांतिं सर्वसंसारोपरतिमृच्छति
प्राप्नोति २९ इति श्रीभगवद्गीता पंचोलीटीकायां पंचमोध्या
यः ५ ॥

[illegible]वीरसमिद्धायिनी ॥

इदमास्वकर्मयोगी मत्साहाय्यादुभयलोकसिद्धिभाग्भवतीत्याह
भोक्तारमिति। यज्ञतपसां शुभयज्ञादिरूपनियमानां भोक्तारं पाल
यितारं साहाय्यकं कुर्वाणमितियावत्। अथवा यज्ञतपसामनु
ष्ठितस्वस्ववर्णाश्रमोचितकर्मफलानां भोक्तारं स्वीकर्तारं तत्तद्देवते
भ्यः समर्पणात्। तथा सर्वेषां लोकानां चतुर्दशभुवनानां महेश्व
रं परस्वामिनं मां यज्ञो वै विष्णुरिति श्रुतेर्यज्ञमूर्तिधरं यज्ञभोक्तारं
यज्ञफलधातारं च सर्वभूतानां मध्ये सुहृदं सहायकं ज्ञात्वा ईश्वर ए
व ममाज्ञारब्धे कर्मणि सहायकमिति पारणीकृत्येतियावत्। अ
थ च यज्ञमूर्तिधरस्य मम विष्णोः प्रीणनार्थं स्वधर्माचार एव
परलोकं यातमनुव्रजतीति शास्त्राचार्योपदेशाभ्यां सम्यङ्नि
श्चित्य तथा च शास्त्रं अथ च सर्वभूतानां सर्वेषु विद्यादिगुणा
युक्तब्राह्मणश्वपाकादेर्भूतानां शुके दासादयुते भूतं प्राणिनीते
समे विशिष्यत्नुभासनात्। समानो समदर्शिनां वध्यतायां सामा
न्यमाततायि वलक्षणं निमित्तं दृष्टगतां चाद्विय प्रवरणानां सुहृ
दं साध्यसाधकं साध्यसिद्धिकरमितियावत्। ज्ञात्वा निश्चित्य
अत एव साम्येनैव प्रवर्तमानः कर्मयोगी शांतिं प्रारब्धकार्यसमा

सिजन्यं सुखं राज्यभोगादिलक्षणमैहिकं पारत्रिकं स्वर्गप्राप्त्या
दिलक्षणं मापवर्गिकं ब्रह्मसायुज्यप्राप्तिलक्षणं चेति त्रिवि
धमृच्छति प्राप्नोति अथवा मांडलिकः स्वस्मादधिकराष्ट्राधि
पत्यबलसंपत्त्यादिशालिनं देयकरमर्थिराजानं सहायं लब्ध्वा
राजांतरकृतोपद्रवान्निर्मुक्तः सन्निश्चिंतो भूत्वा राज्यसुखमनु
भवतीति ध्वनिरिति भद्रं २९ ॥ इति श्रीरणवीरसमिद्धेयि
न्यां गीताव्याख्यायां पंचमोध्यायव्याख्यानं हतं ५॥

मधुभाष्य

भोक्तारमिति २९ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचा
र्यविरचिते गीताभाष्ये पंचमोध्यायः ५॥

147

जो कहो कि इन्द्रीमात्र वश करने से कैसे मुक्त होय तिसपर क
हते कि हां मुक्ति ज्ञानही के द्वारा होतीहै देखो हमारे भक्तों से स
मर्पित यज्ञ औ तपके सुयाचितरूप भोक्ता औ प्रतिपालक सर्व-
लोक मे श्रेष्ठ ईश्वर सब से निरपेक्ष अन्तर्यामी रूपहम को जानि
के योगी लोग मेरी अनुग्रह से शान्ति कहे मोक्ष पावतेहै २९
श्रीधर स्वामी कहते कि जो अर्जुन को कर्म योग औ ज्ञान योग
की पृथक शङ्का निवारि जिस ने क्रमसे दोनो को एक कहा है सो
ई जगत गुरु श्रीकृष्ण को हम प्रणाम करते हैं ॥

इति जगन्नाथ शुक्ल विरचितायां मनभावनीटीकायां पंचमोध्यायः ५

दोहा

यज्ञ तप भोग न द्वारजो सर्वलोकपतिजोहि समजन मित्र
हिंजान मोहिशांतिपाम सोदोहि २९ ॥ इति ॥